Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]



015mN
J2.7

चैत्रपूर्णिमा २००६

सप्तमवर्षे प्रथमोऽङ्कः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015mN 8374
J2.7
Upadhyay, Tribhuvan
Prasad
Saraswati sushma

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

श्रीत्रिभुवनप्रसाद उपाध्यायः

एम० ए०, व्याकरणाचार्यः

सहायकसम्पादकः

श्रीव्रजवल्लभद्विवेदो दर्शनाचार्यः

चैत्रपूर्णिमा २००६

सप्तमवर्षे प्रथमोऽङ्कः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015mN
J2.7

LIBRARY
Jangamwadi Math, Varanasi
Acc. No. 9374

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषय-सूची

स्तम्भाः	विषयाः	लेखकाः	पृष्ठसंख्याः
	श्रुतिनिकणः		१
	सुहृद्वाणी (कविता)	—श्रीवटुकनाथशास्त्री खिस्ते ।	२
शास्त्रनिबन्धः—			
	ऐतरेयारण्यकपर्यालोचनम्	—डा० मङ्गलदेव शास्त्री एम. ए. डी. फिल्. ।	३
	अभिधर्मवस्तुकथा	—भदन्तशान्तिभिक्षुः शान्तिनिकेतनस्य पालिविभागाध्यापकः ।	११
	परमाणुस्वरूपविमर्शः	—श्रीकेशवद्विवेदी न्यायाचार्यः का. रा. सं. म. न्यायप्राध्यापकः ।	२५
	दोषदृष्टिः	—श्रीवटुकनाथशास्त्री खिस्ते का. रा. सं. म. साहित्याध्यापकः ।	३३
विज्ञाननिबन्धः—			
	नाडीमण्डलारोपणे संस्कारविशेषाः	—श्रीमुरारिलालशर्मा ज्यौतिषाचार्यः एम. ए., का. रा. सं. म. गणिताध्यापकः ।	३८

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

स्तम्भाः	विषयाः	लेखकाः	पृष्ठसंख्याः
समालोचनम्—			
	नागार्जुनाचार्यस्तस्य सुहृल्लेखश्च	—श्रीभरतसिंह उपाध्यायः एम. ए., हटूंडी, अजमेर। अनुवादकः–श्रीभूपनारायणझा।	४३
	पाणिनीयसूत्रपाठान्तरसंकलनम्	—श्रीरामशंकरभट्टाचार्यः का. रा. सं. महाविद्यालयसदस्यः।	४७
	वैदिकं वाग्विज्ञानम्	—श्रीवैद्यनाथशास्त्री पञ्चवटी, नासिक।	६३
विविधम्—			
	उपरागविज्ञानम्		७३
सम्पादकीयम्—			
	सप्तमवर्षप्रवेशः		७५
काण्वसंहिताभाष्यसंग्रहः		—आनन्दबोधभट्टोपाध्यायप्रणीतः। सम्पादकः–श्रीसुभद्रझा एम.ए. साहित्याचार्यः, सरस्वतीभवनाध्यक्षः।	१–१६
लघुग्रन्थरत्नप्रभावलिः—			
	पथिकजनपातकचिन्तनस्मृतिः	—श्रीमहेश्वरभट्टप्रणीता। सम्पादकः–श्रीव्रजवल्लभद्विवेदः।	क–च १–२२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लेखकेभ्यो निवेदनम्

पत्रिकेयं प्रतिवर्षं चैत्राषाढाश्विनपौषपूर्णिमासु सरस्वतीभवनात् प्रकाश्यमेति ।

अस्याः खलु सरस्वतीभवनस्थैर्विद्वद्भिर्विद्यालयीयाध्यापकैरन्यैश्च स्वोपज्ञ-विचारविचारकैर्निबद्धानामनुसन्धानमूलकानामन्येषां चोपयोगिनां निबन्धानां प्रकाशनेन संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः सम्यगालोचनाप्रवृत्तेश्चोत्पादनं प्रोत्साहनं चैव मुख्यमुद्देश्यम् ।

उपरिनिर्दिष्टप्रकारका एव निबन्धा अत्र प्रकाशिताः स्युः ।

फुलस्केपपरिमितेषु पत्रेष्वेकस्मिन् पार्श्वे एव पर्याप्तं रिक्तं स्थानं (मार्जिन) दत्त्वा सुस्पष्टं शोभनाक्षरैर्लिखिता एव निबन्धाः पत्रिकायां प्रकाशनार्थं स्वीकृताः स्युः ।

पूर्वाङ्कप्रकाशनानुकालमेव समागता निबन्धा एवाग्रिमाङ्के प्रकाश्यमर्हेयुः ।

निबन्धाश्च काशिकाराजकीयसंस्कृतमहाविद्यालयाध्यक्षसविधे प्रेषणीयाः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूचना

"सारस्वती सुषमा" पत्रिकायां प्रत्यङ्कं विशिष्टानां हिन्दी-संस्कृत-ग्रन्थानां समालोचनाः प्रकाशयितुमुपक्रान्ताः ।

ये महानुभावाः स्वकीय-हिन्दी-संस्कृतग्रन्थानामस्यां पत्रिकायां समालोचनाः प्रकाशिता दिदृक्षन्ते, तैः स्वस्वग्रन्थानामादर्शद्वयं सम्पादकस्य (प्रिंसिपल, गवर्नमेण्ट संस्कृत कालेज, बनारस) सविधे प्रेषणीयम्, तत्रैव "समालोचनार्थम्" इत्यप्युल्लेखनीयम् । यथावकाशं ते ग्रन्थाः पत्रिकायां समालोचयिष्यन्ते ।

—सम्पादकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयपत्रिका

७ वर्षः } चैत्रः २००६ { १ अङ्कः

श्रुतिनिक्कणः

भद्रमिच्छन्त ऋषयः स्वर्विद-
स्तपो दीक्षामुपनिषेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं
तदस्मै देवा उपसंनमन्तु ॥

[अथर्व० १९।४१।१]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुहृद्वाणी

सखे ! मधुरमुच्चरन्नखिलखेदमुच्छेदयन्
जयन्निह रिपोर्बलं शममनुत्तमं धारयन् ।
नयन्नधिनयं धियं श्रियमुदञ्चयन्निर्भयं
वयं वयमिति त्यजन् गुरुपथं श्रयन्नधि भोः ॥ १ ॥

कचाकचिकथाक्रमप्रचुरवादगोष्ठीरसे
वदावदजनेप्सिते परिहरन् मनीषोद्यमम् ।
नितान्तविमलाशये लघुनि सर्वदोषापहे
मुनीन्द्रवचनामृते गुरुमते मनो मज्जय ॥ २ ॥

रुदन्तमिह मानवं वितनुषे हसन्तं त्वया
दयासरसया दृशा मधुरया च वाचा यदि ।
न किञ्चिदवशिष्यते दुरितराशिनिर्वासने
परं सुकृतसङ्गतो गुरुनतः सुखी सञ्चर ॥ ३ ॥

कणाशनपदेक्षणद्विरसनादिभिर्दर्शितान्
विधीन् यदि सुदुश्चरान् कलयसे भवोल्लङ्घने ।
विहाय विविधागमाटनविधिं विवेकाङ्कुरो-
द्गमाय मुदिरायितं गुरुवरं हरं चिन्तयेः ॥ ४ ॥

नभोदिवसधूसरं सलिलपूरमुच्चैरपि
स्थितो नभसि निर्मलं वितनुते मुनिर्मानितः ।
चलद्विपुलकल्पनामलिनमन्तरङ्गं भृशं
प्रसादयति सद्गुरुर्नभसि चिन्मये चिन्तितः ॥ ५ ॥

श्रीवटुकनाथशास्त्री खिस्ते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रुतिविमर्शः

ऐतरेयारण्यक आचारविचाराः

अथवा

ऐतरेयारण्यकपर्यालोचनम्

डाक्टरमङ्गलदेवशास्त्री

(पूर्वतोऽनुवृत्तम्)

इत्यादिश्रुतीरनुसरता हि यास्केन निरुक्ते प्रतिपाद्यते-"नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया। उपसन्नाय तु निर्ब्रूयात्। यो वालं विज्ञातुं स्यात्। मेधाविने तपस्विने वा।" (नि० २।३) इति। तदेवं विद्यायाः साफल्यार्थं स्वाध्यायमध्यापनं वा कुर्वता नूनं स्वीयनियमा व्रताचरणमिवावश्यं पालनीयाः। समुचितायां भूमौ समुचितकालादिविचारेणैवोप्तं बीजं काले सफलतां लभते। अत एव स्वाध्यायविषयेऽध्यापनविषये च बहुविधाः सारगभीरा अर्थाः प्रतिपाद्यन्ते यत्र तत्र अस्मिन्नारण्यकेऽपि। प्रसङ्गेनाध्ययनाध्यापनयोर्महिमाप्युपवर्ण्यते चित्ताकर्षकेण प्रकारेण। तथा हि—

अथातः स्वाध्यायधर्मं व्याख्यास्यामः। उप पुराणे नापीते कक्षोदके, पूर्वाह्णे न संभिन्नासु च्छायास्वपराह्णे, नाध्यूळ्हमेघे, अपर्तौ वर्षे त्रिरात्रं वैदिकेनाध्यायेनान्तरियात्। नास्मिन्कथां वदेत, नास्य रात्रौ च, न च कीर्तयिषेत्। (ऐ० आ० ५। ३। ३)

कृत्स्नवेदाध्ययननियमा अत्र व्याख्याताः। 'उप पुराणे' इत्यादिवाक्येन पौष्याः पौर्णमास्या उपरितनः काल उपलक्ष्यते। तथाहि-'पुराणे कक्षोदके उपापीते' सति नाधीयीतेति वाक्ययोजना। कक्षशब्देन लतादिपुञ्जमभिधीयते। तस्य मूले वृष्टिकालसंपादितमुदकं द्रवरूपेण किंचित्कालमनुवृत्तं सत्पौषादिमासेषु प्रायेण शुष्यति तदिदमत्राभिधीयते। 'पुराणे' पूर्वसंपादिते 'कक्षोदके' 'उपापीते' लतादिमूलसमीपे विलीने शुष्के सति नाधीयीत। २

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS .

तथा च मनुना स्मर्यते—

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ।। इति (सायणः) ।

पूर्वाह्णेऽपराह्णे च शरीरवृक्षादीनां छायासु संभिन्नासु मिलितासु सतीषु नाधीयीत । अध्यूढः । आधिक्येन प्रसृतः सान्द्रः । अपर्तौ वर्षे । अकालवृष्टौ । वैदिकेनाध्यायेनान्तरियात् । वेदपाठस्यान्तरायः कर्तव्यः । 'अस्मिन्' अधीयमाने स्वाध्याये । कथां लौकिकीं वार्ताम् । 'अस्य' महाव्रतस्य पाठं 'रात्रौ न' कुर्यात् । किंच महाव्रताभिज्ञोऽहमिति एवं जनमध्ये कीर्तिमपि नेच्छेत् (सायणः) । अथवा 'अस्य' इत्यनेन सामान्येन वेदपाठमात्रमेवाभिप्रेतं स्यात् ।

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणी स्थः । श्रुतं मे मा प्रहासीः । अनेनाधीतेनाहोरात्रान्संदधामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु । अवतु मामवतु वक्तारम् । (ऐ० आ० २ । ७ । १)

वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम् । अनयोरन्योन्यानुकूल्यमस्त्वित्येवं प्रार्थ्यते । आविः स्वप्रकाशं ब्रह्मचैतन्यम् । आवीरेधि प्रकटीभव । आणी आनयनसमर्थे (सायणः) । मा प्रहासीः । मा परित्यजतु (सायणः) । अनेनाधीतेन अहोरात्रान् संदधामि । अहनि रात्रौ बालस्यं परित्यज्य निरन्तरं पठामीत्यर्थः । वक्तारमाचार्यम् ।

सुपर्णोऽसि गरुत्मान् । प्रेमां वाचं वदिष्यामि बहु वदिष्यन्तीं बहु पतिष्यन्तीं बहु करिष्यन्तीं बहु सनिष्यन्तीं बहोर्भूयः करिष्यन्तीं स्वर्गच्छन्तीं स्वर्वदिष्यन्तीं स्वः पतिष्यन्तीं स्वः करिष्यन्तीं स्वः सनिष्यन्तीं स्वरिमं यज्ञं वक्ष्यन्तीं स्वर्मां यजमानं वक्ष्यन्तीमिति ।

(ऐ० आ० ५ । १ । ५)

सुपर्णोऽसि गरुत्मानिति यागनिर्वाहकं पक्ष्याकारं चैत्याग्निं संबोध्य उच्यते । इमाम् । शस्त्रशंसनादिरूपाम् (सायणः) । बहु पतिष्यन्तीम् । बहुधा पारलौकिकफलं प्रापयिष्यन्तीम् (सायणः) । सनिष्यन्तीं दास्यन्तीम् ।

४ नादीक्षितो महाव्रतं शंसेन्नानग्नौ न परस्मै नासंवत्सर इत्येके । कामं पित्रे वाचार्याय वा शंसेदात्मनो हैवास्य तच्छस्तं भवति ।.......

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तदिदमहर्नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने नो एवासंवत्सरवासिने नाब्रह्मचारिणे नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानभिप्राप्यैतं देशम्। न भूयः सकृद्गदनाद् द्विर्गदनाद्वा, द्व्येव । एक एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यः । न वत्से च न तृतीय इति । न तिष्ठंस्तिष्ठते न व्रजन्व्रजते न शयानः शयानाय नोपर्यासीन उपर्यासीनाय । अध एवासीनोऽध आसीनाय । नावष्टब्धो न प्रतिस्तब्धो नातिवीतो नाङ्कं कृत्वोर्ध्वज्ञुरनपश्रितोऽधीयीत। न मांसं भुक्त्वा न लोहितं दृष्ट्वा न गतासुं नाव्रत्यमाक्रम्य नाक्त्वा नाभ्यज्य नोन्मर्दनं कारयित्वा न नापितेन कारयित्वा न स्नात्वा न वर्णकेनानुलिप्य न स्रजमपिनह्य न स्त्रियमुपगम्य नोल्लिख्य नावलिख्य। नेदमेकस्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः, समापयेदिति गालवः, यदन्यत्प्राक्तृचाशीतिभ्यः समापयेद्वेत्याग्निवेश्यायनोऽन्यमन्यस्मिन्देशे शमयमान इति । यत्रेदमधीयीत न तत्रान्यदधीयीत, यत्र त्वन्यदधीयीत काममिदं तत्राधीयीत । नेदमनधीयन्स्नातको भवति, यद्यप्यन्यद्बह्वधीयान्नैवेदमनधीयन्स्नातको भवति । नास्मादधीतात्प्रमाद्येद्यद्यप्यन्यस्मात्प्रमाद्येन्नैवास्मात्प्रमाद्येन्नो एवास्मात्प्रमाद्येद् । अस्माच्चेन्न प्रमाद्येदलमात्मन इति विद्यात् । अलं सत्यं विद्यात्। नेदंविदनिदंविदा समुद्दिशेत सह भुञ्जीत न सधमादी स्यात्। (ऐ० आ० ५ । ३ । ३)

नादीक्षित इत्यादिना 'महाव्रत'-शंसने नियमविशेषान् दर्शयित्वा 'तदिदमहः' इत्यादिना तदध्यापने नियमान् दर्शयति। तदेतत् सर्वं सामान्येन पालनीयनियमानपि संकेतयति। 'एतं देशम्' आचार्यो यस्मिन् देशे निवसति तम्। सकृद् गदनम् एकस्मिन् पर्याये शिष्याणामध्यापनम्। द्व्येव द्विविधैव । द्विवारमेवाध्यापनमित्यर्थः। वत्से बाले। तृतीये आयुषस्तृतीयामवस्थामापन्ने। 'अध एव' भूमावेव 'आसीनोऽध आसीनाय' ब्रूयात्। पृष्ठभागे कुड्याद्याश्रयणमवष्टम्भः । पुरोभागे हस्तयोर्दण्डाद्याधाराश्रयणं प्रतिस्तम्भनम्। वस्त्रेण सर्वाङ्गपिधानमतिवीतत्वम् । पद्मासनादिकमङ्ककरणम् । ऊर्ध्वज्ञुः । जानुद्वयमूर्ध्वं कृत्वा अधीयीत। अनपश्रितः। योगपट्टवस्त्राद्याश्रयरहितः। अव्रत्यमाक्रम्य। उच्छिष्टाद्याक्रम्य। नापितेन कारयित्वा। नखनिकृन्तनं क्षौरं वा कारयित्वा । स्नात्वा। उष्णोदकेन स्नात्वेति सायणः । वर्णकेनानुलिप्य । चन्दनकुङ्कुमादिनानुलिप्य । उल्लिख्य । लिप्यक्षराद्युल्लिख्येति सायणः। अवलिख्य। लिप्यक्षराद्युल्लेखनस्य विनाशनादि कृत्वेति सायणः। इदं महाव्रताध्ययनम्। अन्यमुत्तरभागम् । शमयमानः समापयन्। प्रमाद्येत् प्रज्ञामान्द्यादिदोषेण तद्विस्मृतिं प्राप्नुयात्। 'आत्मनः' पुरुषार्थाय तदधीतम् 'अलमिति' विद्यात्। समुद्दिशेत्। वार्तालापादिव्यवहारं कुर्यात्। सधमादी। (तेनानिदंविदा) सह हर्षादिविनोदवान्। ५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ता एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने नाप्रवक्त्र इत्याचार्या आचार्याः। (ऐ० आ० ३ । २ । ६)

अप्रवक्त्रे । यः प्रवचनं शिष्योपदेशं न करोति तादृशाय ।

(३) सत्यभाषणादिगुणानां प्रशंसा, अनृतस्य निन्दा च

"अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि" (यजु० १।५), "मा भेः, मा संविक्थाः" (यजु० १।२३), "स नो मुञ्चत्वंहसः" (अथ० ४।२३-२४) इत्यादिश्रुतिषु सत्यभाषणनिर्भयतादिगुणानां प्रशंसा, अनृतादिपाप्मनश्च निन्दा असकृच्छ्रूयते । अस्मिन्नारण्यकेऽपि स एवार्थो हृदयंगमैः शब्दैः प्रतिपाद्यते । तथा हि—

तदेतत्पुष्पं फलं वाचो यत्सत्यम् । स हेश्वरो यशस्वी कल्याणकीर्त्तिर्भवितोः, पुष्पं हि फलं वाचः सत्यं वदति । अथैतन्मूलं वाचो यदनृतम् । तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तते, एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्त्तते । तस्मादनृतं न वदेत्, दयेत त्वेनेन । (ऐ० आ० २।३।६)

भवितोरीश्वरः । भवितुं प्रभुर्भवति । मूलम् । पुष्पफलविपरीतत्वमात्रमत्र मूलत्वम् । आविर्मूलः । भूमेरुत्खातः सन्नाविर्भूतमूलः । उद्वर्तते विनश्यति । दयेत त्वेनेन । अनृतवदनेन निमित्तेन स्वात्मानं रक्षेत् ।

नाधृष आ दधर्ष दाधृषाणम् । (ऐ० आ० ५।२।१)

वस्तुत इन्द्रसंबन्धिनीयमृक् । तस्या एष भागः सामान्यमर्थमप्यभिधातुं शक्नोति । तथा हि । 'अधृषः' केनापि तिरस्कर्तुमशक्योऽपि वैरी 'दाधृषाणम्' अतिशयेन तिरस्कर्तारं 'ना दधर्ष' नैव तिरस्करोति ।

६ न सोमो अव्रतं हिनोति, न स्पृशद्रयिः । (ऐ० आ० ५।२।२)

सोमो देवता अव्रतं न 'हिनोति' प्रीणयति । रयिर्धनमपि तं न 'स्पृशत्' प्राप्नोति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(४) दानमातिथ्यं च

दानस्यातिथ्यस्य च सामान्येन कर्तव्यत्वं श्रैष्ठ्यं चाभ्युपगच्छदपि एतदारण्यकं तयोस्तत्तत्प्रसङ्गे युक्तायुक्तत्वविचारपूर्वकमेवानुष्ठानं वरमिति स्पष्टमभिदधाति। तत्रातिथ्यस्य विषये—"यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति। न वा असन्तम् (=सन्मार्गरहितम्) आतिथ्यायाद्रियन्ते" इत्येतत्कथनम्, दानस्य च विषये "तस्मात्काल एव दद्यात् काले न दद्यात्" इत्येतद्विधानं चास्य वैशिष्ट्यमेकं संपादयति। तथा हि—

ईश्वरोऽतिथिरेव चरितोः। (ऐ० आ० १।१।१)

ईश्वरः प्रभुः। चरितोश्चरितुम्। स्थानात्स्थानान्तरं गन्तुमित्यर्थः।

यो वै भवति यः श्रेष्ठतामश्नुते स वा अतिथिर्भवति। न वा असन्तमातिथ्यायाद्रियन्ते। (ऐ० आ० १।१।१)

यो वै भवति। यस्तु पुमान् सन्मार्गवर्ती भवति। सत्तावाची भूधातुः सन्मार्गवर्तिनं ब्रूत इति सायणः, तद्यथा सत्पुरुषादिशब्दे अस्धातुरपि। असन्तं सन्मार्गरहितम्।

अकृता वै सापचितिर्यामपश्यते करोति।···अकृता वै सापचितिर्यामध्यूष्टाय करोति, ····एषा वा अपचितिर्या पश्यते करोति। (ऐ० आ० १।२।४)

अपचितिः पूजा समादरो वा। अध्यूष्टाय। अधिकत्वेन समीपं प्राप्ताय। तदर्थं कृताप्यपचितिः कालातिक्रमेण अकृतैव भवति।

न तस्येशे यन्नाद्याद् यद्वैनं नाद्युः। (ऐ० आ० २।१।२)

यः कृपणतया वित्तादिकं न स्वयं भुङ्क्ते न चान्येभ्यो ददाति स वस्तुतस्तस्य वित्तादेर्न स्वामी भवतीति भावः। तथा चाहुः—

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

पराग्वा एतद्रिक्तमक्षरं यदेतदो३मिति। तद् यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते। स यत्सर्वमों कुर्याद्रिञ्च्यादात्मानं स कामेभ्यो नालं स्यात्। अथैतत्पूर्णमभ्यात्मं यन्नेति। स यत्सर्वं ७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत, सैनं तत्रैव हन्यात्। तस्मात्काल एव दद्यात् काले न दद्यात्, तत्सत्यानृते मिथुनीकरोति। तयोर्मिथुनात्प्रजायते भूयान्भवति। (ऐ० आ० २। ३। ६)

लोकव्यवहारदृष्ट्या केवलमोङ्कारं केवलं नकारं च श्रुतिरत्र निन्दति। पराग्बहिर्मुखम्। रिक्तं भोग्यशून्यम्। अस्मै। याचकादीन्प्रति 'ओम्' इत्येवं स्वकीयद्रव्यदानं स्वीकुर्वते पुरुषाय। रिच्यते रिक्तं भवति। रिञ्च्यादात्मानं रिक्तं सर्वधनशून्यं कुर्यात्। कामेभ्यो भोगेभ्यः। अभ्यात्मं पूर्णम्। आत्मानं धनस्वामिनमभिलक्ष्य धनसंप्राप्तिहेतुत्वात्पूर्णम्। सर्वम्। याच्यमानम्। काले दानयोग्यकाले दद्यात्। काले दानायोग्यकाले न दद्यात्। सत्यानृते मिथुनीकरोति। "ओ३मिति सत्यं नेत्यनृतम्" (ऐ० आ० २। ३। ६) इति श्रुतेरोङ्काररूपं सत्यं नकाररूपमनृतं च मिलित्वा युग्मं करोति। प्रजायते प्रकृष्टो भवति। भूयान् भवति। अधिकतरमुत्कर्षमवाप्नोति।

(५) मनुष्यजीवनस्यादर्शा उद्देश्यानि वा

कामं कामनाप्रधानो वै मनुष्यः। तत्तत्कामनया प्रेरितो हि स तत्तत्कार्ये प्रवर्तते। ततश्च "विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः" इत्येषा स्थितिस्तस्य प्रायेण दुर्लभैव। तत्र तासां कामनानामुदात्तभावनारूपेण परिवृत्तिरेव मनुष्यजीवनस्याभ्युन्नत्यै सरलः स्वाभाविकश्च मार्गो यत्र तत्र वैदिकवाङ्मये प्रदर्श्यते। उत्तरोत्तरं समुन्नतिरेव—

"उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥" (यजु० २०। २१)

इत्यादिश्रुतिषु मनुष्यजीवनस्य लक्ष्यत्वेन गीयते। अत्रारण्यकेऽपि वस्तुतः समुन्नतिकामेन मनुजेन किं किमभिलषणीयमिति मनुष्यस्वभावस्य वर्णनेन सहैव सम्यक् प्रतिपाद्यते। तथा हि—

अग्निरिवानाधृष्यः पृथिवीव सुषदा भूयासम्। अन्तरिक्षमिवानाप्यं द्यौरिवानाधृष्यो
८ भूयासम्। सूर्य इवाप्रतिधृष्यश्चन्द्रमा इव पुनर्भूर्भूयासम्। मन इवापूर्वं वायुरिव श्लोकभूर्भूयासम्। अहरिव स्वं रात्रिरिव प्रियो भूयासम्। गाव इव पुनर्भुवो मिथुनमिव मरीचयो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूयासम्। आप इव रस ओषधय इव रूपं भूयासम्। अन्नमिव विभु यज्ञ इव प्रभूर्भूयासम्। ब्रह्मेव लोके क्षत्रमिव श्रियां भूयासम्। (ऐ० आ० ५।१।१)

सुषदाः। शोभनं सदोऽवस्थानं यस्य सः। पुनर्भूः। शत्रुणा तिरस्कारेऽपि पुनरप्यूर्जितः। अपूर्वम्। उत्तरोत्तराभिवृद्ध्या नूतनम्। श्लोकभूर्भूयासम्। श्लोकः संघः। यथा वायुः स्वयमुत्पद्य उत्तरोत्तराभिवृद्ध्या संघरूपो भवति, एवमहमपि पुत्रपौत्रादिसंघ-रूपेणोत्पन्नो भूयासम्। स्वं धनम्। पुनर्भुवः। संवत्सरे संवत्सरे वत्सरूपेण पुनरुत्पत्तिमत्यः। मरीचयः। मरीचिमांस्तेजस्वी। रसो रसवान्। रूपं रमणीयरूपयुक्तः।

स एष पुरुषः समुद्रः, सर्वं लोकमति। यद्ध किंचाश्नुतेऽत्येनं मन्यते।
(ऐ० आ० २।३।२)

समुद्रः समुद्ररूपः। यथा नद्यादिजलैः समुद्रस्य पूर्णता न संपद्यते, तथैव कस्यापि भोग्यपदार्थस्य प्राप्त्या मनुष्यस्य तृप्तिरसंभवा। अति। अतिक्रम्य वर्तते। तदुच्यते "समुद्र इव हि कामः। नैव हि कामस्यान्तोऽस्ति न समुद्रस्य" इति। अश्नुते व्याप्नोति। भोग्यत्वेन प्राप्नोतीति वा। मन्यते कामयते।

यथाप्रज्ञं हि संभवाः। (ऐ० आ० २।३।२)

संभवा अनुभवाः। अत्र सृष्टौ प्राणभृतामनुभवास्तेषां प्रज्ञापरिपाकानुसारेणैव भवन्तीति भावः। अथवा संभवा जन्मानि। अत्रार्थे प्राणिनां जन्मपरम्परासु क्रमेण जायमान-प्रज्ञाविकासानुरूपमेव जन्मानि भवन्तीति भावो ग्रहीतव्यः।

शान्तिर्वै प्रतिष्ठा। (ऐ० आ० १।१।२)

शान्तिः। अनिष्टशान्तिः।

सर्वे वै कामा मधु। (ऐ० आ० १।१।३)

स्वभावतो मधुरूपाः, प्रिया इति भावः।

अन्तो वै महत्। (ऐ० आ० १।५।३)

अन्तः। अवसानभूमिः। नहि महत्त्वादूर्ध्वं किंचित्प्रार्थनीयं भवति।

अन्तो वै धिषणा (ऐ० आ० १।५।३)

धिषणा बुद्धिः। अन्तः पर्यवसानभूमिः। सर्वस्य व्यवहारस्य बुद्ध्यधीनत्वात्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्मात् (लोके) पुरुषः पुरुषमाह–वि वा अस्मासु राजसि ग्रीवा वै धारयसीति; स्तभमानं वा। (ऐ० आ० १ । ४ । १)

ग्रीवाः ग्रीवावयववान्। स्तभमानं प्रणिपातादिविनयरहितमुत्कन्धरं स्तब्धं पुरुषम्। तथा च 'वि वा अस्मासु राजसि ग्रीवा वै धारयसि' इत्येष प्रयोगः श्रुताध्ययनादिना विशिष्टं प्रति स्तुतिरूपः। अविनीतपुरुषं प्रति तु ग्रीवा वै धारयसीति प्रयोगस्तदौद्धत्यप्रकाशक एव।

अत्ता ह वा आद्यो भवति। (ऐ० आ० २ । १ । २)

यः स्वयमेव ऐश्वर्यादेरुपभोक्ता स एवान्यैरुपभोग्यो भवतीति भावः।

(६) राजनीतिः

ज्ञानकाण्डात्मके खल्वस्मिन्नारण्यके राजनीतिविषयस्यानवसर एव। प्रजानां सम्बन्धे राष्ट्रस्य किं कर्तव्यं भवेदित्यत्र विषये प्रसङ्गागतं वाक्यमेकमधो निर्दिश्यते—

पुष्टिर्वै विशः (ऐ० आ० १ । १ । १)

पुष्टिकामा वै प्रजा भवन्ति। तथा च तासां पुष्टिरेव राष्ट्रस्य प्रथमं कर्तव्यमिति भावः।

(७) यज्ञः

आरण्यकं हि प्राधान्येन ज्ञानकाण्डात्मकं भवति। तत्र यज्ञविषयः प्रायेण प्रासङ्गिक एव आगच्छति। अतोऽत्रापि यज्ञसम्बन्धे कतिचिदेव विचारा उपलभ्यन्ते। तद्यथा—

स एष वाचश्चित्तस्योत्तरोत्तरिक्रमो यद्यज्ञः। (ऐ० आ० २ । ३ । ३)

स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः। (ऐ० आ० २ । ३ । ३)

स एष यज्ञानां संपन्नतमो यत्सोमः। एतस्मिन् ह्येताः पञ्च विधा अधिगम्यन्ते। यत्प्राक्सवनेभ्यः सैका विधा, त्रीणि सवनानि, यदूर्ध्वं सा पञ्चमी। (ऐ० आ० २ । ३ । ३)

पञ्च विधाः पञ्चप्रकारकमनुष्ठानम्। यत्सवनेभ्यः प्राक्। दीक्षणीयादिकमित्यर्थः। यदूर्ध्वं सवनेभ्यः। अवभृथमारभ्योदवसानीयान्तं कर्मजातमित्यर्थः।

(सावशेषम्)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिधर्मवस्तुकथा

भदन्तशान्तिभिक्षुः

(पूर्वतोऽनुवृत्तम्)

(१२) तत्र स्थविरनयानुसारीणि अभिधर्मार्थसंग्रहे विवृतानि भवन्तीमान्यष्टाशीतिस्तत्त्वानि । तथाहि—

रूपं द्वादशविधम् =	पञ्च प्रसादरूपाणि चक्षुःश्रोत्रघ्राणजिह्वाकायाः । तथा सप्त विषयरूपाणि रूपं शब्दः गन्धः रसः स्प्रष्टव्यं त्रिभेदम् (तथाहि—पृथिवीधातुस्प्रष्टव्यम्, तेजोधातुस्प्रष्टव्यम्, वायुधातुस्प्रष्टव्यं च)। इत्याहत्य द्वादशविधं रूपम् ।
मनः सप्तविधम् =	चित्तं मनोविज्ञानं चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं च ।

धर्मधातुरेकोनसप्ततिविधः =	वेदनास्कन्धः	१
	संज्ञास्कन्धः	१
	चैतसिकधर्माः (वेदनासंज्ञावर्जिताः)	५०
	सूक्ष्मरूपाणि	१६
	निर्वाणम् (असंस्कृतम्)	१
		६९

११

२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं संहृत्य सर्वधर्मा अष्टाशीतिः। तेषु धर्मधात्वन्तर्गताश्चैतसिका उपरिष्टान्निरूपयिष्यन्ते। सूक्ष्मरूपाणां तु विभाग एषः—

अनिष्पन्नरूपं दशविधम् = परिच्छेदरूपम् (= आकाशः) १

विज्ञप्तिरूपं द्विविधम् { कायविज्ञप्तिरूपम्, वाग्विज्ञप्तिरूपं च } २

विकाररूपं त्रिविधम् { रूपस्य लघुता, रूपस्य मृदुता, रूपस्य कर्मण्यता च } ३

लक्षणरूपं चतुर्विधम् { उपचयः, सन्ततिः, जरा, अनित्यता च } ४

अनिष्पन्नेतररूपं षड्विधम् = भावरूपं द्विविधम् { स्त्रीत्वम्, पुरुषत्वं च } २

हृदयवस्त्वपरपर्यायं हृदयरूपमेकविधम् १

जीवितेन्द्रियापरपर्यायं जीवितरूपमेकविधम् १

आहाररूपमेकविधम् १

स्प्रष्टव्यातनसंगृहीत आपोधातुरेकविधः १

(१३) अथ सर्वास्तिवादिनां नयेऽभिधर्मकोशानुसारीणि पञ्चसप्ततिस्तत्त्वानि। तथाहि—

रूपं दशविधम् = पञ्च इन्द्रियाणि चक्षुःश्रोत्रघ्राणजिह्वाकायाः। तथा पञ्च अर्था रूपशब्दगन्धरसस्प्रष्टव्यानि। इति संहृत्य दश।

मन एकविधम्। षड्विज्ञानानि चित्तं चेहाभिसंक्षिप्यैकविधत्वमेव स्वीकृतम्। न तु स्थविराननुसृत्य सप्तविधत्वम्। उभयत्र न वस्तुकृतो भेदः, प्रत्युत उद्देशनिर्देशरूपनिरुक्तिकृतो भेदः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मधातुश्चतुःषष्टिविधः =	वेदनास्कन्धः	१ (एकविधः)
	संज्ञास्कन्धः	१ (एकविधः)
	चैतसिकाः (वेदनासंज्ञावर्जिताः)	४४ (चतुश्चत्वारिंशद्विधाः)
	चित्तविप्रयुक्ताः	१४ (चतुर्दशविधाः)
	अविज्ञप्तिरूपम्	१ (एकविधम्)
	असंस्कृतम्— आकाशम् १, प्रतिसंख्यानिरोधः १, अप्रतिसंख्यानिरोधः १	३ (त्रिविधम्)

इति संहृत्य धर्मधातुश्चतुःषष्टिविधः ।

धर्मधात्वन्तर्गतेषु पदार्थेषु चैतसिकानां निर्देश उपरिष्टाद् भविष्यति । चतुर्दशचित्तविप्रयुक्तानां तु विभाग एषः—१ प्राप्तिः । २ अप्राप्तिः । ३ सभागता (=साधर्म्यम्) । ४ आसंज्ञिकम् (=संज्ञाया निमित्तोद्ग्रहणप्रत्यक्षलक्षणाया अभावः) । ५ असंज्ञिसमापत्तिः (=संज्ञानिरोधलक्षणः समाधिविशेषः) । ६ निरोधसमापत्तिः (=सर्वविधमनोनिरोधलक्षणः समाधिः) । ७ जीवितेन्द्रियम् (=जीवनम् Life) । ८ जातिः (Origination) । ९ जरा । १० स्थितिः । ११ अनित्यता । १२ नामकायः (Words) । १३ पदकायः (Sentence) । १४ व्यञ्जनकायः (Letters) । अभिधर्मामृते सप्तदशधा चित्तविप्रयुक्तानां विभागो दृश्यते । तत्र अभिधर्मकोशे परिगणिता अप्राप्तिर्नाभिधर्मामृते दृश्यते । अभिधर्मामृते परिसंख्यातं पृथग्जनत्वमभिधर्मसमुच्चये परिगणितमप्यभिधर्मकोशे नाम्नातं विलोक्यते । प्राप्तिं परिसंख्यायापि तिस्रोऽन्याः प्राप्तीरभिधर्मामृतं संगृह्णाति । तथाहि—स्थानप्राप्तिः, वस्तुप्राप्तिः, आयतनप्राप्तिश्चेति । ता इमा अभिधर्मकोशाभिधर्मसमुच्चययोर्न दृश्यन्ते ।

(१४) अथ योगाचाराणां शतधा तत्त्वविभागः सर्वत्र प्रसिद्धोऽभिधर्मसमुच्चयेऽसङ्गकृतौ दृश्यते । तथाहि—

रूपं दशविधं तथैव यथा सर्वास्तिवादिनाम् ।
मनोऽष्टविधम् = आलयविज्ञानमेकविधम् ।
मन एकविधम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनोविज्ञानमेकविधम् ।

इन्द्रियविज्ञानं पञ्चविधम् । चक्षुर्विज्ञानं श्रोत्र० घ्राण० जिह्वा० कायविज्ञानं च ।

धर्मधातुर्द्व्यशीतिविधः =	धर्मायतनसंगृहीतं रूपम्	१	(एकम्)
	वेदनास्कन्धः	१	(एकः)
	संज्ञास्कन्धः	१	(एकः)
	चैतसिकाः (वेदनासंज्ञावर्जिताः)	४९	(एकोनपञ्चाशत्)
	चित्तविप्रयुक्ताः संस्काराः	२४	(चतुर्विंशतिः)
	असंस्कृतधर्माः	६	(षट्)

इति संहृत्य धर्मधातुर्द्व्यशीतिविधः ।

ये चैतसिकाः सर्वास्तिवादिनां[1] ते सर्वे योगाचाराणामपि । अमोहः, दृष्टिः, मुषित-

---

१ अभिधर्मकोशे [२।२४–३३] चैत्तनिर्देशः कृत इह संक्षिप्यानूद्यते—

१० सर्वत्रगाः—वेदना[1] चेतना[2] संज्ञा[3] छन्दः[4] स्पर्शो[5] मतिः[6] स्मृतिः[7] ।
मनस्कारो[8] ऽधिमोक्षश्च[9] समाधिः[10] सर्वचेतसि ॥ [२।२४]

१० कुशलाः—श्रद्धा[11] ऽप्रमादः[12] प्रश्रब्धिर्[13] उपेक्षा[14] ह्रीर्[15] अपत्रपा[16] ।
मूलद्वयम्[17-18] अहिंसा[19] च वीर्यं[20] च कुशले सदा ॥ [२।२५]

६ क्लिष्टाः—मोहः[21] प्रमादः[22] कौसीद्यम्[23] अश्राद्ध्यं[24] स्त्यानम्[25] उद्धवः[26] । क्लिष्टे [२।२६a-c]

२ अकुशलौ—'''''''सदैवाकुशले त्वाह्रीक्यम्[27] अनपत्रपा[28] । [२।२६ c-d]

१० परीत्ताः—क्रोधो[29]–पनाह[30]–शाठ्य[31]–ेर्ष्या[32]–प्रदाश[33]–म्रक्ष[34]–मत्सराः[35] ।
माया[36]—मद[37]—विहिंसाश्च[38] परीत्तक्लेशभूमिकाः ॥ [२।२७]

८ शिष्टाः (नोक्तवर्गीकृतगणेष्वन्तर्भूताः)—वितर्कः[39] विचारः[40] रागः[41] प्रतिघः[42] कौकृत्यं[43]
मिद्धं[44] मानः[45] विचिकित्सा[46] च । [२।२८-३३] इति सर्वे वेदनासंज्ञासहिताः षट्चत्वारिंशत् । वेदनासंज्ञारहितास्तु चतुश्चत्वारिंशत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्मृतिता, असंप्रजन्यम्, विक्षेपश्चेति पञ्च सर्वास्तिवादिभिरपरिगणिता अपि तेषामभिमताः। ये चित्तविप्रयुक्ताः संस्काराः सर्वास्तिवादाभिमतेऽभिधर्मकोशे ख्यातास्ते सर्वे अप्राप्तिवर्ज्या योगाचाराणामपि संमताः। अधिका अपि तत्रैकादशाम्नायन्ते। तथाहि—पृथग्जनत्वम्, प्रवृत्तिः, प्रतिनियमः, योगः, जवः, अनुक्रमः, कालः, देशः, संख्या, सामग्री, भेदश्च। असंस्कृतधर्मेषु आनिंज्यसंज्ञावेदयितनिरोधतथताख्यान् त्रीनतिरिक्तधर्मानपि योगाचाराः समामनन्ति येऽभिधर्मकोशे न दृश्यन्ते। अभिधर्मसमुच्चये तथतायाः पञ्चधा विभागो दृश्यते। दृष्टिरपि तथैव पञ्चधैव प्रविभक्ता समुपलभ्यते। एतान् भेदाननभिसंक्षिप्य परिगणने त एते धर्मा शततोऽप्यधिकाः सन्ति। "भेदः" इत्यस्य परिसंख्यानं नाभिधर्मसमुच्चये दृश्यते। तथाभिधर्मसमुच्चयाख्याता धर्माः सर्वे ऊनशतमेव भवन्ति।

(१५) स्थविराः सूक्ष्मरूपे जातिं जराम् अनित्यतां जीवितेन्द्रियं च संगृह्णन्ति। परमेतेषां संग्रहः सर्वास्तिवादिनां योगाचाराणां च नये चित्तविप्रयुक्तेषु संस्कारेषु भवति। रूपस्कन्धात् संस्कारस्कन्धः सूक्ष्मतरः। तस्मादेष परिगणनविवेकः क्रमशः स्थूलतां विहाय सूक्ष्मताभिमुखो भवन् दृश्यते। अस्य स्थूलसूक्ष्मन्यायपरिपाकस्य न केवलमेतदेव निदर्शनम्। प्रत्युतान्यान्यपि सन्ति निदर्शनानि। तथाहि—स्थविराणां नयेन आकाशं परिच्छेदरूपलक्षणं रूपस्कन्धान्तर्गततया भवति संस्कृतधर्मः। परं सर्वास्तिवादिनां योगाचाराणां च नयेन आकाशं भवति असंस्कृतधर्मः। असंस्कृतधर्मत्वात् तस्य रूपस्कन्धान्तर्भावस्तु संभवत्येव न। तथा च स्थविराणां नये नहि निरोधलक्षणान्निर्वाणात् परमस्ति किमप्यन्यदसंस्कृतम्। परं सर्वास्तिवादिनां योगाचाराणां च नये तद्व्यतिरिक्तमाकाशमपि भवत्यन्यदसंस्कृतं धर्मः। एवं स्थविरेभ्यः सर्वास्तिवादिनः सूक्ष्मतरविवेचने क्रमप्युत्कर्षमधिरोहन्तीति स्पष्टं प्रतिभाति। सर्वास्तिवादिभ्योऽपि सूक्ष्मतानुधाविनः सन्ति योगाचाराः। तथा च आनिंज्यसंज्ञावेदयितनिरोधतथताख्यानां धर्माणां संस्कृतेतरधर्मेषु परिसंख्यानात् प्रतीयते। एवं सर्वोऽपि पदार्थानां परिगणनवर्गीकरणप्रयासः क्रमिकविकासपद्धतिं प्रतीत्य प्रवृत्त इति स्पष्टीभवति।

(१६) चैतसिकधर्माणां विवेकोऽभिधर्मार्थसंग्रहेऽभिधर्मकोशेऽभिधर्मामृतेऽभिधर्मसमुच्चये च नैकरूपेण कृतो दृश्यते। तथाहि—संग्रहे चैतसिका द्वापञ्चाशत्, कोशे षट्चत्वारिंशत्, अमृते चत्वारिंशत्, समुच्चये एकपञ्चाशद् वर्तन्ते। तत्र चतुर्विंशतिः पञ्चविंशतिर्वा १५
चैतसिकाः सर्वत्र परिसंख्याता दृष्टाः। ते चैते—चेतना, छन्दः, मनस्कारः, वेदना, संज्ञा,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समाधिः, स्पर्शः, स्मृतिः, अधिमोक्षः, प्रज्ञा (मतिः), अलोभः, अद्वेषः, अपत्रपा, उपेक्षा, प्रश्रब्धिः, वीर्यम्, श्रद्धा, ह्रीः, ईर्ष्या, औद्धत्यम्, कौकृत्यम् (=पश्चात्तापः), मोहः, मात्सर्यम् (='कंजूसी' इति भाषा), मानः। त इमे सर्वे चतुर्विंशतिः। स्थविराणां नये कायप्रश्रब्धिः (=चैतसिकधर्मप्रश्रब्धिः) चित्तप्रश्रब्धिश्चेति प्रश्रब्धिर्द्विरूपा भवति। द्वयो रूपयोः पृथक्परिगणने त इमे चैतसिकाः पञ्चविंशतिर्भवेयुः। एतेषु कौकृत्यमेकं नामृते दृश्यते।

केचन धर्माः केवले संग्रहे दृश्यन्ते। ते चैते—प्रीतिः, विरतित्रयम् (=सम्यग्वाक् मिथ्यावाग्विरतिलक्षणा, सम्यक्कर्मान्तः मिथ्याकर्मान्तविरतिलक्षणः, सम्यगाजीवः मिथ्याजीवविरतिलक्षणः), अप्रमाणद्वयम् (=करुणा, मुदिता), लोभः, ऋजुकताद्वयम् (=कायऋजुकता, चित्तऋजुकता), कर्मण्यताद्वयम् (=कायकर्मण्यता, चित्तकर्मण्यता), प्रागुण्यताद्वयम् (=कायप्रागुण्यता, चित्तप्रागुण्यता), मृदुताद्वयम् (=कायमृदुता, चित्तमृदुता) लघुताद्वयम् (=कायलघुता, चित्तलघुता)। इह सर्वत्र कायपदं चैतसिकधर्मपरं न तु भौतिकशरीरपरम्।

असंप्रजन्यम् अमोहश्चेति द्वौ धर्मौ केवलं समुच्चये समाम्नातौ कोशसंग्रहामृतेषु त्रिष्वपि न दृश्येते। महामानः, मिथ्याधिमुक्तिः, मिथ्यामनस्कारः, मिथ्यासंस्कारः (=मिथ्याकृत्यम्), मोहाद् भिन्ना अविद्या चेति पञ्च धर्माः संग्रहकोशसमुच्चयेष्वप्रतिसंख्याताः केवलम् अमृते दृश्यन्ते। अप्रमादः, अविहिंसा, अश्राद्धयम्, उपनाहः, कौसीद्यम्, प्रदाशः, माया, म्रक्षः, शाठ्यं चेति दश धर्मा अमृतकोशसमुच्चयेषूपलभ्यमाना न संग्रहे दृश्यन्ते। मुषितस्मृतिता विक्षेपश्चेति द्वौ धर्मौ अमृते समुच्चये चोक्तौ न च संग्रहे दृश्येते नापि च कोशे। संग्रहसमुच्चययोरुपलभ्यमाना दृष्टिर्न कोशे नापि चामृते परिसंख्याता दृश्यते। विहिंसा, मदः, रागः, प्रमादश्चेति चत्वारो धर्माः कोशसमुच्चययोः परिगणिता नामृते न च संग्रहे दृश्यन्ते। अनपत्रपा, आह्रीक्यम्, विचारः, वितर्कः, विचिकित्सा, स्त्यानम्, मिद्धं चेति सप्त धर्मा नामृते समाम्नाताः। तेऽन्यत्र कोशसंग्रहसमुच्चयेषु दृश्यन्ते।

(१७) चैतसिकानां तदेतत्परिसंख्यानं स्वकीयनैकरूपतामुखेन स्वस्योपलक्षणमात्रतां समभिव्यनक्ति। एवं ये धर्मा यैश्चैतसिकप्रसङ्गे नाम्नातास्तेषां नायमभिप्रायो यत्ते धर्माश्चैत-
१६ सिकप्रसङ्गे नाम्नातव्याः। तथाहि—अमृते चैतसिकेष्वसंगृहीता दृष्टिः संयोजनेषु संगृह्यते। चित्तसंप्रयुक्तत्वात् तस्याश्चैतसिकत्वं भवत्येव। चैतसिकप्रसङ्गे तेन तस्या अपरिगणनं चैतसिकधर्म-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिगणनाया उपलक्षणत्वं द्योतयति। चैतसिकेषु कुशलाकुशलधर्मानभिसंक्षिप्य निर्देशः क्रियते चेत् षडेव धर्माः शिष्यन्ते। तथाहि—अलोभः, अद्वेषः, अमोहश्चेति त्रयः कुशलाः। लोभः, द्वेषः, मोहश्चेति त्रयोऽकुशलाः। एतेष्वमोहः कण्ठतः केवलं समुच्चये पठितः। संग्रहे तु प्रज्ञेन्द्रियाद् अमोहं नातिरिक्तं मत्वा न स पठितः। [पञ्ञिन्द्रियं ति अमोहो येव—अभिधम्मत्थसंगह २।७ टीका]। कोशामृतयोस्तु प्रज्ञा परिसंख्यायते नामोहस्तेन तयोर्नयेऽपि प्रज्ञायाममोहे च नास्त्येव भेदः। यथा समुच्चये अमोहः प्रज्ञातो भिन्नः परिसंख्यातस्तथैवामृते अविद्या मोहाद् भिन्ना परिसंख्याता। कोशसंग्रहसमुच्चयेषु तु तयोरभेदं मत्वा न पार्थक्येन निर्देशः कृत इति प्रतिभाति। अमृतानुसारं मोहो नाम वस्तुष्वनवबोधः [६।१५] अविद्या नाम त्रैधातुकमज्ञानम् [६।१६]। प्रतिघापरपर्यायो द्वेषः सर्वत्र संगृहीतो दृश्यते। तस्यैव स्वरूपविशेषः क्रोधः संग्रहेऽमृते च नाम्नायते। मन्ये द्वेषादबहिर्भूतं मत्वा स परिहृतः। रागः कोशसमुच्चययोः परिगणितो नामृतसंग्रहयोर्गण्यते। संग्रहे रागो न लोभाद् बहिर्भूत इति मत्वा केवलं लोभ एव गणितो न रागः। अमृते तु यथा रागो न गणितस्तथा लोभोऽपि न गणितः, यद्यपि कुशलधर्मेष्वलोभोऽमृते संगृहीतः। तेनाकुशलधर्मेषु लोभस्य संग्रहो न्याय्य एव। तथापि स न कृतो दृश्यते। कदाचिद् विपर्यासमूलकौ रागालोभाविति मत्वा विपर्यासापरित्यागलक्षणां मिथ्याधिमुक्तिं पठित्वा तयोरेतयैव गतार्थता भविष्यतीति तौ न संगृहीतौ। एवं चैतसिकप्रसङ्गे मिथ्यामनस्कारं परिगृह्य मन्ये दृष्टिरुपेक्षिता। न दृष्टिमिथ्यामनस्कारयोरस्ति बहुतरो भेदः। तथैव मिथ्यासंस्कारं (मिथ्याकृत्यं) संगृह्य कौकृत्यप्रमादौ समुपेक्षितौ, मिथ्यासंस्कारेण तयोः संग्राहकत्वात्। एतेन स्फुटं प्रतीयते यत् सर्वमिदं चैतसिकधर्मपरिगणनं केवलं भवत्युपलक्षणमात्रम्।

(१८) यथा चैतसिकधर्मनिरूपणे आभिधार्मिकैरुपलक्षणविधिः समाश्रितो न तथा चित्तनिरूपणे। चित्तनिरूपणं तैर्बहुलायासेन सुसंबद्धं कृतम्। तत्र षड्विज्ञानानि सर्वाभिमतानि। तदतिरिक्तविज्ञानभेदेषु तु विमतिर्भवत्येव। चित्तम्, मनः, विज्ञानमिति पर्यायाः। तत्र स्थविराणां नये चित्तस्य प्रधानभेदाश्चत्वारः। तथाहि—

(१) प्रतिसन्धिचित्तम्। इदमस्य सांसारिकस्य जीवनस्य प्रारम्भकं चित्तम्।

(२) भवाङ्गचित्तम्। इदमेकस्मिन् भवे एकस्यां कायसन्ततौ नदीप्रवाहवद् यावदायुरविच्छेदेन प्रवर्तमानं चित्तम्। १७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(३) वीथीचित्तम् । इदं हि सव्यापारं सक्रियं सवेगं भवाङ्गचित्तमेव । भवाङ्गचित्तं निमित्तवशाद् वीथीचित्तरूपेण परिणमते । निमित्तापाये च पुनरपि भवाङ्गतामापद्यते । यथा समुद्रे शान्ते वातवशात् संक्षोभः । वातनिमित्तापाये पुनरपि शान्तभावः ।

(४) च्युतिचित्तम् । इदमस्य सांसारिकस्य जीवनस्य चरमं चित्तम् । बाह्याभ्यन्तरविषयनिमित्तवशाद् भवाङ्गचित्तं विकृतं भवद् वीथीचित्तं जायते । एतेषां विषयजातानां प्रदर्शनार्थं भवतीदं चित्रम्—



इन्द्रियविषयाः कथं मनस्यासा भवन्तीति बोधयितुमाम्रोपमादृष्टान्तः प्रसिद्ध इहानूद्यते । कश्चित् पुरुष आम्रवृक्षमूले भवति प्रसुप्तः । पतति च तत्राम्रफलम् । स जागर्ति । निद्राभङ्गनिमित्तं च गवेषयति । गवेषयन्नाम्रं पश्यति । गृह्णाति च तत् । पुनर्घ्रात्वा परीक्षते । परीक्षणेन तत् पक्वमिति निश्चित्य तदभ्यवहरति । पुरुषस्य प्रसुप्तितुल्यं भवति भवाङ्गचित्तम् । निद्राभङ्गतुल्यं भवति पञ्चद्वारावर्जनचित्तम् । पञ्चभिरिन्द्रियैर्विषयग्रहणोन्मुखतालक्षणं चित्तं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नाम पञ्चद्वारावर्जनचित्तम्। पञ्चद्वाराणां चक्षुरादीनां तत्रावर्जितत्वाद् विषयोन्मुखत्वात्। आम्रावलोकनतुल्यं भवति इन्द्रियविज्ञानम्। तदिदं पञ्चविधम्। तथाहि—चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं चेति। आम्रग्रहणतुल्यं भवति संप्रतीच्छनचित्तम्। इदं हि चित्तं भवतीन्द्रियविज्ञानग्रहणलक्षणम्। घ्रात्वा परीक्षणतुल्यं भवति संतीरणचित्तम्। तदिदं गृहीतमिन्द्रियविज्ञानं विविनक्ति। आम्रस्य पक्वभावविनिश्चयतुल्यं भवति व्यवस्थापनचित्तम्। यद् विविच्यमानं गृहीतेन्द्रियविज्ञानं तत्तदाकारेण व्यवस्थापयति। आम्राभ्यवहरणतुल्यं भवति जवनचित्तं यद् व्यवस्थापिते विज्ञाने स्वसंबन्धं रागद्वेषात्मकं कुर्वत् तत्र रक्तं वा द्विष्टं तिष्ठति। तदेतज्जवनचित्तं कुशलाकुशलाव्याकृतभेदेन त्रिधा प्रविभक्तं भवति। वीथीचित्तेषु सर्वाधिकजव (= वेग) शालित्वं नामास्य जवनत्वम्। तानीमानि पञ्चद्वारावर्जनं पञ्चेन्द्रियविज्ञानं संप्रतीच्छनं संतीरणं व्यवस्थापनं जवनं चेति षड् वीथीचित्तानि इन्द्रियद्वारके विषये सति यथासंभवं भवन्ति। मनोद्वारके विषये समुपस्थिते तु मनोद्वारावर्जनचित्तानन्तरमेव जवनचित्तं प्रवर्तते। अस्य कुशलाकुशलाव्याकृतस्वरूपस्य जवनचित्तस्य विपाकभूतचित्तं तदालम्बनं नामोच्यते। इदं हि कामधातुगतविषयाभासं मनस्यङ्कयति। ततः परं भवाङ्गपातो भवति। वीथीचित्तं निवर्तते। ध्यानविषयोऽपि मनोद्वारक एव मनस्यासो भवति। ततो मनोद्वारावर्जनचित्तानन्तरं ध्यानवीथ्यामपि जवनचित्तप्रवृत्तिर्भवति। परमिदं जवनचित्तं नित्यं कुशलात्मकमेव भवति। यथा कामविषये चित्तासङ्गो भवति न तथा ध्यानविषये, तेन जवनानन्तरं तदालम्बनचित्तप्रवृत्तिं विनैव भवाङ्गपातो भवति। ध्यानचित्तवीथी निवर्तते। स्थविराणां भवाङ्गचित्तमिदं योगाचाराणामालयविज्ञानेन सह प्रायशः साम्यं भजते। सेयं बहुधा विभज्यमाना चित्तसन्ततिरव्यवच्छिन्नं प्रवर्तमाना संसारः। अच्युतं पदं निर्वाणमधिगम्य निवर्तमाना तु शाम्यति।

तथा चोक्तम्—

पटिसन्धिभवंगवीथियो चुति चेह तथा भवंतरे।
पुन सन्धिभवंगमिच्चयं परिवत्तति चित्तसंतति॥
पटिसंखाय पनेतमद्धुवं अधिगन्त्वा पदमच्चुतं बुधा।
सुसमुच्छिन्नसिनेहबन्धना सममेस्सन्ति चिराय सुब्बता॥

[अभिधम्मत्थसंगह ५।४१]

३ १९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पदमच्चुतमचन्तं असङ्खतमनुत्तरं ।
निब्बानमिति भासन्ति वानमुत्ता मेहेसयो ॥ [तत्रैव ६।३१] इति ।।[1]

तदिदं निर्वाणपदं योगाचारैर्बहुभिर्निरुक्तिभिः स्तूयते । तथाहि—

अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत् ।
आश्रयस्य परा वृत्तिर्द्विधा दौष्ठुल्यहानितः ॥
स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः ।
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः ॥ [त्रिंशिका २६-३०] इति ।

निर्वाणं भवत्यचित्तम्, ग्राहकचित्ताभावात् । निर्वाणं भवत्यनुपलम्भम्, ग्राह्यविषयाभावात् । निर्वाणं भवति लोकोत्तरज्ञानम्, विकल्पाभावात् । निर्वाणं भवति आश्रयपरावृत्तिः, आश्रयस्य आलयविज्ञानस्य प्रवृत्त्यभावात् । आलयविज्ञानस्य सोऽयं निवृत्तिलक्षणः प्रवृत्त्यभावः कर्मण्यतास्वरूपः । तत्त्वविदां दृष्ट्या कर्मण्यता सैव भवति या न बध्नाति । बन्धनहेतुस्तु अकर्मण्यतैव भवति या दौष्ठुल्यमित्युच्यते । तदेतद्दौष्ठुल्यं द्विविधं भवति—क्लेशावरणबीजं ज्ञेयावरणबीजं चेति । निर्वाणं भवत्यनास्रवधातुः । आस्रवो नाम दौष्ठुल्यापरपर्याया अकर्मण्यता, तस्यास्तत्राभावात् । निर्वाणं भवत्यचिन्त्यं तर्कदृष्टान्तोपमानिदर्शनादिविरहेण प्रत्यात्मवेद्यत्वात् । निर्वाणं भवति कुशलं विशुद्धत्वात् । निर्वाणं भवति ध्रुवं नित्यत्वात् । निर्वाणं भवति सुखं नित्यत्वादेव । ["यदनित्यं तद्दुःखम् । अयं च नित्यः, अस्मात् सुखः"—इति स्थिरमतिभाष्यम्] । निर्वाणं भवति विमुक्तिकायः क्लेशबन्धप्रहाणात् । निर्वाणं भवति धर्मकायो भगवतः । न ह्ययं संसारवत् कदाचिदपि भवत्यधृतिलक्षणः, भङ्गलक्षणः, च्युति-

---

१ एतासां गाथानां छाया—

प्रतिसन्धिभवाङ्गवीथयश्च्युतिश्चेह तथा भवान्तरे ।
पुनःसन्धिर्भवाङ्गम्—इतीयं परिवर्तते चित्तसन्ततिः ॥
प्रतिसंख्याय पुनरेतदध्रुवं अधिगम्य पदमच्युतं बुधाः ।
सुसमुच्छिन्नस्नेहबन्धनाः शममेष्यन्ति चिराय सुव्रताः ॥
पदमच्युतमत्यन्तमसंस्कृतमनुत्तरम् ।
निर्वाणमिति भाषन्ते वान (=तृष्णा) मुक्ता महर्षयः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लक्षणः,क्षयलक्षणः; प्रत्युत सदैव भवति धृतिलक्षणः, स्थितिलक्षणः, अच्युतिलक्षणः, अक्षयलक्षणः। तत एवोच्यते धर्मकायः। ["संसारपरित्यागाद् यदनुपसंक्लेशत्वात् सर्वविभुत्वलाभतश्च धर्मकाय इत्युच्यते"—इति स्थिरमतिभाष्यम्]।

(१९) मनःक्लान्तिजनकस्य सर्वस्यास्य धर्मविश्लेषणस्य प्रयोजनमेतदेवास्ति यत्साधकः सर्वविधानर्थहेतोरहंममभावस्य आत्मात्मीयभावस्य सत्कायदृष्टिवादादात्मानं प्रमोच्य जानीयादेतद्यद् योऽयं प्रसिद्ध्यति जीवः पुद्गलः पोषः पुरुष आत्मा कश्चिदेको नित्यधर्मः स वस्तुतो नैको धर्मो नापि च स नित्यः प्रत्युत सोऽस्ति सांवृतो व्यवहारसिद्धः कश्चिदर्थः। वस्तुतः परमार्थतः सोऽस्ति धर्माणां राशिः। एतादृशे संसारिणि अव्यवच्छिन्नं संसरति दुःखात्मके धर्माणां राशौ नित्यदृष्टिरात्मदृष्टिर्मिथ्यैव। तथा चाह भगवान्—

पुत्ता मत्थि धनं मत्थि इति बालो विहञ्ञति।
अत्ता हि अत्तनो नत्थि कुत्तो पुत्ता कुत्तो धनं॥ [धम्मपद ६२]

(२०) एवं साधनामार्गे धर्माणां विवेकाय प्रवृत्तस्य शास्त्रस्यास्याभिधर्माख्यस्य अहंताममतालक्षणायाः सत्कायदृष्टेर्विशोधकत्वान्महदर्थसंपादकता स्पष्टीभवति। सत्कायदृष्टिर्नामात्माग्रहः। स च बहुविधदोषजनकः। तथा चोक्तम्—

आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ।
अनयोः संप्रतिबद्धाः दोषाः सर्वे प्रजायन्ते॥

एतैर्दोषैः संप्रचोदित एव जनः सर्वविधमकुशलमपुण्यं कर्म कुर्वन् दृश्यते। स न केवलं परहितात्प्रमाद्यति प्रत्युत स्वहितादपि भ्रश्यति। एतद्दोषजातविशोधने धर्मविवेको महत्साहाय्यमाचरति। तस्मात्साधनामार्गपरिष्करणोपायभूतत्वात् परमहितोऽयमभिधर्मः।

(२१) तमिममभिधर्ममधिकृत्य प्रोक्ताः सन्ति बहवः सूत्रान्तास्तत्र तत्र सूत्रपिटके विप्रकीर्णाः। सम्पूर्णोऽभिधर्मपिटकस्तु धर्मविवेकधुरं वहत्येव। तदाश्रयेण प्रवृत्ता बहुविधा बौद्धा-

१ पुत्रा मेऽस्ति (अस्तीति निपातोऽत्र ज्ञेयः) धनं मेऽस्ति इति बालो विहन्यते।
आत्मा हि आत्मनो नास्ति कुतः पुत्राः कुतो धनम्॥ इति छाया।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च्चार्याणामस्त्येव ग्रन्थसन्ततिः। परं खेदोऽयमेव यद्विशालतरा सेयं ग्रन्थसंपत् चीनभोटभाषान्तरे वर्तते, मूले तु कालविप्लवाद् विनष्टा। साम्प्रतं पालिभाषायामभिधर्मपिटकं पिटकेतराभिधर्मग्रन्थांश्च विहाय संस्कृते सन्ति केचन ग्रन्थाः। तथाहि—

(१) अभिधर्मकोशकारिका[1]
(२) अभिधर्मसमुच्चयः[2]
(३) अभिधर्मकोशभाष्यम्[3]
त्रयोऽप्येते ग्रन्थाः (छायाचित्रमयाः) राहुलसांकृत्यायनेन भोटदेशादानीताः पाटलिपुत्रे बिहारशोधसंस्थाने सुरक्षिताः।
(४) स्फुटार्थाभिधर्मकोशव्याख्या[4]।

(२१) त एते ग्रन्था यद्यपि नाङ्गुलिगण्या अपि तथापि भवन्त्यभिधर्मस्य प्रधानग्रन्थाः। विषयप्रतिपादनस्य परिपूर्णतायां सबला अप्येते शास्त्रे प्रविविक्षूणां कृते नारम्भ एव पठनार्हाः। इमां न्यूनतां परिपूरयितुं भदन्तघोषकस्याभिधर्मामृतशास्त्रं प्रतिबलं दृश्यते। तदेतच्चीनभाषानुवादे लब्धं मया संस्कृते पुनरनूदितम्।

(२३) अस्याभिधर्मामृतशास्त्रस्यायमस्ति विषयविभागः—

(१) दानं शीलं च। [कोश ४।१३–३४, ११३–११७]

(२) लोकधातुर्गतयश्च। [कोश ३।१–३, ४५–४८]

(३) स्थितिः, आहारः, भवः। [कोश ३।७, ३८–४१, १०।१३, ३७–३८]

(४) कर्म। [कोशे चतुर्थः परिच्छेदः]

---

१ रोमनाक्षरे वी.वी.गोखलेमहोदयेन संस्कृता The Journal of the Bombay Branch, Royal Asiatic Society, N. S., Vol. 22, 1947 इत्यत्र प्रकाशिता।

२ पूर्वोक्ते पत्रे (Vol. 23. 1947) पूर्वोक्तविदुषा संपाद्य प्रकाशितः। ग्रन्थोऽयं खण्डित एवोपलब्धः। अस्य खण्डितांशपूरणेन पुस्तकाकारप्रकाशनं विश्वभारत्या कृतम्। संपादकश्चास्य श्रीप्रह्लादप्रधानोऽत्रत्याध्यापकः।

३ अयं श्रीप्रह्लादप्रधानेन संपाद्यमानरूपः।

४ इयं जापानदेशाद् वोगीहारामहाभागेन संपाद्य प्रकाशिता।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५) स्कन्धाः, धातवः, आयतनानि । [कोश १।७–१८, २८–४८]

(६) संस्काराः । [कोश २।२३–४८]

(७) प्रतीत्यसमुत्पादः । [कोश ३।२०–२६]

(८) परिशुद्धेन्द्रियाणि । [कोश २।१–२१]

(९) संयोजनम् । [कोशे पञ्चमः परिच्छेदः]

(१०) आर्यपुद्गलाः । [कोश ६।१–७६]

(११) ज्ञानम् । [कोशे सप्तमः परिच्छेदः]

(१२) ध्यानम् । } [कोशेऽष्टमः परिच्छेदः]

(१३) संकीर्णध्यानम् । }

(१४) बोधिपाक्षिका धर्माः । [कोश ६।६७–७६]

(१५) आर्यसत्यानि । [कोश ६।२,१७,२७]

(१६) प्रकीर्णकम् (मिश्रकम्) । [कोश ५।६, ७।२, ३५–४८][1]

(२४) तदिदमभिधर्मामृतं येन पुण्ययशसा चीनभाषायामनूदितं तस्य नामापि ग्रन्थसंगृहीतृभिः पुरा विस्मृतम् । तेन नाम्ना तं स्मर्तुं नैवास्ति कोऽप्युपायः । तस्य कृतिमेव तेन साम्प्रतं स्मरामः । शैल्यां शब्दयोजनायां लालित्ये च कुमारजीव–श्वान्-च्वाङ्कृत्या यद्यपि नेयं प्रतिस्पर्द्धितुं शक्नोति तथापि पुराणाचार्यस्य महायशसो भदन्तघोषकस्य यशोऽनयैव साम्प्रतं रक्षितुं शक्यत इत्यस्या माहात्म्यं स्वीकरणीयमेव । अस्यां रूक्षोऽपि धर्मविवेकलक्षणोऽभिधर्मः सरसः प्रतीयते । तस्मादन्वर्थमेवास्ति अस्या नाम अभिधर्मामृतमिति । अभिधर्मामृतमपहाय भदन्तघोषकस्य ज्ञानोत्पादनशास्त्रं विभाषायामुद्धृतमपि साम्प्रतं ग्रन्थाकारेण विलुप्तमेव ।

---

१ अभिधर्मकोशस्य ग्रन्थनिर्देशः प्राधान्येन । तेन सन्ति बहूनि न निर्दिष्टानि गौणानि स्थलानि यत्र ते ते विषयाः प्रतिपादिताः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२५) अभिधर्मामृतवदेव सन्ति बहवोऽभिधर्मग्रन्थाः स्वोद्धारकालं प्रतीक्षमाणाः। तेषु सन्ति केचनाकरग्रन्था दार्शनिकतत्त्ववादाध्ययनाय सहायभूताः। येष्वनधीतेषु भारतीय दर्शनविकासचरित्रं न साकल्येन ज्ञातुं शक्यते। तत्र सर्वास्तिवादिनां ज्ञानप्रस्थानम् (साम्प्रतं मयानूद्यमानम्), तस्य टीका महाविभाषा, सौत्रान्तिकानां शर्ववर्मप्रणीता सत्यसिद्धिः (विश्वभारतीयेन आर्यस्वामिना संपाद्यमाना), माध्यमिकानां महाप्रज्ञापारमिताशास्त्रम्, योगाचाराणां च योगभूमिः (भोटदेशाद् राहुलसांकृत्यायनेनानीता श्रीविधुशेखरभट्टाचार्येण संपाद्यमाना) इत्येते ग्रन्थाः सन्ति परमप्रधानाः। एतेषु योगभूमिं विहायान्ये चीनभाषान्तरतो भवन्ति समनूद्याः। सफलीभूते चैतस्मिन् यत्ने बौद्धदर्शनं साङ्गोपाङ्गं समुपस्थापयितुं शक्यते। बौद्धेतरदर्शनानामपि चारित्रिकविमर्शो भविष्यति नूत्नप्रकाशेन प्रकाशित इति दिक् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परमाणुस्वरूपविमर्शः

श्रीकेशवद्विवेदी

आरम्भवादस्य च मूलभूतं न मूलभूतं खलु यस्य किंचित् ।
अणोरणीयांसमहं तमाश्रये न चाश्रयः स्यामणुसंशयस्य ॥

परमाणुसिद्धिः

परमाणवस्तावदभ्युपगम्यन्ते नैयायिकैर्वैशेषिकैश्च । किन्तु ते चाप्रत्यक्षाः, अतो विप्रतिपत्तिविषयीभूताः प्रत्यक्षैरवयविभिस्तर्कसहकारेणानुमीयन्त इत्यतस्तर्कप्रदर्शनपुरस्सरं तत्सिद्धिरारभ्यते ।

अवयविनो मेरुसर्षपादेरवयवधारायाः क्वचिदवधिर्न स्यात्तर्हि मेरुसर्षपयोरपि साम्यप्रसङ्गः स्यात् । न च मेरुसर्षपयोः सामान्यतः साम्यमापाद्यते चेदसङ्गतम्, वैषम्यानुभवेन सर्षपराजमाषयोरपि सामान्यतः साम्यासम्भवेन मेरुसर्षपयोः साम्यस्य च दूरनिरस्तत्वात् । न चानन्तावयवत्वेन साम्यापादनमपि तावदनिष्टकरम्, यावद्दोषादर्शनमनन्तावयवत्वेन साम्यस्यापीष्टत्वात् । न चानवस्थादोषः, बीजाङ्कुरानवस्थावदस्या अनवस्थाया अप्यदोषत्वात् । यदपि चावयवधारायाः क्वचिदविश्रान्तौ परिमाणभेदकावयवसंख्याया अभावेन सर्षपराजमाषयोर्मेरुसर्षपयोर्वा परिमाणसाम्यप्रसङ्गोऽनन्तावयवारब्धत्वाविशेषादित्यापाद्यते; तदपि न युक्तम् । तथाहि—यावद् विभक्तुं द्रष्टुं च शक्यते तावद् विभागे यदि सर्षपस्य पञ्च भागा भवन्ति तदा राजमाषस्य विंशतिभागा भवन्ति । इत्थं च दृश्यमानपञ्चावयवारब्धत्वात्सर्षपमल्पपरिमाणं दृश्यमानविंशत्यवयवारब्धत्वात्ततो महत्परिमाणं राजमाषं निश्चिनुमः ।

सर्षपे पञ्चानां दृश्यमानावयवानामविश्रान्तावयवधारा राजमाषे च विंशतिदृश्यमानावयवानामविश्रान्तावयवधारा । तथा च तत एव तयोर्न्यूनाधिक्यनिश्चयसंभवे किमवधिकल्पनयेति चेदत्रोच्यते; अवयवधारायाः क्वचिदविश्रामे तेषामवयवानामनन्तदेशवृत्तित्वचिन्तायामानन्त्यादनन्तदेशवृत्तित्वमेव स्यात्ततश्च तेषां विश्वव्याप्ततया चेतोऽतिवर्तिमेरोः कोऽप्यवयव- २५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कस्य यादृशमवयवानां विश्वव्याप्ततया महत्त्वं स्यात् सर्षपस्याप्यनन्तावयवत्वेन तदीयैरप्यनन्तैरवयवैः सकलदेशस्य व्याप्ततया तादृशमेवातिशयितं महत्त्वं स्यान्न तु ततः किंचिन्न्यूनम्, उभयोरनन्तावयवानामनन्तदेशव्यापित्वेन समानमहत्त्वादिति । न केवलं मेरुसर्षपयोरेव प्रत्युत मेरोरपि यो महान् स्यात्तेनापि समं महत्त्वेन साम्यं सर्षपादपि यो लघीयाँस्तस्याप्यापादयितुं शक्यं किं पुनर्मेरुसर्षपयोः साम्यापादने वक्तव्यम् । न च मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषादेव तद्विशेष इति वाच्यम्, प्रचयविशेषस्यापि संख्याविशेषनियम्यत्वेन संख्याविशेषाभावेन तद्विशेषानुपपत्तेः ।

यदपि प्रलयविशेष एवावधिरिति शून्यतावादमाश्रित्य कालविलम्बाविलम्बनाशाधीनमेव तयोर्विशेषत्वं स्यात्, शून्यतावादिभिः सर्वाभावपर्यन्तमुत्तरोत्तरावयवधाराया अभ्युपगमात् । उक्तं च न्यायसूत्रे–"अवयवावयविप्रसङ्गश्चैवमाप्रलयात्" इति । तदपि न युक्तम्, शून्यतावादस्याग्रे निरस्यमानत्वात् । अभिहितं च न्यायदर्शने समाधानसूत्रे—"न प्रलयोऽणुसद्भावात्" इति । उपस्कारे शङ्करमिश्रैरपि–"प्रलयविशेष एवावधिः" इत्याशङ्क्य, "अन्त्यस्य कस्यचिन्निरवयवद्रव्यस्य प्रमाणसिद्धतया प्रलयस्यैवानुपपत्तेः" इत्यभिहितम् । किं च कालविलम्बाविलम्बनाशस्याप्यवयवसंख्याधीनत्वेन तदभावे तस्याप्यनुपपत्तेरिति ।

अत एव विभाग एवावधिरस्तु इत्यपि न युक्तम् । तथाहि–विभागः परमाणवन्तो वा, प्रलयान्तो वा, अनन्तो वा ? न तावत्तृतीयः, विभागस्य निरवधिकत्वेऽवयवविभागस्यानन्त्येन त्रुटिहिमवतोः साम्यापत्तेः पुनस्तादवस्थ्यात् । नापि प्रलय एव विभागावधिरिति द्वितीयः पक्षोऽपि युक्तः, सकलावयवध्वंसरूपस्य प्रलयस्य द्रव्यानात्मकतया विभागाश्रयत्वाभावेन विभागस्यानाधारत्वप्रसङ्गात् ।

अत्र नन्वेतावता मेरुसर्षपौ निरवधिकौ स्यातां समानपरिमाणकौ स्यातामिति तर्कितमेव तावद् भवद्भिर्न तु परमाणुसाधकं किंचित्प्रमाणमुपन्यस्तम् । न च केवलोऽयं तर्कः साधकः किन्तु प्रमाणानुग्राहकः । तथा च परमाणोः प्रमाणगवेषणापेक्षया त्रसरेणोः प्रत्यक्षप्रमाणसिद्धतया तस्य चावयवकल्पनायां मानाभावेन निरवयवत्वात् स एवावधिरस्तु । अणुव्यवहारोऽपि तत्रापकृष्टमहत्त्वेन परमाणुव्यवहारश्च तत्रैवोत्कर्षानाश्रयमहत्त्वेनोपपद्यत इति तदर्थमपि न
२६ किंचिद् द्रव्यं महत्त्वानाश्रयभूतमुपगन्तव्यमिति केचिदाहुः । तदसत्; त्रसरेणुः सावयवश्चाक्षुषद्रव्यत्वाद् घटवन्निरवयवत्वे चाक्षुषत्वानुपपत्तेरित्यनुमानेन तस्य सावयवत्वसिद्धौ तस्यावयवपर-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

म्यरावधित्वासंभवात् । न च चाक्षुषे महत्त्वस्यैव प्रयोजकत्वं न तु सावयवत्वस्य (अनेकद्रव्यत्वस्य) इति चाक्षुषद्रव्यत्वस्य न सावयवत्वसाधकत्वमिति शङ्क्यम् ; महत्त्वप्रयोजकतयैव त्रसरेणोः सावयवत्वसिद्धेरनेकद्रव्यवत्त्वरूपसावयवत्वं विना जन्यमहत्त्वानुपपत्तेस्तथा च महत्त्वोपपादकतयैव त्रसरेणोः सावयवत्वं दुर्वारमिति ।

अथ जन्यमहत्त्वं प्रत्येवानेकद्रव्यवत्त्वस्य प्रयोजकत्वं न तु नित्यमहत्त्वं प्रति, तथा च त्रसरेणुमहत्त्वस्य नित्यतया न तत्प्रयोजकतयाऽनेकद्रव्यवत्त्वं त्रुटौ सिद्धयति । न च त्रसरेणुमहत्त्वस्य नित्यत्वे मानाभावः, त्रसरेणुमहत्त्वं नित्यं सजातीयनिरूपितोत्कर्षापकर्षोभयानाधारत्वे सति महत्त्वत्वाद् गगनादिमहत्त्ववदित्यनुमानस्य मानत्वादिति चेन्न, महत्त्वस्य नित्यतायामपकर्षानाधारत्वमात्रस्यैव लाघवेन प्रयोजकतयोक्तहेतोरप्रयोजकत्वात्, अपकर्षानाश्रयमहत्त्वत्वस्य उपाधित्वाच्च । न चापकर्षानाश्रयत्वमात्रेण त्रसरेणुमहत्त्वस्य नित्यत्वसाधनं संभवति, तत्रापकर्षाश्रयत्वस्यैव सत्त्वेन स्वरूपासिद्धयापत्तेः । प्रत्युत चाक्षुषत्वे सति महत्त्वत्वादिना नित्यत्वाभाव एव तत्र सिद्धयति । अत एव न्यायलीलावतीकृता—"न चास्तु त्रसरेणौ नित्यं महत्त्वं किं तदवयवचिन्तया" इत्याशङ्क्य "त्रसरेणुमहत्त्वमनित्यं महत्त्वे सति चाक्षुषत्वाद् घटमहत्त्ववदित्यनुमानेन तदनित्यत्वसिद्धेः" इत्यभिहितम् ।

किं च त्रसरेणुः कार्यो महत्त्वे सति क्रियावत्त्वादित्यनुमानेनापि त्रसरेणोरनित्यत्वसिद्धौ तद्गतमहत्त्वस्याप्यनित्यत्वं दुर्वारमेव । न चास्तु त्रसरेणुरनित्यस्तद्गतं महत्त्वं नित्यमिति वक्तुं शक्यम्, त्रसरेणुमहत्त्वमनित्यमनित्यवृत्तिपरिमाणत्वाद् अपरानित्यपरिमाणवदित्यनुमानेन तदनित्यत्वसिद्धेः । प्रशस्तपादभाष्ये—"आश्रयनाशान्नश्यति" इत्यादिना आश्रयानित्यत्वे परिमाणानित्यत्वस्य स्पष्टं प्रतिपादितत्वात् । न च त्रसरेणोः सहेतुकत्वे त्रसरेणोर्दृश्यतया तद्धेतुभूतस्य तदवयवस्यापि दृश्यत्वापत्तिरतस्त्रसरेणोर्निरवयवत्वस्वीकार एव समुचित इति वाच्यम् ; दृश्यस्य दृश्योपादानकत्वनियमे सत्येव तत्संभवात्, उक्तनियमस्य च तेजसि व्यभिचारेण त्याज्यत्वात् ; दृश्यते ह्यदृश्यादेव भर्जनकपालस्थवह्नेर्दृश्यदहनोत्पत्तिः । तथा च न त्रसरेणोरवयवासिद्धिः । एतच्च सर्वं स्पष्टं न्यायलीलावत्यां पुनस्तदुद्धरणं गौरवावहमेव । अत एव—"परं वा त्रुटेः" इति सूत्रतात्पर्ये वाचस्पतिमिश्रैरुक्तम्—"त्रुटिस्त्रसरेणुरित्यनर्थान्तरम् । जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतम् । तथा च यदि त्रुटेः परं द्वित्रिपदकेऽवयवविभागो न व्यवतिष्ठते ततोऽवयवविभागस्यानवस्थानाद् द्रव्याणामसंख्येयत्वात् त्रुटित्वनिवृत्तिः । त्रुटिरपि सुमेरुणा तुल्यपरिमाणा स्यात् । न खल्वनन्तावयवत्वेन कश्चिद् विशेषोऽस्तीति ।" इति । २७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न चास्तु त्रसरेण्ववयवतया सिद्धो द्व्यणुक एवावधिः, तत्रैवावयवधाराविश्रामसंभवादिति वाच्यम्; त्रसरेणोरवयवाः सावयवाश्चाक्षुषद्रव्यारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः। न च चाक्षुषद्रव्यारम्भकारम्भकत्वात् कपालिकादृष्टान्तेन तदवयवोऽपि सिद्धयेदिति वाच्यम्; अनवस्थाभयेन तदसिद्धेः। न चेयमनवस्था बीजाङ्कुरवत् प्रामाणिकी यनेष्येत। उक्तं चान्यत्र—

> प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि।
> बालाग्रशतभागोऽपि न कल्प्यो ह्यप्रमाणकः॥ इति।

किं चानवस्थायां मेरुसर्षपयोः साम्यप्रसङ्गो दुरुद्धर एव स्यादिति। तस्माद् द्व्यणुकावयवभूतः परमाणुरेवावयवपरम्पराविश्रामस्थानं निरवयवश्च सिद्धयतीति परमाणुसिद्धिः।

परमाणोः पारिमाण्डल्यं निरवयवत्वं च

नन्वेतावताऽवयवपरम्परावधिभूतः कश्चन द्रव्यविशेषः सिद्धः। किन्तु तस्य परमाणुत्वं निरवयवत्वं च कुतः सिद्धमिति चेन्न, परमत्वविशिष्टाणुपरिमाणवत एव परमाणुपदवाच्यतया सर्वापेक्षयाऽपकृष्टत्वरूपपरमत्वविशिष्टाणुपरिमाणवत्त्वात्तस्य परमाणुत्वसिद्धेः। अत एव "पारिमाण्डल्यं सर्वापकृष्टं परिमाणम्" इति स्वाभिधानेन परमाणोः सर्वापकृष्टं परिमाणं कन्दलीकृतोक्तम्। एवं च परमाणोः सावयवत्वे तदवयवानां परमाण्वपेक्षयाऽल्पपरिमाणवत्त्वेन परमाणोः सर्वापेक्षयाऽपकृष्टपरिमाणवत्त्वरूपपरमाणुत्वानुपपत्तिः स्यादतस्तस्य निरवयवत्वमपि सिद्धयति। तथा हि—

परमाणूनामवयवत्वेनाभिमता ये सन्ति तेषां किमपि परिमाणवत्त्वमभ्युपेयते न वा? न तावन्निष्परिमाणकत्वं तेषामिति वक्तुं युक्तमनुभवसिद्धान्तविरोधात् परिमाणरहितस्य द्रव्यस्यानुपलब्धेः। परिमाणवत्त्वे च किमणुपरिमाणवत्त्वम्? आहोस्वित् तदतिरिक्तमहदादित्रयपरिमाणवत्त्वम्? किं वा एतच्चतुष्टयातिरिक्तविजातीयपरिमाणवत्त्वम्? न तृतीयः, तस्याप्रामाणिकत्वेन सर्वथैव हेयत्वात् केनचित्तान्त्रिकेण तथाऽनभ्युपगमात्। न द्वितीयः, परमाण्ववयवत्वेनाभिमतानां तेषां महदादिपरिमाणवत्त्वे परमाण्ववयवत्वव्याघातापत्तेः। अतोऽणुपरिमाणवत्त्वं वाच्यम्। किन्तु तद्धि परमाण्ववयवगतमणुपरिमाणमेतत्परमाणुपरिमाणापेक्षयाऽल्पीयो वा समानं वा? न तावद् द्वितीयः, तथा सति तयोरवयवावयविभावानुपपत्तेः; समानपरिमा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णानां क्वचिदप्यवयवावयविभावादर्शनात्। अतोऽल्पीय एव तत्परिमाणं वाच्यम्। तथा सति चायं परमाणुरेव न स्यात्, परमाणुत्वव्याघातात्। अणुशब्दो ह्यत्र परिमाणवचनः। परमत्वं चात्रापकर्षानाश्रयत्वम्। एवं चापकर्षानाश्रयाणुपरिमाणवत्त्वं परमाणुत्वमिति पर्यवस्यति। किन्तु यदि परमाणववयवोऽपि कश्चित् स्यात्तर्हि तस्य परमाणुतरत्वे तन्निरूपितापकर्षस्यात्र परिमाणे दुर्निवारतयाऽत्रापकर्षानाश्रयत्वविरहेण परमत्वविशेषणसहितस्याणुपरिमाणस्यासंभवे सर्वापेक्षयापकृष्टाणुपरिमाणवत्त्वरूपपरमाणुत्वानुपपत्तिः स्पष्टैवेति। अभिहितं च प्रशस्तपादभाष्यकन्दलीग्रन्थे श्रीधराचार्यैः—

> "अथायं सावयवो न तर्हि परमाणुः, कार्यपरिमाणापेक्षया तदवयवपरिमाणस्य लोकेऽल्पीयस्त्वप्रतीतेः। यश्च तस्यावयवः स परमाणुर्भविष्यति। अथ सोऽपि न भवति, अवयवान्तरसद्भावात्" इति।

एतेन स्पष्टं प्रतीयते यत् परमाणोः सावयवत्वे कार्यत्वापत्तिः। न चेष्टा सा। तस्मान्न सावयवाः परमाणव इति।

अथ स्थूलद्रव्यमध्यवर्त्तिन एकस्य परमाणोर्दिक्चतुष्टयवर्त्तिनश्चत्वारः परमाणव उपर्यधश्च द्वौ परमाणू तदेवं षड्भिः परमाणुभिः सह संयोगे परमाणोः षडंशता स्यादंशभेदं विना तदनुपपत्तेः। तथा हि—परमाणोः परमाणुभिः सह द्विधा संयोगो भवितुमर्हति, अंशेन सर्वात्मना च; तदतिरिक्तप्रकाराभावात्। तथा च यद्यंशेन न संयोगः किन्तु सर्वात्मनैवेत्यभ्युपेयते, तदा सर्वेषां परमाणूनां संयोगेन मध्यपरमाणुमात्रदेशत्वात् तादृशाणुसमुदायात्मकपिण्डस्याणुमात्रतापत्त्या प्रथिमानुपपत्तिः स्यात्। अत एकदेशेन संयोगोऽङ्गीकार्यः। तथा चैकदेशान्तरेण परमाण्वन्तरस्यासंयोगादव्याप्यवृत्तिसंयोगरूपप्रयोजकमादाय प्रथिमोपपत्तिसंभवेऽपि षड्भिरेवांशैः षड्भिः परमाणुभिः संयोग इत्यस्यागत्या स्वीकारात् षडंशता दुर्निवारेति। न च द्वयोरेव परमाण्वोः संयोगसंभवो न तु युगपद् बहूनाम्, एकेन परमाणुनाक्रान्ते परमाणौ मूर्त्तेन मूर्त्तस्य परमाण्वन्तरस्य संयोगासंभवादिति वाच्यम्; परमाण्वोः सर्वात्मना संयुक्तयोरन्योन्यस्य परितो वर्तमानयोः स्वक्रियया प्राप्तेन परमाण्वन्तरेण यन्नैरन्तर्यं तस्य संयोगरूपत्वात्। एवमन्योऽन्येनेति बहूनां संयोगसंभवात्। न च नैरन्तर्यस्य संयोगातिरिक्तत्वं वक्तुं शक्यम्, नैरन्तर्यस्य संयोगातिरिक्तत्वे तेनैवान्यत्रापि संयोगव्यवहारोपपत्तौ संयोगस्यैव विलयप्रसङ्गात्। घटस्य पटेन २९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सह संयोगे पटस्य तन्तोरंशोश्च तत्र संयोगस्यानुभविकतया बहूनामपि संयोगानामेकत्र देशे संभवादेकत्रैक एव संयोगो न तु बहव इत्यस्य वक्तुमशक्यत्वात् ।

न चास्तु बहूनां संयोगानामेकत्र संभवस्तथापि समाने मध्यस्थितपरमाणौ षण्णां परमाणूनां संयोगा एव सन्ति न तु परमाणव इति परमाणूनां मध्यमपरमाणुमात्रदेशताविरहान्न पिण्डस्थौल्यस्य कापि हानिरिति वाच्यम्; परमाणूनां संयोगस्य तत्र सत्त्वे संयोगेन तेषां समेषामपि तत्रैकदेशे वृत्तित्वस्य दुर्निवारत्वात्, घटस्य पटेन सह संयोगे पटस्य तन्तोरंशोश्च तत्र संयोगेन वृत्तित्वस्य सर्वानुभवसिद्धतया स्वनियामकसकलसम्बन्धानां तद्देशवृत्तित्वे सकलसम्बन्धिनामपि तद्देशवृत्तित्वस्यावश्यकत्वात् । न च समवायस्यैवैकदेशवृत्तित्वनियामकत्वं न तु संयोगस्येति वक्तुं युक्तम्; कुण्डे रूपमितिवत् कुण्डे बदरमिति प्रत्ययस्याविशेषेण समवायवत् संयोगस्यापि देशवृत्तितानियामकत्वस्य दुर्निवारत्वात् । यच्च येषां च पदार्थानां देशस्तेषामेव देशवृत्तित्वनियामकत्वं संयोगानाम्, परमाणूनां च देशानभ्युपगमेन संयोगानामेकदेशत्वेऽपि तैश्च परमाणूनामेकदेशवृत्तित्वं दुर्घटं ततश्च तन्निबन्धनो दोषोऽपि दुर्घट एव तन्न; कुण्डे बदरमिति प्रत्ययस्य सामर्थ्येन संयोगस्य देशदेशिभावनिबन्धनप्रयुक्ततत्सम्बन्धिनो बदरस्यापि देशदेशिभावावगमेऽत्रापि परमाणोः संयोगस्य देशदेशिभावाङ्गीकारे ततश्च परमाणुरूपसम्बन्धिनोऽपि देशदेशिभाव इत्यस्यावश्यमभ्युपेयत्वात् । तथा च परमाणवो देशरहिता इति रिक्तं वचः ।

न च कुण्डे बदरमित्यत्र सम्बन्धिनो बदरस्याधारत्वस्य कुण्डेऽवगमात्तत्रास्तु तथा, प्रकृते च मध्यमपरमाणौ परमाणुसंयोगा इति प्रतीत्या संसर्गस्यैवाधारत्वं भासते न तु सम्बन्धिनां परमाणूनाम्, मध्यमपरमाणौ परमाणव इति प्रत्ययसत्त्वे बलवत्तरप्रमाणविरहादिति वक्तं युक्तम्; अन्यत्र संयोगसम्बन्धस्य देशदेशिभावेन तत्सम्बन्धिनोऽपि देशदेशिभावेन परमाणूनां संयोगस्यापि देशदेशिभावे तत्सम्बन्धिनां च परमाणूनां देशदेशिभावो नास्तीत्यस्य वक्तुमशक्यत्वात्, एकशेषे विनिगमकाभावात्, परमाणूनां कश्चन देशो नास्तीत्यत्र प्रमाणविरहात् । प्रत्युत इह परमाणव इति प्रत्ययाद्देशवत्त्वमेव । इति चेदत्रोच्यते—द्रव्याणां समवायेनैकदेशवृत्तित्वस्य स्थौल्यविरोधित्वेन बहूनां द्रव्याणां समानदेशत्वनिषेधेऽपि संयोगेन
२० बहूनामपि द्रव्याणामेकदेशवर्तमानतायाः स्थौल्यविरोधित्वाभावेन संयोगेन परमाणूनां मध्यमपरमाणुदेशवृत्तित्वेऽपि स्थौल्योपपत्तेरिति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्रापरे नेदं समाधानं युज्यत इति वदन्ति। तेषामयमाशयः—यत्र यत्र संयोगेनैकत्र वर्तमानानामपि बहूनां स्थूलकार्यारम्भकत्वं दृष्टं न तत्रैकावच्छेदेनैकत्र वर्तमानानाम्, अर्थाद् देशानवच्छिन्नैकनिरूपितवृत्तिमताम्; अपि तु विभिन्नदेशावच्छेदेनैकत्र वर्तमानानामेव, तथा सत्येव स्थौल्योपपत्तेः। एकावच्छेदेनैकत्र संयोगेन वृत्तिमतां समवायेन वृत्तिमतामिव स्थौल्यानारम्भकत्वस्यैवानुभविकत्वात्। तन्तौ तन्तूनां तत्तदंशवच्छेदेन वृत्तिमतामेव स्थौल्यारम्भकत्वदर्शनादेकावच्छेदेनैकत्र वृत्तिमतां बहूनां स्थौल्यारम्भकत्वस्य क्वाप्यदर्शनात्। शर्करायाः सैन्धवस्य च जलेन सह सर्वात्मना संयोगे सत्यपि स्थौल्यादर्शनेन स्थौल्यं प्रत्यव्याप्यवृत्तिसंयोगस्यैव प्रयोजकत्वावधारणात् संयोगत्वेन प्रयोजकत्वासंभवात् संयोगगताव्याप्यवृत्तित्वस्य विरोधित्वाच्च। अप्रत्यक्षे परमाणौ दृष्टानुसारेणैव तस्य कल्पनीयत्वादिति विभिन्नावच्छेदकानवच्छिन्नैकपरमाणुनिरूपितवृत्तिमतां परमाणूनां दृष्टविरुद्धं स्थौल्यारम्भकत्वं कथं कल्पनीयं स्यात्। न चावच्छेदकदेशविरहेऽपि परमाणोः परमाण्वन्तरेण यः संयोगः स संयोगस्वाभाव्यादेवाव्याप्यवृत्तिरिति न स्थौल्यानुपपत्तिः संयोगाव्याप्यवृत्तित्वस्य प्रयोजकस्य सत्त्वादिति वाच्यम्; अव्याप्यवृत्तित्वे परमाणुसंयोगस्य परमाणुसंयोगवत्येव हि तदभावो वाच्यः। स च भावाभावयोः स्वभावयोर्विरुद्धत्वान्न संभवति, संभवति चावच्छेदकभेदे सत्येव। तस्य च परमाणावभावेन नाभावसंभव इति संयोगस्यात्र व्याप्यवृत्तितैव वाच्या। सा यदि संयोगस्वभावविरुद्धा माभ्युपगम्यतां परमाणोः परमाण्वन्तरेण संयोगः, संयोगाभावे च परमाणोर्द्रव्यारम्भकतैव न स्यादित्यारम्भवाद एव दत्तजलाञ्जलिः स्यात्तर्हि का पुनः परमाणुकथेति। आरम्भवादस्यैव परमाणोः सिद्धिमूलत्वात्।

तत्रेदं समाधीयते—प्राच्यादितत्तद्दिग्भेदावच्छेदेन परमाणुसंयोगस्याभ्युपगमेनाव्याप्यवृत्तित्वसंभवेनाव्याप्यवृत्तिसंयोगरूपप्रयोजकसत्त्वेन स्थौल्योपपत्तेः। ननु तथाप्यसम्बद्धानामवच्छेदकत्वादर्शनात्सम्बद्धस्यैव तथात्वेन दिशामवच्छेदकत्वे ताभिः सह सम्बन्धस्यानिवार्यतयोक्तरीत्या पुनस्तव परमाणोर्दिग्भागाः षड् जाता इति षडंशता दुर्निवारा दिग्देशभेदो यस्यास्ति तस्यैकत्वस्यासंभवात् तथात्वस्य क्वाप्यदर्शनादिति चेत्, परमाणोर्वस्तुतो दिग्देश भेदविरहेणोक्तरीत्या तदंशत्वकल्पनायाः शङ्कितुमप्यशक्यत्वात्; परमाणोर्वास्तवदिग्देशभेदविरहेऽपि कल्पितदिग्देशभेदैः परमाणोर्दिग्देशभेदकल्पनया व्यवहारोपपत्तिसंभवात्।

ननु यद्येकैव दिक् क्व तर्हि परमाणावस्मादयं परमाणुः पूर्वोऽयं पश्चिम इत्यादयो बुद्धिव्यपदेशा इति चेत्, दिश आदित्योदयदेशप्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद् विप्रकृष्ट- ३१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देशसंयोगात्परमाणोः पूर्वः । एवमादित्यास्तमयदेशप्रत्यासन्नदेशसंयुक्तो यः स इतरस्माद् विप्रकृष्टदेशसंयोगात्परमाणोः पश्चिमः । तौ च पूर्वपश्चिमौ परमाणू अपेक्ष्य यः सूर्योदयास्तमयदेशविप्रकृष्टदेशसंयोगः स मध्यवर्ती । एवमेतयोर्यौ तिर्यग्देशसम्बन्धिनौ मध्यस्य आर्जवेन व्यवस्थितौ पार्श्ववर्त्तिनौ तौ दक्षिणोत्तरपरमाणू । एवं मध्यन्दिनवर्त्तिसूर्यसन्निकर्षविप्रकर्षावपेक्ष्य उपर्यधोभावो द्रष्टव्यः । संयुक्तसंयोगाल्पत्वभूयस्त्वे च सन्निकर्षविप्रकर्षौ । पूर्वसंख्यावच्छिन्नत्वं चाल्पत्वम् । परसंख्यावच्छिन्नत्वं च भूयस्त्वम् । तस्मादेकस्यापि परमाणोः परमाण्वन्तरसंयोगा अव्याप्यवृत्तय एव भागाः । एवं दिशोऽप्येकस्या अपि संयोगा एव भागाः । सोऽयं परमाणोः षट्केन युगपद् योगो मूर्तत्वमात्रप्रयुक्तो न तु सावयवत्वप्रयुक्त इति न सावयवत्वं गमयितुमर्हतीति ।

न च निरवयवत्वान्न सर्वतः संयुक्तौ नाप्येकदेशेन संयुक्ताविति पर्यवसन्नम्, तृतीयप्रकारश्चाप्रसिद्ध एवेति संयोग एव मास्तु, तत्प्रकारस्य बाधितत्वादिति वाच्यम्; सृष्ट्यन्यथानुपपत्त्या त्रुटिहिमवतोः साम्यप्रसङ्गादिभयेन चात्र तथा कल्पनात् । न चान्यथापि परिणामवादादिकल्पनया सृष्ट्युपपत्तिः कर्तुं शक्यते; परिणामवादादेरन्यत्र बहुधा निरस्तत्वात् ।

(सावशेषम्)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दोषदृष्टिः

श्रीबटुकनाथशास्त्री खिस्ते

सर्वेष्वपि शास्त्रेषु, सर्वास्वपि कलासु, सर्वेषु शिल्पेष्वपि, तत्तच्छास्त्रीयपद्धत्यनुगुणं निर्माणं प्रधानतयाऽपेक्ष्यत एव। नियमानामुत्सर्गरूपेणापवादरूपेण वा स्थितिस्तु स्वाभाविकी। तत्रापि सूक्ष्मं सूक्ष्मतरं सूक्ष्मतमं च औचित्यं विदुषां विमर्शसूक्ष्मेक्षिकामधितिष्ठतीति सोऽयं पन्थाः प्राचीनैरर्वाचीनैर्वा सर्वैरेव निर्विवादमभ्युपेयः।

ललितकलासु सङ्गीतसाहित्यचित्रकर्मप्रमुखासु गुणनिरीक्षणमिव दोषनिरीक्षणमपि तदीयोत्कर्षतारतम्यविवेके प्रधानं साधनम्। यद्यपि—

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति॥ इति।
सौजन्यधन्यजनुषः पुरुषाः परेषां दोषान्विहाय गुणमेव गवेषयन्ति।
हित्वा भुजङ्गमविषाणि पटीरकोषात् सौरभ्यमेव सुजनाः परिशीलयन्ति॥

इत्युक्त्या च विदुषां गुणदृष्टिः प्रशस्यते, परन्तु नैतावता ते दोषानविज्ञायैव गुणमात्रप्रशंसका भवन्तीत्यवगन्तव्यम्। किन्तु दोषं जानाना अपि सभासु साधारणतया कस्याऽपि निन्दनमनुचितमिति दोषोद्घाटनं परिहरन्ति। सत्यां दोषजिज्ञासायामवश्यं ब्रुवते। अन्यथा तेषामनभिज्ञत्वमेव प्रसज्येत। अत एव कोषकारः पर्यायानवतारयति—

विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः॥ इति।

त्यागैकरसिका विद्वांसः क्वचित्पुनर्युक्तिसहस्रेणाऽप्यपरितुष्यतो दुर्जनधौरेयस्य स्वयमेव साम्राज्यं घोषयन्तः किमप्यपूर्वं स्वचरितमुपस्थापयन्ति 'तुष्यतु दुर्जनः' इत्यादिकं भाषमाणाः। ध्वन्यालोकलोचने श्रीमदभिनवगुप्तपादाचार्या अपि असहृदयजनान् व्यञ्जनारहस्यं ग्राहयन्तः क्वचित् 'अलं गर्दभीदोहनेन' इत्यादिवचनान्यलिखन्। ३३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किं च–'हेयहानिपूर्वकमुपादेयोपादानम्' इत्ययमपि न्यायो जागर्ति। यावद् हेयोपादेययोः स्वरूपतो भेदज्ञानं न स्यात् तावत् तयोर्हानमुपादानं वा कर्तुमशक्यमेवेति हेयानामपि परिचयः शास्त्रेषु प्रदीयत एव। यथा व्याकरणे (शिक्षायाम्)—

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥

अत्र यथाऽधमपाठकानां परिचयः पूर्वमुपन्यस्तस्ततोऽग्रे पाठकानामुत्कर्षावहा गुणा उपवर्ण्यन्ते। एवमेव शास्त्रान्तरेष्वपि स्थितिः।

काव्यशास्त्रमपि इमामेव पद्यामनुगच्छति, दोषगुणालङ्काराणां क्रमेणैव परिचयविवेकौ तदीयनिबन्धेष्ववस्थितौ। दोषनिरूपणे द्वयी गतिर्दृश्यते–स्वभावतः सतां दोषाणां निरूपणम्, क्वचित्कल्पनोत्थापितानामपीति। तत्र हेतुरयमेव प्रतिभाति यद् विनेयानां बुद्धयस्तथा सूक्ष्मार्थभेदिन्यो भूयासुर्यथा ते दोषोत्पत्तेर्निदानमप्यायत्तीकर्तुं प्रगल्भाः स्युरिति। तथाहि–काव्यप्रकाशादिषु दोषनिरूपणप्रसङ्गेन याः काश्चित्कालिदासादिमहाकविसूक्तयः समुद्धृतास्ताः सर्वथा दुष्टा एवेति न केनापि सिद्धान्तयितुं शक्यम्। एतदस्माभिरुपरिष्टाद् विवेचयिष्यते।

काव्यप्रकाशटीकाकारैरप्यत्र भूरि पराक्रान्तम्। तत्रेयं स्थितिः–'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति शब्दार्थरूपं काव्यमधिकृत्य दोषगुणालङ्काराः क्रमेणैव विवेचनीया इति कण्ठरवेणैव ग्रन्थकारः स्वीकुरुते। एवं चतुर्थोल्लासारम्भे–'धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायते' इत्यादिना ध्वनिस्वरूपं निरूपयितुं पीठिकामाबध्नन् 'दोषगुणालङ्काराणां स्वरूपमभिधानीयम्' इत्यप्युवाच ग्रन्थकृत्। तत्र नरसिंहठक्कुरस्तावत् 'अदोष' इति अकारप्रश्लेषमङ्गीकृत्य 'निर्णये कृतेऽदोषगुणालङ्काराणां स्वरूपमभिधानीयम्' इति पङ्क्तिं लापयामास। तद्दृष्ट्या दोषाऽभावस्यैव काव्यधर्मत्वम्, न पुनर्दोषस्य। अत्र सम्प्रदायप्रकाशिनीकारस्तावत्–'हेयोपादेयतेति। दोषरूपाणां धर्माणां हेयता, अन्येषामुपादेयतेति विभागः।' इति यथाक्रमं व्याचष्टे। इदं पूर्वस्मात्सम्यक् प्रतिभाति।

३४ एवं दोषसामान्यलक्षणप्रस्तावेऽपि—"अत्र च दोषाऽभावे निरूपणीयेऽभावस्य स्वरूपतो निरूपणाऽनर्हतया प्रतियोगिनिरूपणाधीननिरूपणकत्वाद् हेयाऽपरिचये तद्धानाऽ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संभवाच्च दोषलक्षणं शाब्दम्, आर्थं च तदभावलक्षणमित्यवगन्तव्यम्" इति नरसिंहठक्कुरो व्याख्यातवान्। प्रदीपकारोऽपीत्थमेव व्याख्याति। विशेषस्तु—"सति तु दोषाऽभावे गुणादिकं विनापि किंचिदाह्लादसंभवात्, अपदोषतैव विगुणस्य गुण इति न्यायात्।" इत्युल्लिलेख।

एवं प्राचां मते दोषस्तदभावो वा नियतं निरूपणीयतामर्हतीति नात्र विप्रतिपत्तिः कस्यापि। एवमन्यापि काचिदुक्तिः श्रूयते—

दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः।
अन्यो गुणोऽस्तु वा मास्तु महान् निर्दोषता गुणः॥

एवमाचार्यदण्डिनाप्युक्तम्—

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥ इति।

अथैतद् विमृष्टव्यं यत् कया पद्धत्या दोषविवेचनं प्राचीनैः कृतमस्माभिर्वा कर्तव्यम्? तत्र प्राचामपि दृष्टिभेदो भूयानुपलक्ष्यते। अलङ्कारसम्प्रदायानुयायिनाम्, रीतिमार्गानुगामिनाम्, अन्येषां प्राचीनानां वा दोषनिरूपणे तत्सौष्ठवं स विषयविभागश्च न विविक्ततया स्फुरति यः खलु ध्वनिसम्प्रदायपरिष्कृतवाग्वीचीनामाचार्याणां प्रकाशते।

ध्वनिसम्प्रदायपरमाचार्या आनन्दवर्धनमम्मटप्रभृतयस्तावत् 'काव्यस्यात्मा ध्वनिः' इति सिद्धान्तमङ्गीकृत्यैव दोषनिरूपणे प्रावर्तन्त। तन्मते ध्वनिस्त्रिरूपः—वस्त्वलङ्काररसात्मकत्वात्। तत्र ध्वन्यमानोऽप्यर्थो द्वयीं गतिं लभते—कश्चिद्वाच्यतासहः, कश्चिच्च तदसह इति। रसादिलक्षणोऽर्थः स्वप्नेऽप्यवाच्यः। वस्त्वलङ्कारौ वाच्यौ व्यङ्ग्यौ चाऽवस्थाभेदेन भवतः।

रसादिध्वनिरेव काव्यस्यात्मस्थानीय इत्यभ्युपगम्य तदनुगुणतयैव दोषाणां नित्याऽनित्यत्वविभागो व्यवस्थाप्यते साहित्यविद्भिः। व्यञ्जनास्थापनप्रसङ्गे ध्वनिसिद्धान्तमन्तरेण नित्याऽनित्यत्वव्यवहारो दोषाणामनुपपन्न इति काव्यप्रकाशादौ स्पष्टतरम्।

प्राचामलङ्कारसम्प्रदायिनां रीतिमार्गानुगामिनामन्येषां वा सुप्रपञ्चितोऽपि दोषविचारो विचारकषे न निर्दोषतामात्मनः प्रकटयति, किन्तु गड्डलिकाप्रवाहन्यायेन गतानुगतिकत्वमेव साधयति। ३५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथा वामनसूत्राणि—

गुणविपर्य्ययात्मानो दोषाः ।
अर्थतस्तदवगमः ।
सौकर्याय प्रपञ्चः ।

अत्र गुणाऽभाव एव दोषाणां लक्षणं तैः स्वदृशाऽङ्गीकृतम् । तन्मते गुणविशिष्टरीतिरेव काव्यस्यात्मा । एवमन्येऽपि स्वस्वसिद्धान्तान् व्याचक्षते ।

आचार्याः शिष्यबुद्धिवैशद्याय क्वचित्तथाविधोत्कटतरोद्वेगाऽननुभवेऽपि दोषमाविष्कृत्य विवेचनमारभन्ते। यथा अमङ्गलाद्यभिव्यञ्जकाऽश्लीलत्वदोषे 'अभिप्रेत'–प्रभृतिपदेषु। लोकव्यवहारारूढानि पदानि वस्तुतो न तथोद्वेगं जनयन्ति यथा व्यवहारमनारूढानि । वामनेन–'न गुप्तलक्षितसंवृतानि' इति सूत्रे तदेतद्विचारितम् । यथा 'संबाध'–पदं सङ्कटार्थे प्रसिद्धं न गुह्यार्थे; एवं 'जन्मभूमि'–प्रभृतिपदं लक्षणयैवाऽसभ्यार्थमुपस्थापयेन्न पुनः शक्त्येति न दोषः । लोकप्रसिद्धं पदं लोकसंवीतमित्युच्यते । यथा—भगिनी, उपस्थानम्, अभिप्रेतमित्यादीनि । एषु च नाऽसभ्यार्थप्रतीतिर्भवति, प्रसिद्धार्थस्यैव पुरः स्फुरणात् । उक्तं च—

संवीतस्य हि लोकेन न दोषान्वेषणं क्षमम् ।
शिवलिङ्गस्य संस्थाने कस्याऽसभ्यत्वभावना ॥

एवं दोषविचार इव तदपवादविचारोऽपि सुतरां निध्यातव्यः काव्यविद्भिः । नहि दोषपाठमात्रेण विवेकदृष्टिः परिष्कृता स्यात् । कवीनां रुचिभेदेन क्वचित्प्रकृतिविपर्य्ययोऽपि कथासु संलक्ष्यते । यथा भगवान् रामचन्द्रो हि धीरोदात्तस्वभाव इति प्रथितचरम् । कालिदासेन तदनुगुणमेव वर्णनमुपनिबद्धम् । यथा—

दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥

भवभूतिना उत्तररामचरिते रामचन्द्रस्य किमपि तथाविधं वैक्लव्यं पदे पदे समुप-
२६ निबद्धं यदवस्तुवृत्तमिव क्वचित्प्रतिभाति । मन्ये करुणरसप्राधान्यप्रदर्शनपारवश्येन सोऽयं महाकविरपि क्वचिदन्यथाभावमवापितोऽभूत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं महाकविवचसि दोषकल्पनमपि क्वचिच्छास्त्रकारैर्विधीयत एव। यथा—'द्वयं गतं सम्प्रति शोचनीयताम्' इति कुमारसंभवस्थे पद्येऽक्रमत्वदोषः काव्यप्रकाशकारेण निर्दिष्टः। तत्र–'पदसन्निवेशरूपरचनायाः प्रस्तुतार्थाऽप्रत्यायकत्वेऽक्रमत्वम्' इति विवरणे तल्लक्षणं स्पष्टीकृतम्। अत्र प्रस्तुते पद्ये–'कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी' इत्यत्र कलापदोत्तरं यथा समुच्चायकश्चकारस्तथैव त्वम्पदोत्तरमपि चकारो युक्त इति काव्यप्रकाशकारो निर्दिदेश,अन्यथा समुच्चेयसमुच्चायकयोर्व्यवधानात्प्रस्तुतार्थप्रतीतेर्मान्थर्यं स्यात्।

अत्रैतत् सहृदयैर्विचारणीयं कोऽत्र प्रस्तुतोऽर्थः? कथं च तस्याऽप्रतीतिः? शिवसमागमाभिलाषेण शोच्यत्वमेव प्रस्तुतं द्वयोः, तच्च उपक्रम एव–'द्वयं गतं सम्प्रति शोचनीयताम्' इत्युक्त्या स्फुटतरीभवति। ननु–'कला च सा' इतिवत् 'त्वं चास्य' इत्यादि युष्मत्पदाऽव्यवधानेन चकाराऽनुपादानादक्रमत्वमिति कथ्यते चेत्; छन्दोऽनुरोधादेव कवेस्तथा पदसङ्घटना संजातेति शक्यं वक्तुम्। प्रस्तुतार्थप्रतीतिस्तु न मन्थरीभवतीति। चकारस्याव्यवधानेनोच्चारणे किंचिद्दार्ढ्यम्, तदभावेऽपि न दोषः; अन्वयप्रतीतौ बाधाभावात्, प्रकरणादेस्तादृशार्थोपस्थापनानुकूलत्वाच्च। एवम्—

वारयति भिषगपथ्यादितरान् स्वयमाचरन्नपि तत्।

इति महिमभट्टोक्तदिशा क्वचिदतिसूक्ष्मार्थं शिष्यान् ग्राहयितुं शास्त्रकारा महाकविसूक्तिषु दोषोन्मेषं विदधतीति मन्ये।

इत्थं दोषविवेचनपद्धत्या परिष्कृतमतयो विनेया लक्ष्येषु यथासम्भवं दोषगुणविवेकं कर्तुं प्रगल्भा भवेयुरित्येव ग्रन्थकाराणां मुख्यमुद्देश्यमिति शिवम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नाडीमण्डलारोपणे संस्कारविशेषाः

श्रीमुरारिलालशर्मा

किं नाम नाडीमण्डलारोपणम् ?

दूरवीक्षणयन्त्रं हि वेधशालानां हृदयम्। ग्रहनक्षत्रादीनां वेधाय येषां दूरवीक्षणयन्त्राणां प्रयोगो भवति भीमकायानि तानि भवन्ति। येन प्रकारेण स्थापितानि तानि ग्रहादीनां वेधकार्यं संपादयन्ति स प्रकार आरोपणनाम्ना व्यवह्रियते। आंग्लभाषायां तस्य नाम 'माउंटिंग' इति वर्तते। आरोपणमपि प्रायशो द्विधा भवति—दृङ्मण्डलारोपणं नाडीमण्डलारोपणं चेति। दृङ्मण्डलारोपणे पूर्वापरसूत्रोर्द्ध्वाधरसूत्रसमानान्तरावक्षौ परितः परिभ्रमद् यन्त्रं दिगंशोन्नतांशौ सूचयति ग्रहनक्षत्रादेः। नाडीमण्डलारोपणे दूरवीक्षणयन्त्रनलिका ध्रुवसूत्रनिरक्षोर्द्ध्वाधरसूत्रसमानान्तरावक्षौ परितः परिभ्रमन्ती ग्रहस्य क्रान्तेर्नाक्षत्रकालस्य च बोधनाद् ग्रहवेधं संपादयति।

अस्मिन् हि लेखे नाडीमण्डलारोपणे ये संस्कारविशेषा अपेक्षिताः सन्ति तेषामेव वर्णनं कर्तव्यम्। अत आरोपणविषये न बहु वक्तव्यम्। केवलं दिङ्मात्रेण नाडीमण्डलारोपणस्य स्वरूपं प्रदर्श्य प्रस्तुतमनुसरामः। नाडीमण्डलारोपणे तावदक्षद्वयं भवति। तत्र ध्रुवसूत्रसमानान्तरोऽक्षो ध्रुवाक्षः कथ्यते। स प्रायेणांग्लारोपणेषु स्तम्भद्वयेन, जर्मनीप्रकारारोपणेषु स्तम्भेनैकेनाधारितो भवति। ध्रुवाक्षेण संलग्नं तदुपरि लम्बरूपं च घटीचक्रं भवति। वेधावसरे ध्रुवाक्षो भारचलितेन घटीयन्त्रेण भुवो गतितुल्यं पश्चिमाभिमुखं चाल्यते, येन वेध्या ग्रहादिका इष्टकालं यावद् दृग्गोचरतां न त्यजन्ति। ध्रुवाक्षोपरि लम्बरूपः क्रान्त्यक्षः। क्रान्त्यक्षे लम्बरूपं क्रान्त्यक्षसंलग्नं क्रान्तिचक्रं च भवति। अत्र ग्रहोपरि ध्रुवप्रोते ग्रहनाडीवृत्तयोर्मध्ये येंऽशास्ते क्रान्तिसंज्ञका ज्ञेयाः। अतः केषांचिन्नक्षत्राणां क्रान्तिः परम्परावर्णितपरमक्रान्तितोऽप्यधिका
३८ भविष्यति। ध्रुवस्य क्रान्तिर्नवतिः। क्रान्त्यक्षप्रान्ते यन्त्रनलिकादीनां भारसंतोलनाय भाराः समारोपिता भवन्ति। यतो हि मुख्यं दूरदर्शकयन्त्रं स्वल्पमेवाकाशस्य भागं दृग्गोचरमानयति,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अतो वेधानां सौकर्यार्थं 'फाइण्डर'–नामकमपरं लघु दूरवीक्षणयन्त्रं मुख्यनलिकासंलग्नं भवति, यस्य वेधक्षेत्रं विशालं भवति ।

सुसमारोपिते यन्त्रे निम्नलिखिता विशेषाः समुपलभ्यन्ते—

(१) ध्रुवाक्षः सूक्ष्मरूपेणाक्षांशतुल्यसमुन्नतो भवति ।

(२) यदा यन्त्रनलिका ध्रुवाक्षोपरि लम्बरूपा भवति तदा क्रान्तिचक्रीयं मानं शून्यसमं भवति ।

(३) ध्रुवाक्षो याम्योत्तरवृत्तधरातले भवति ।

(४) क्रान्त्यक्षो ध्रुवाक्षे लम्बरूपो भवति ।

(६) यदा यन्त्रनलिका याम्योत्तरवृत्तधरातले भवति तदा घटीचक्रीयं मानं शून्यसमं भवति ।

(७) 'फाइण्डर'–नामकस्य लघुदूरवीक्षणयन्त्रस्य दृक्सूत्रं प्रधानदूरवीक्षणयन्त्रस्य दृक्सूत्रेण समानान्तरं भवति ।

परमेवंविधमारोपणमादर्शरूपमेव । न व्यवहारे कुत्रचिदप्येतादृशस्योपलब्धिर्भवति । तथापि संस्काराणामुपरिलिखितानां यथासंभवं संपादनं नितान्तमपेक्ष्यते ।

व्यवहारे तु पूर्वं स्थूलरूपेण गणितवेधयोः साहाय्येन याम्योत्तरधरातलस्य ध्रुवोन्नतांशानां च ज्ञानं कृत्वा स्थूलरूपेण यन्त्रस्य स्थापना क्रियते । तदनन्तरं सप्त संस्कारान् दत्त्वा यान्त्रिकसूक्ष्मता प्राप्यते ।

यन्त्रनिर्माणे विश्वविदितयशसा 'हावर्ड ग्रब'–महाशयेन स्वीयैरनुभवैरपरस्परसापेक्षाः संस्कारा निम्नलिखितप्रकारेण प्रतिपादिताः—

(१) लघुदूरवीक्षणयन्त्रस्य मुख्यदूरवीक्षणयन्त्रेण समान्तरकरणाय संस्कारः ।

(२) मुख्यनलिकायाः क्रान्त्यक्षोपरि लम्बत्वप्रतिपादनम् ।

(३) क्रान्त्यक्षस्य ध्रुवाक्षोपरि लम्बत्वप्रतिपादनम् ।

(४) क्रान्तिचक्रे संस्कारः ।

(५) ध्रुवाक्षोन्नतांशे संस्कारः ।

(६) ध्रुवाक्षस्य याम्योत्तरधरातले समानयनम् । ३९

(७) घटीचक्रे संस्कारः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ क्रमशः संस्काराणामेषां विवरणं दीयते—

(१) प्रथमसंस्कारार्थं यन्त्रप्रान्ते सूक्ष्मस्वस्तिकासूत्रयुतस्य चक्षुःखण्डस्य (Eye piece) प्रयोगः कर्तव्यः। किंचिदतिदूरगतं भूस्थं वस्तु,नक्षत्रं वा किंचित् प्रधानयन्त्रेण विलोक्यम्। तच्च स्वस्तिकासूत्रसंपाते नेयम्। यदि नक्षत्रस्य वेधः कृतस्तदा दूरवीक्षणयन्त्रं घटीयन्त्रेण चालयित्वा नक्षत्रं दृक्सूत्रं यथा न जहाति तथा विधेयम्। पुनर्लघुयन्त्रे 'फाइण्डर'-नाम्नि तद् वस्तु तन्नक्षत्रं वा विलोक्यम्। यदि तत् स्वस्तिकासूत्रसंपात एव दृश्यते तदा नास्ति संस्कारस्यापेक्षा। अन्यथा चापेक्षा।

बृहद्यन्त्रेषु संस्कारस्यास्य संपादनस्य प्रबन्धो लघुदूरवीक्षणयन्त्रवहानां कण्टकानां शनैः शनैश्चालनात् कृतो भवति। यत्र च यन्त्रे नास्त्येतादृशः प्रबन्धस्तत्र प्रायशः स्वस्तिकासूत्राणि चालयित्वा संस्कारोऽयं संपाद्यते।

(२) संस्कारस्यास्य संपादनाय सति संभवे निरक्षखमध्यगतं किंचिन्नक्षत्रमपेक्ष्यते। व्यवहारे तु यस्य कस्यचिदपि निरक्षधरातलासन्नस्य (अल्पक्रान्तेरित्यर्थः) याम्योत्तरासन्नस्य नक्षत्रस्य ग्रहणं क्रियते। तस्य वेधद्वयं संपाद्यते। प्रथमस्तु पूर्वकपाले यदा नक्षत्रं याम्योत्तर-वृत्तासन्नं भवति तदा, द्वितीयश्च पश्चिमकपाले क्रान्त्यक्षं वृत्तार्द्धमितं परिभ्राम्य। उभयथापि वेधे वेधकालो लेख्यः। व्यवहारे तु पूर्वकपालीयस्य वेधस्य संपादनाय गणितनिर्धारितनक्षत्र-कालतः पूर्वमेव घटीयन्त्रं चाल्यते। इष्टस्थाने च तस्य गतिनिरोधं कृत्वा समयो गृह्यते। एवमेवापरकपालेऽपि क्रियते। एवं कृते वेधाशुद्धिः स्वल्पतमा भवति। उभयथापि वेधे घटीचक्राणां मानं ज्ञेयम्। एवं कृते वेधद्वयस्य घटीयन्त्रजन्यं कालान्तरं द्वादशाहोरायुतेन घटीचक्रकालान्तरेण तुल्यं चेत्तर्हि नावश्यकता संस्कारस्य। अतुल्यकलाविकलयोरन्तरार्धं संस्कारार्थं ग्राह्यम्। उदाहरणम्–कस्यचिन्नक्षत्रस्य वेधपरिणामोऽधो लिखितो वर्तते—

कपालः	घटिकासमयः			घटीचक्रसमयः		
	हो	क	वि	हो	क	वि
पूर्वः	१६	१२	५८.८	०	६	५.१
पश्चिमः	१६	१८	८.७	१२	१३	०.५
		६	१०.६		६	९.५

अशुद्धिः १.४″ संस्कारमानम् =.७″

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयं संस्कारस्तावद् यन्त्रनिर्मात्रैव संपादितो भवति। अतो नास्ति बहुधा प्रबन्धोऽस्य संस्कारस्य संपादनस्य। मुख्यनलिकाधः पत्रादिदानेनास्य संस्कारस्य संपादनं क्रियते।

(३) संस्कारोऽयं यन्त्रकृता सुसंपादितोऽपि भवति। तथाप्येतद्विषयिका त्रुटिः प्रकारद्वयेन परीक्ष्यते। प्रथमं तावत् 'स्पिरिटलेवल'-नामकेन यन्त्रेण क्रान्त्यक्षः क्षितिजधरातल-समान्तरः कर्तव्यः। तत्र घटीचक्रस्य मानं लेख्यम्। पुनः क्रान्त्यक्षश्चक्रार्धचालनेन यन्त्रसाहाय्येन च क्षितिजधरातलसमान्तरतां नेयः। इदानीमपि घटीचक्रस्य मानं ज्ञेयम्। यदि मानस्यास्य पूर्वतनस्य चान्तरं द्वादशहोरातुल्यं तदा यन्त्रं त्रुटिरहितं ज्ञेयम्। अन्यथाऽशुद्धं भवति। यदि क्रान्त्यक्षः संस्कारप्रतिपादकैः 'स्क्रू'-नामधेयैः कण्टकैः सहितः स्यात्तदाऽशुद्ध्यर्धमितं संस्कारं घटीयन्त्रे दत्त्वा क्रान्त्यक्षः क्षितिजसमान्तरे धरातले नेयः। पुनः परीक्षितेऽन्तरं द्वादशहोरा-तुल्यं भाव्यम्।

इयमशुद्धिः प्रकारान्तरेणापि परीक्षिता भवति। ध्रुवासन्नस्य (अधिकक्रान्तिमतः) कस्यचिन्नक्षत्रस्य कपालद्वयेऽपि वेधो याम्योत्तरवृत्तधरातलासन्नस्य कर्तव्यः। वेधद्वयेऽपि घटी-यन्त्रसमयो घटीचक्रसमयश्च लेख्यः। यदि क्रान्त्यक्षस्य प्राचीभागोऽधिकः समुन्नतस्तदा नक्षत्रस्य याम्योत्तरवृत्तधरातले समागमो विलम्बेन पश्चिमभागसमुन्नतौ च पूर्वमेव भवतीति। अतो त्रुटिसत्त्वे द्वितीयकपालवेधे त्रुटिर्द्विगुणा भवति। त्रुट्यर्द्धस्य च संस्कारः पूर्ववद्देयः। तत्र यदि घटीयन्त्रसमयान्तरं 'अं', घटीचक्रसमयान्तरं 'अं'' नक्षत्रक्रान्तिश्च 'क्रां' तदाऽशुद्धिः $= \frac{\text{अं} - \text{अं}'}{\text{२ स्पक्रां}}$

(४-५) एतद्विषयकमशुद्धिज्ञानं संस्कारप्रतिपादनं च वेधेनैकेनैव भवितुमर्हति। याम्योत्तरासन्नस्य कस्यचिन्नक्षत्रस्य कपालद्वयेऽपि वेधः कर्तव्यः। वेधेनोभयथापि नक्षत्रस्य द्युज्यामानं ज्ञेयम्। मानद्वययोगस्यार्द्धं मध्यममानत्वेन ग्राह्यम्। तस्मिन् माने 'रिफ्रेक्शन'-नामकः संस्कारो देयः। मानस्यास्य तुलना नाविकपञ्चाङ्गप्रतिपादितेन मानेन कर्तव्या। यदि नक्षत्रं ध्रुवत उच्चतरम्, यान्त्रिकी द्युज्या च वास्तवद्युज्यातोऽधिकतरा (वास्तवद्युज्याज्ञानं नाविकपञ्चाङ्गतो भवति) तदा यान्त्रिकं ध्रुवं वास्तवध्रुवाद् नतं भवति। तच्च संस्कारकण्टक-परिचालनद्वारेण ध्रुवाक्षमुन्नमय्य संस्कृतं भवति। एवं कृते ध्रुवाक्षोन्नतांशे संस्कारः पञ्चमः संपद्यते। ४१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्थसंस्कारार्थं तावद् वेधद्वयागतद्युज्ययोरन्तरं ग्राह्यम्। तन्मितैव क्रान्तिचक्रस्याशुद्धिः। संस्कारकण्टकपरिचालनेन क्रान्तिचक्रे संस्कारः कर्तव्यः। इमे सर्वेऽपि संस्कारा असकृत् संपादनीया येनाशुद्धिः शून्यासन्नतां गच्छेत्।

(६) एतद्विषयकाशुद्धिज्ञानार्थं कस्यचिन्नक्षत्रस्य–यस्य द्युज्या नातिस्वल्पतरा–क्षितिजासन्नकाले वेधेन द्युज्याज्ञानं कर्तव्यम्। अस्यां द्युज्यायां 'रिफ्रेक्शन'–नामकः संस्कारः कर्तव्यः। एवं कृते नाविकपञ्चाङ्गस्थेन द्युज्यामानेनास्य मानस्य तुलना कर्तव्या। यदि नक्षत्रं पूर्वकपाले वर्तते यान्त्रिका द्युज्या च नाविकपञ्चाङ्गस्थद्युज्यामानतोऽधिका तदा यान्त्रिकः सौम्यध्रुवो वास्तवध्रुवात् पश्चिमे भवति। यन्त्रं चाशुद्धिमितं तदा पूर्वाभिमुखं संचाल्य संस्कारः प्रतिपादनीयः। 'ग्रब'–महाशयस्तु संस्कारस्यास्य प्रतिपादनार्थं तुल्यद्युज्यकस्य नक्षत्रद्वयस्य तुल्यनतकाले एकस्य पूर्वनतत्वेऽपरस्य चापरनतत्वे वेधं प्रतिपादयति। यदैकस्य वास्तवक्रान्तिर्यान्त्रिकक्रान्तितो यावदधिका न्यूना वा तावदेवाधिका न्यूना वा द्वितीयस्य तदवधि संस्कारेण यन्त्रस्य शुद्धिः कर्तव्या।

(७) एवं सर्वप्रकारेण शुद्धे यन्त्रे कस्यचिदपि निरक्षधरातलीयनक्षत्रस्य वेधेन घटीचक्रे वास्तवयान्त्रिकनाक्षत्रकालयोरन्तरमितं संस्कारं दत्त्वा यन्त्रः शोध्यते। व्यवहारे तु कालविशेषे गणितेन नक्षत्रस्य नाक्षत्रकालो ज्ञायते। तत्कालात् किंचित्पूर्वमेव नाक्षत्रघटीयन्त्रसाहाय्येन नाविकपञ्चाङ्गसाहाय्येन च घटीचक्रे नाक्षत्रनतकालतुल्यकालं कृत्वा नक्षत्रस्य वेधः कर्तव्यः। यान्त्रिकं घटीयन्त्रं चालयित्वा नक्षत्रं दृष्टिसूत्रे स्थिरीकर्तव्यम्। एवं कृत्वाभीष्टे काले (यदा गणितेन नक्षत्रस्य नाक्षत्रकालो ज्ञातः) यान्त्रिकं घटीयन्त्रं गतिशून्यं कृत्वा घटीचक्रकालो ज्ञातव्यः। यदि स गणितागतकालाद् भिन्नस्तदाऽशुद्धिमितान्तरेण घटीचक्रं शोध्यम्। असकृत् संपादनेनास्य संस्कारेण घटीचक्रं शुद्धिं याति।

वस्तुतस्तु सर्वेऽपीमे संस्कारा असकृत् संपादनीयाः। एभिः संस्कारैः संस्कृतमेव यन्त्रं वस्तुतो ग्रहनक्षत्रादिवेधमशुद्धिरहितं संपादयति॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नागार्जुनाचार्यस्तस्य सुहल्लेखश्च

श्रीभरतसिंह उपाध्यायः

नागार्जुनस्य नाम भारतीयसाहित्यदर्शनेतिहासे प्रसिद्धमस्ति। शून्यवाद्याचार्यरूपतया तदीयकीर्तिकला न खलु भारतस्यैव, अपि तु चीन-तिब्बत-मंगोलियादेशानामितिहासपृष्ठेष्वपि लिख्यन्ते। स उत्तरकालिकबौद्धधर्मस्यैकोऽद्भुतः साधको विवेचकश्चासीत्। असौ महायान-बौद्धधर्मस्य माध्यमिकशाखायाः प्रतिष्ठापक आचार्य आसीत्। वैद्यस्य तान्त्रिकस्य च, उद्भट-विचारकस्य तार्किकस्य च, कवेः सार्वभौमविदुषश्च, साधकस्य मानवताप्रणयिनश्च नागार्जुनस्य सर्वतोमुख्या प्रतिभया भारतस्य तदन्यकतिपयदेशानां च साधनाभूमयो विभासिता वर्तन्ते।

सप्तमशताब्द्यां वर्तमानेन 'युआन्–चुआङ्'–महोदयेन उत्तरकालिकबौद्धधर्मस्य प्रतिभाशालिनश्चत्वार आचार्याः संसारोद्भासकाश्चत्वारः सूर्या इवोत्प्रेक्षिताः। तेषामन्यतम आचार्यो नागार्जुनः। तदन्ये च अश्वघोष आर्यदेवः कुमारलब्धः (कुमारलातः) चेति त्रयो वर्तन्ते। नागार्जुनाचार्यजीवनेतिवृत्तनिरूपणस्य निश्चितसामग्री नास्माभिरुपलभ्यते। तदीय-कालनिवासस्थानयोर्याः सूचना उपलभ्यन्ते तास्वतीव वैविध्यं वर्तते। तस्य जीवनेतिवृत्तं कुमारजीवेन ४०५ खिष्टाब्दे चीनभाषायामनूदितम्। 'वाटर्स'–मतानुसारमस्य मूलजीवनेति-वृत्तस्य लेखकोऽपि सम्भवतः कुमारजीव एव सिद्ध्यति। नागार्जुनाचार्यजीवनेतिवृत्तज्ञानाय सर्वतोऽधिकः प्रामाणिको मौलिकश्चायमेव ग्रन्थो विद्यते। एतद्व्यतिरिक्तेष्वनेकेषु चीन-तिब्बत-ग्रन्थेषु निरुक्ताचार्यजीवनचर्चा प्राचुर्येणोपलभ्यते, याऽधिकांशतोऽलौकिकतथ्यैः पूर्णा वर्तते। नागार्जुनाचार्यस्य बहुमुखं व्यक्तित्वमादायेयती महती जटिलता प्रादुर्भूता यद् बौद्धदार्शनिकः, तान्त्रिकः, वैद्यः, रासायनिकश्चेति चतस्रो विभिन्ना व्यक्तयो नागार्जुननाम्ना प्रसिद्धा आसन्, तासामैक्यं तु भ्रान्त्या प्रथितमिति विद्वन्मण्डलीषु विचारप्रकारः प्राचरत्। रासायनिकस्य तान्त्रिकस्य च नागार्जुनस्य समयः सप्तमी अष्टमी वा खिष्टशताब्दी मन्यते। तथापि बौद्धदार्शनिको नागार्जुन एव स्वयं तान्त्रिको रासायनिकश्चासीदिति वार्ता तैब्बतपरम्परा-यामियती सुप्रतिष्ठिता वर्तते यस्यां सहसाऽविश्वासे प्रवृत्तिर्न भवति। कुमारजीवेन चीनभाषाया-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनूदिततदीयजीवनेतिवृत्तानुसारं नागार्जुनस्य जन्म विदर्भ-(बरार) देशे ब्राह्मणकुले मन्यते। 'युआन्-चुआङ्'-महोदयेन दक्षिणकोसलदेशस्तस्य जन्मस्थानमङ्गीकृतम्। भौगोलिक-दृष्ट्या उभयोरपि जन्मस्थानवर्णनयोः कोऽपि भेदो नास्ति। वेदचतुष्टयस्य गम्भीरज्ञानमवाप्य तारुण्ये नागार्जुनो भिक्षुपददीक्षामग्रहीत्। तदनन्तरं दक्षिणभारते बौद्धधर्मं प्रचारयतस्तस्य श्रीपर्वते (नागार्जुनी कोंडा, गुण्टूर) अधिकांशः समयो व्यतीतः। लामातारानाथमतानुसारं नागार्जुनेन स्वजीवनकालस्याधिकोंऽशो नालन्दाविद्यापीठे यापितः। कुमारजीवेन वयं विज्ञापिता यद् भिक्षुदीक्षोत्तरं केवलं नवतिदिनैर्नागार्जुनेन समस्तं त्रिपिटकमधीतम्, तदनन्तरं च तेन हिमालये एकस्माद् वृद्धभिक्षोर्महायानसूत्राणि पठितानि। तिब्बतचीनदेशयोरनेकैर्विद्वद्भिर्नागार्जुनस्य जीवनकालो बुद्धपरिनिर्वाणस्य चतुःशताब्द्याः पञ्चशताब्द्या अथवा सप्तशताब्द्या अनन्तरं निर्दिष्टः। तारानाथमतानुसारं नागार्जुनः कनिष्कस्य समकालिक आसीत्। परन्तु अन्यान्यप्रमाणैरेतन्निश्चितं यन्नागार्जुन आन्ध्रनृपस्य १६६-१९६ खिष्टाब्दकालिकस्य यज्ञश्री-गौतमीपुत्रस्य समकालिक आसीत्। आन्ध्रनृपाणां सातवाहनेत्युपाधिरासीत्। तैर्नृपैरीशवीय-पूर्वद्वितीयशताब्दीमारभ्य तृतीयेशवीयशताब्दीपर्यन्तं राज्यमकारि। स्वसुहृदं सातवाहननृपं प्रति पत्ररूपेण नागार्जुनः 'सुहृल्लेख'-रचनामकार्षीत्। यस्मिंस्तेन स्वकीयस्य शून्यतादर्शनस्य सुविशदं विवरणमुपस्थापितम्। नागार्जुनविषयेऽनेका विस्मापिका घटनाः प्रथिताः सन्ति। श्रूयते—चिरायुष्यरहस्यं तैर्विज्ञातमासीत्। कुमारजीवकृतवर्णनानुसारं स वर्षशतत्रयं यावज्जीवन्नासीत्। तैब्बतवर्णनानुसारं तस्य शतषट्कमितमायुरासीत्। एकयाऽन्यपरम्परया तस्य एकोनत्रिंशदधिकपञ्चशतवर्षमितमायुर्विज्ञाप्यते। गिरिशिलानां स्वर्णात्मना परिवर्तनकीर्त्तिरपि नागार्जुनेनार्जिता वर्तते। नेत्रचिकित्सकतया तस्य प्रसिद्धिस्तज्जीवनकाल एव चीनदेशं व्याप्तवती। नेत्ररोगानधिकृत्य तल्लिखितं 'येन्-लुन्'-नामकं पुस्तकं चीनभाषायामुपलभ्यते। 'लुंग्-शु-पु-स-यओ-फँग्'(नागार्जुनबोधिसत्त्वस्य योगाः) नामकं पुस्तकमपि चीनभाषायां लभ्यते। देवआर्यस्य (आर्यदेवस्य) तेन सम्मिलनं नागार्जुनजीवनसम्बन्धिनी एका स्मरणीयघटना वर्तते। आर्यदेव उत्तरकाले तच्छिष्यस्तद्दर्शनप्रवर्धकश्च प्रसिद्ध आचार्यः संवृत्तः। आर्यदेवः सिंहले, उत्तरभारतान्तर्वर्तिधिह्यपुरे वा वास्तव्य आसीत्। स नागार्जुनस्य प्रसिद्धिमाकर्ण्य मिलनाय तस्यान्तिकमागमत्। नागार्जुनेन तन्मिलनात्प्राक् स्वशिष्यहस्तेन स्वभिक्षापात्रं जलेनापूर्य आर्यदेवपार्श्वे प्रेषितम्।

आर्यदेवेन तत्रैकां सूचीं निक्षिप्य तत्प्रत्यावर्तितम्। नागार्जुनोऽत्यन्तं प्रासीदत्। अनन्तरं तेनामिलत्, तस्मै स्वशिष्यत्वं च प्रादात्। जलपूर्णपात्रं नागार्जुनस्य पूर्णं ज्ञानमद्योतयत्। आर्यदेवस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्र सूचीनिक्षेपणं च तस्य तत्र साकल्येनावगाहनमसूचयत्। एतादृशमौनव्याख्यानपद्धति-विषये व्यञ्जनात्मिका अनेकघटनाः कबीरादिमहात्मनां जीवनस्मृतिष्वस्माभिरुपलभ्यन्ते। चीनजापानदेशवर्तिनां जैन (=ध्यानी) बौद्धधर्मोपासकानां त्वियमाकर्षिका मौलिकी च रीतिरेवासीत्, यस्या अध्ययनमस्माभिरेशियाव्यापिमहात्मपराम्पराणां तुलनात्मकाध्ययनाय कर्तुमुचितम्।

नागार्जुननाम्ना लिखिता अनेके ग्रन्था अस्माभिरुपलभ्यन्ते, परन्तु निश्चितरूपेण तल्लिखिता विंशतिग्रन्थाश्चीनभाषायामनूदिताः सुरक्षितास्तिष्ठन्ति। तेष्वष्टादशानामुल्लेखः 'बुनियो-नेंजियो'–महानुभावेन स्वीये प्रसिद्धसूचीपत्रे कृतो वर्तते। तस्यातिप्रसिद्धा रचना द्वादश सन्ति, यासां विषयविवरणेन साकं नामान्यधस्तादुद्ध्रियन्ते—

(१) माध्यमिककारिका माध्यमिकशास्त्रं वा (चुंग्–कुआन्–लुन)। महायान-बौद्धधर्मस्य माध्यमिकशाखाया मौलिकग्रन्थेऽस्मिन् शून्यतादर्शनस्य गम्भीरो विचारः।

(२) दशभूमिविभाषाशास्त्रम् (शिह्–चु–पि–पो–श–लुन्)। बोधिसत्त्वस्य दशसु भूमिषु प्रमोदिताविमलानामकयोराद्यभूमिद्वययोर्विवरणं वर्तते।

(३) महाप्रज्ञापारमितासूत्रव्याख्याशास्त्रम् (मो–ह पो–यो–पो–लो–मि–चिंग्–शिह–लुन्)। कुमारजीवेनायं ग्रन्थः ४०५ ईशवीयाब्दे चीनभाषायामनूदितः।

(४) उपायकौशल्यम्। }
(५) प्रमाणविध्वंसनम्। } न्यायसम्बन्धिग्रन्थद्वयमिदम्।

(६) विग्रहव्यावर्तनी। शून्यवादनिरासकयुक्तीनामत्र खण्डनम्।

(७) चतुःस्तवः। चतुर्णां स्तोत्राणामत्र संग्रहः।

(८) युक्तिषष्टिका। शून्यवादसमर्थिकाः षष्टियुक्तयो ग्रन्थेऽस्मिन्।

(९) शून्यतासप्ततिः। अत्र शून्यताविषये सप्ततिः कारिकाः सन्ति।

(१०) प्रतीत्यसमुत्पादहृदयम्। प्रतीत्यसमुत्पादविवेचनमस्मिन्।

(११) महायानविंशकम्। शून्यवादविवेचनमस्मिन्।

(१२) सुहृल्लेखः। अस्य परिचयः पूर्वमेव दत्तः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

खेदोऽयं यन्नागार्जुनाचार्यस्योक्तरचनासु माध्यमिककारिका (माध्यमिकशास्त्रम्), विग्रहव्यावर्तनी चेति रचनाद्वयमेव संस्कृतभाषायां सुरक्षितं वर्तते। रचनान्तराणि सर्वाणि कालकवलितान्यभूवन्। तानि केवलं चीनतिब्बतभाषानुवादात्मनैव सुरक्षितानि वर्तन्ते। इयमेव दशा नागार्जुनस्य प्रसिद्धरचनायाः सुहृल्लेखस्यास्ति। सुहृल्लेखस्य 'आर्यनागार्जुनबोधिसत्त्वसुहृल्लेखः' इति पूर्णं नाम वर्तते। सुहृल्लेखस्य त्रयश्चीनीया एकस्तैब्बतश्चानुवाद उपलभ्यन्ते। सुहृल्लेखस्य चीनीयभाषायां प्रथमोऽनुवादः ४२४–४३१ ईशवीयाब्दे गुणवर्मणा विहितः। द्वितीयोऽनुवादः प्रायः ४३३ ईशवीये सङ्घवर्मणा व्यधायि। 'इ–चिंग्'–महानुभावेन प्रायः ७०० ईशवीये ग्रन्थोऽसौ चीनीयभाषायामन्ववादि। इत्थं चीनीयभाषायां सुहृल्लेखस्यानुवादत्रयमभूत्। 'इ–चिंग्'–महोदयेनालेखि यत् तस्य भारतयात्रासमयेऽस्य देशस्यैकैकेन बालकेन सुहृल्लेखोऽभ्यस्तः। तदधिकवयस्कैश्च पुरुषैः श्रद्धातिरेकेण तस्याध्ययनं मननं च क्रियते स्म। इत्थं प्रथितचरी महत्त्वशालिनीयं रचनाऽद्यत्वे स्वकीयमूलसंस्कृतरूपेण सुरक्षिता नास्तीति महतो दुःखस्य विषयः। तैब्बतानुवादमाश्रित्य 'एच.वेंजेल'–महोदयेन 'जर्नल ऑव पालि टैक्स्ट सोसायटी'-संस्थायाम् १८८६ ईशवीये आंग्लभाषायामियं रचनाऽन्ववादि। तस्मिन्नेवेशवीये महत्त्वपूर्णाया अस्या रचनाया जर्मनभाषायामप्यनुवादः समजनि। केनापि भारतीयेन विदुषा सुहृल्लेखश्चीनीयतिब्बतीयानुवादतः संस्कृतभाषायां हिन्दीभाषायां च परिवर्त्येत चेत्सुमहानुपकारः स्यात्। तथा सति चीनीयास्तिब्बतीयाश्च विचारका ज्ञानगवेषकाश्च यदि भारतमागच्छेयुस्तर्हि किमुत बालकान् प्रौढपण्डितानपि सुहृल्लेखनामानभिज्ञान्नोपलभेरन्निति।

अनुवादकः—

श्रीभूपनारायणझा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पाणिनीयसूत्रपाठान्तरसंकलनम्

श्रीरामशंकरभट्टाचार्यः

दृश्यन्ते खलु प्रायेण पाणिनीयेषु सूत्रेषु पाठान्तराणि। यतो हि शब्दशास्त्रे शब्दस्यैव प्राधान्यमतः पाठान्तराण्यपि महत्त्वपूर्णानीति निश्चप्रचम्। इदमेव मनसि निधाय गतवर्षेऽस्माकं कुलपतिर्विद्याईन्तीचणः श्रीमदय्यरमहोदयो मामादिष्टवान् पाठान्तराणां संकलनाय। तदेवात्र प्रस्तूयते। येभ्यो ग्रन्थेभ्यः पाठान्तराणि संकलितानि तेषां नामानि संक्षिप्तनामानि यथा—

सिद्धान्तकौमुदी = सि०कौ०; लघुशब्देन्दुशेखरः = शब्देन्दु०; माधवीयधातुवृत्तिः = धातुवृत्तिः; पदमञ्जरी = पद०; विवरणन्यासपञ्जिका = न्यासः; काशिका = का०; शब्दकौस्तुभः = शब्दकौ०; क्षीरतरङ्गिणी = क्षीर०। ग्रन्थान्तरेभ्योऽपि संकलनं कृतम्, तेषां कृत्स्नं नाम प्रदत्तमेव[1]।

अत्रेदं विज्ञेयं यदपाणिनीयसम्प्रदायग्रन्थेष्वपि पाणिनिसूत्राणां पाठान्तराण्युपलभ्यन्ते। कृतश्च तेषां संग्रहः, स च कालान्तरे प्रकाशमेष्यति।

पाठान्तरविषये बहवश्चिन्तयितव्या विषया वर्तन्ते। यथा—(१) पाठान्तरकारणम्, (२) पाठान्तरकालः, (३) पाठान्तराणां युक्तायुक्तत्वे च। एते खलु विषया मदीये 'श्रीमद्भगवत्पाणिनिसंमतसूत्रपाठनिर्णय'-नामधेये ग्रन्थे विशदीभविष्यन्तीति निवेद्य विरमामि।

द्विविधानि पाठान्तराणि—मौलिकानि, कृत्रिमाणि च। आदौ मौलिकानि संगृह्यन्ते। पदच्छेदसन्धिन्यासभेदेन यानि पाठान्तराणि तानि कृत्रिमाणीति ज्ञेयम्।

---

१ यत् पाठान्तरं यस्मिन् ग्रन्थे दृष्टं तस्य ग्रन्थस्य नाम तत्र निर्दिष्टम्। नेदं मन्तव्यं यत् पाठान्तरं प्रदत्तग्रन्थस्य प्रणेतुः संमतमेव भवेत्। प्रायेण ग्रन्थकारः पाठान्तरं खण्डयति, यथार्थं पाठमाविष्करोति, क्वचिच्च केवलं पाठान्तरं दर्शयति। आकरग्रन्थनिर्देशार्थमेव ग्रन्थनाम विलिखितम्, न तु किं पाठान्तरं कस्य संमतमिति निर्देशार्थमिति विज्ञेयम्। प्रदत्तग्रन्थेभ्योऽन्येष्वपि ग्रन्थेषु दर्शितं पाठान्तरमुपलभ्यते। तत्तु विस्तरभिया न सर्वत्र लिखितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(क) मौलिकानि पाठान्तराणि

(१) समो गम्यृच्छिभ्याम् । (१ । ३ । २९)
समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः । [का० ; क्षीर० ६८३ भ्वादिः]

(२) आकडारादेका संज्ञा । (१ । ४ । १)
प्राक् कडारात् परं कार्यम् । [भाष्यम्]

(३) विरामोऽवसानम् । (१ । ४ । ११०)
अभावोऽवसानम् । [प्रदीप]

(४) युवा खलतिपलितवलिनजरतीभिः । (२ । १ । ६७)
युवा खलतिपलितवलिनजरद्भिः ।
[क्षीर० परिभाषावृत्तिः २८; न्यास०; पद०]

(५) गुपूधूपविच्छिपणिपनिभ्य आयः । (३ । १ । २८) [सि०कौ०]
गुपूधूपविच्छपणि ······ । [क्षीर०—गुपूधातौ पणधातौ च]

(६) इजादेश्च गुरुमतोऽनृच्छः । (३ । १ । ३६) [सि०कौ०]
इजादेश्च गुरुमतोऽनृछः । [क्षीर०—६ । १५ धातुः]

(७) उषविदजागृभ्योऽन्यतरस्याम् । (३ । १ । ३८) [सि०कौ०]
उषविदजागुरन्यतरस्याम् । [क्षीर० २ । ५५]

(८) जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च । (३ । १ । ५८) [सि०कौ०]
जृस्तन्भु ······ [क्षीर० १ । १०५६; ४ । २२]

(९) स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च । (३ । १ । ८२) [सि०कौ०]
स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुभ्यः श्नुश्च । [क्षीर० १ । ६१६]

(१०) वाऽसरूपोऽस्त्रियाम् । (३ । १ । ९४)
वा सरूप आस्त्रियाम् । [उद्योत]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(११) कृत्याः । (३ । १ । ९५) [सि०कौ०]
कृत्याः प्राङ्ण्वुलः । [का०]

(१२) प्रत्यपिभ्यां ग्रहेः । (३ । १ । ११८) [सि०कौ०]
प्रत्यपिभ्यां ग्रहेश्छन्दसि । [का०]

(१३) अमावस्यदन्यतरस्याम् । (३ । १ । १२२) [का०]
अमावास्यदन्यतरस्याम् । [क्षीर० १ । १०५४]

(१४) आसुयुवपिरपित्रपिचमश्च । (३ । १ । १२६) [सि०कौ०]
आसुयुवपिरपिलपित्रपिचमश्च । [का०]

(१५) श्याद्व्यधास्रुसंस्त्रतीणवसावहृलिहश्लिषश्वसश्च ।
(३।१।१४१) [सि०कौ०]
श्याद्व्यधाश्रुसंश्रतीणव ····· । [प्रक्रियाकौमुदी; तत्त्वबोधिनी]

(१६) प्रुस्रुल्वः समभिहारे वुन् । (३।१।१४९) [सि०कौ०]
प्रुसुल्वः ····· । [बालशास्त्रिसम्पादिता काशिका द्रष्टव्या]

(१७) शक्तौ हस्तिकपाटयोः । (३।२।५४)
शक्तौ हस्तिकवाटयोः । [पद०; सि०कौ०;]

(१८) कव्यपुरीषपुरीष्येषु ञ्युट् । (३।२।६५) [सि०कौ०]
हव्यपुरीष ······ । [अमरकोषस्य क्षीरस्वामिटीका-हव्यवाहनशब्दे]

(१९) अनौ कर्मणि । (३।२।१००) [सि०कौ०]
अनौ कर्मणः । [क्षीर० ४।४२]

(२०) अर्हः प्रशंसायाम् । (३।२।१३३)
अर्हः पूजायाम् । [क्षीर० अर्हधातुः]

(२१) आकेस्तच्छीलतद्धर्मतत्साधुकारिषु । (३।२।१३४) ४९
प्राक् केः ······· । [भाष्यम् ३।२।१७८]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

(२२) शमित्यष्टाभ्यो घिनुण् । (३।२।१४१) [सि०कौ०]
शमित्यष्टाभ्यो घिनिण् । [क्षीर० ४।६२]

(२३) निन्दहिंसक्लिशखादविनाशपरिक्षिप ····· । (३।२।१४६)
निन्दहिंसक्लिशखादविनाशि ····· । [पद०; बालमनोरमाटीका]

(२४) सूददीपदीक्षश्च । (३।२।१५३)
सूददीपदीक्षां च । [क्षीर० पूदधातुः १।२५]

(२५) जल्पभिक्षकुट्टलुण्टवृङः षाकन् । (३।२।१५५)
जल्प ···· लुण्ठ ··· न् । [क्षीर० लुण्ठधातुव्याख्यायां सूत्रमिदं क्षीरस्वामिना पठितमतो लुण्टस्थाने लुण्ठपाठः क्षीरस्वामिसंमत इति प्रतिभाति ।]

(२६) सनाशंसभिक्ष उः । (३।२।१६८) [सि०कौ०]
सनाशंसभिक्षामुः । [क्षीर० शसिधातुः]

(२७) लृट् शेषे च । (३।३।१३)
लृट् शेषे । [उद्द्योत ; प्रदीप]

(२८) एरच् (३।३।५६) [सि०कौ]
एरजण्यन्तानाम् । [कैयट० ३।१।६७; का० ६।१।१६०]

(२९) अन्तर्घनो देशे । (३।३।७८) [सि०कौ०]
अन्तर्घणो देशे । [का०; सि०कौ०]

(३०) व्रजयजोर्भावे क्यप् । (३।३।९८) [सि०कौ०]
वृजयजो ······ । [बालमनोरमा]

(३१) विभाषाख्यानपरिप्रश्नयोरिञ्च । (३।३।११०)
प्रश्नाख्यानयोरिञ्च । [क्षीर० ८।१०]

५० (३२) अध्यायन्यायोद्यावसंहाराश्च । (३।३।१२२) [सि०कौ०]
अध्यायन्यायोद्यावसंहाराधारावायाश्च । [का०]

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(३३) स्वाङ्गे तस्प्रत्यये कृभ्वोः । (३।४।६१) [सि०कौ०]
स्वाङ्गे तस्प्रत्यये कृभुवोः । [क्षीर० ८।१०]

(३४) टित आत्मनेपदानां टेरे । (३।४।७९)
टिदात्मनेपदानां टेरे । [प्रदीप]

(३५) टिड्ढाणञ् ······ करपः । (४।१।१५)
टिड्ढाणञ् ······ करप्ख्युनाम् । [का०; क्षीर० ७ परि०]

(३६) प्राचां ष्फ तद्धितः । (४।१।१७)
प्राचां ष्फस्तद्धितः । [न्यासग्रन्थस्य संपादककृता टिप्पणी]

(३७) केवलमामकभागधेयपापापरसमानार्यकृत-
सुमङ्गलभेषजाच्च । (४।१।३०) [शब्दकौ०]
केवल ···· पापावर ····· च्च । [पदमञ्जरी]

(३८) वृषाकप्यग्निकुसितकुसिदानामुदात्तः । (४।१।३७) [सि०कौ०]
'ये तु कुसीद इति मध्ये गुरुमधीयते·······' [पद०]
'एतेन कुसीदशब्दं मध्यदीर्घं पठन्तः परास्ताः' [शब्दकौ०]

(३९) दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्डेविद्धिभ्योऽन्यतरस्याम् । (४।१।८१)
'पाठान्तरे तु कण्ठे विद्धमस्य कण्ठे वा विद्धः कण्ठविद्धः' [शब्दकौ०]

(४०) विकर्णशुङ्गच्छगलाद् वत्सभरद्वाजात्रिषु । (४।१।११७) [सि०कौ०]
विकर्णशुङ्गाच्छगलाद्······· । [का०; शब्दकौ०]

(४१) कल्याणादीनामिनङ् । (४।१।१२६) [सि०कौ०]
कल्याणादीनामिनङ् च । [सि० कौ० मोतीलालबनारसीदास—
संस्करणे, भाग २ पृ० ३१६]

५१

(४२) चटकाया ऐरक् । (४।१।१२८) [सि० कौ०]
चटकादैरक् । [न्यास०; शब्दकौ०]

७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(४३) कम्बोजाल्लुक्। (४।१।१७३) [सि०कौ०]
काम्बोजाल्लुक्। [शब्दकौ०]

(४४) लाक्षारोचनाट्ठक्। (४।२।२) [सि०कौ०]
लाक्षारोचनाशकलकर्दमाट्ठक्। [का०]

(४५) सास्मिन् पौर्णमासीति। (४।२।२१) [सि०कौ]
सास्मिन् पौर्णमासीति संज्ञायाम्। [का० ४।२।२१]

(४६) ग्रामजनबन्धुभ्यस्तल्। (४।२।४३) [सि०कौ०]
ग्रामजनबन्धुसहायेभ्यस्तल्। [का०]

(४७) द्युप्रागपागुदक्प्रतीचो यत्। (४।२।१०१)
द्युप्रागवागुदक्·····। [शब्दकौ०]

(४८) अमावास्याया वा (४।३।३०)
अमावस्याया वा। [तत्त्वबोधिनी; पद०; न्यास०]

(४९) श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखा-
षाढाबहुलाल्लुक्। (४।३।३४)
श्रविष्ठा ···· स्वाती ···· लुक्। [माधवीयधातुवृत्तिः–अतिधातुः]

(५०) विदूराञ्ञ्यः। (४।३।८४)
विडूराञ्ञ्यः। [प्रक्रियासर्वस्वम्-तद्धित०४११]

(५१) आयुधजीविभ्यश्छः पर्वते। (४।३।९१)
आयुधजीविभ्यश्छः पर्वतात्। [शब्देन्दु०]

(५२) तूदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। (४।३।९४) [सि०कौ०]
तूदीशलातुर·····। [का०]

(५३) क्षुद्राभ्रमरवटरपादपादञ्। (४।३।११९)
क्षुद्राभ्रमरवटरपदपादञ्। [पद०; शब्देन्दु०; शब्दकौ०]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५४) शाकलाद्वा । (४।३।१२८)
शकलाद्वा । [अष्टाध्यायीवृत्तिः, दयानन्दस्वामिकृता]

(५५) शम्याः ष्ट्लञ् । (४।३।१४२) [का०]
शम्याः ष्लञ् । [शब्देन्दु०]

(५६) मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । (४।३।१४३)
······ अभक्षाच्छादनयोः । [शब्देन्दु०]

(५७) नोत्वद्वर्ध्रबिल्वात् । (४।३।१५१)
नोत्वद्वध्रबिल्वात् । [शब्दकौ०]

(५८) कुलत्थकोपधादण् । (४।४।४)
कुलस्थकोपधादण् । [पद०]

(५९) आकर्षात् ष्ठल् । (४।४।९) [सि०कौ०]
आकषात् ष्ठल् । [तत्त्व०; प्रक्रियासर्वस्वम्]

(६०) विभाषा विवधात् । (४।४।१७) [सि०कौ०]
विभाषा विविधवीवधात् । [का०]

(६१) प्रतिपथमेति ठंश्च । (४।४।४२)
प्रतिपथमेति ठञ् च । [शब्देन्दु०]

(६२) किशरादिभ्यः ष्ठन् । (४।४।५३)
किसरादिभ्यः ष्ठन् । [शब्देन्दु०]

(६३) बह्वच्पूर्वपदाट्ठच् । (४।४।६४) [अमरटीकासर्वस्वम्]
बह्वच्पूर्वपदाट्ठच् । [का०; बालमनोरमा]

(६४) धुरो यड्ढकौ । (४।४।७७)
धुरो यड्ढकञ् । [शब्देन्दु०]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(६५) परिषदो ण्यः । (४।४।१०१)
पर्षदो ण्यः । [भानुजिकृता अमरकोषटीका–'प्रमथाः स्युः पारिषदाः' इत्यत्र; सि०कौ०–मोतीलालबनारसीदाससंस्करणम्]

(६६) मधोर्ञ च । (४।४।१२९) [काशिका]
मधोरञ् च । [सायणकृतमृग्भाष्यम् १।९०।६]

(६७) सहस्रेण संमितौ घः । (४।४।१३५)
सहस्रेण समितौ घः । [का०]

(६८) कंसाट्टिठन् । (५।१।२५)
कंसाट्टिठन् । [उद्योत]

(६९) दण्डादिभ्यो यः । (५।१।६६) [काशिका]
दण्डादिभ्यो यत् । [सि०कौ०]

(७०) कडङ्करदक्षिणाच्छ च । (५।१।६९)
कडङ्गरदक्षिणाच्छ च । [तत्त्वबोधिनी]

(७१) आकर्षादिभ्यः कन् । (५।२।६४)
आकषादिभ्यः कन् । [सि०कौ०, प्र० स्व० तद्धित ८२७]

(७२) सस्येन परिजातः । (५।२।६८)
शस्येन परिजातः । [प्र० स्व० तद्धित ८३१; पद०]

(७३) प्रज्ञाश्रद्धार्चाभ्यो णः । (५।२।१०१)
प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः [का०; मुकुटकृता अमरकोशटीका–वार्ताशब्दः]

(७४) गाण्ड्यजगात् संज्ञायाम् । (५।२।११०)
गाण्ड्यजकात् संज्ञायाम् । [गणरत्नमहोदधिः, अमरटीकासर्वस्वम्, भाग १ पृ० २३; अमरकोशव्याख्या क्षीरस्वामिनः पृ० ८]

(७५) रजःकृष्यासुतिपरिषदो वलच् । (५।२।११२)
रजःकृष्यासुतिपर्षदो वलच् । [पद०; गणरत्नमहोदधि; सि०कौ०]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(७६) एतदोऽन् । (५।३।५)
एतदोऽश् । [प्रदीप; पद०]

(७७) दानीं च (५।३।१८)
इदानीम् । [प्रदीप; उद्योत]

(७८) शाखादिभ्यो यः । (५।३।१०२) [बालमनोरमा]
शाखादिभ्यो यत् । [भाष्य ४।१।२; उद्योत ५।१।२१]

(७९) कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः । (५।४।५०) [सि०कौ०]
अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः । [का०]

(८०) सपत्रनिष्पत्रादतिव्यथने । (५।४।६१) [काशिका]
सपत्रनिष्पत्रादतिव्यधने । [पाठोऽयं क्वचित् कौमुद्यां दृश्यते]

(८१) सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः । (५।४।१२०)
[अमरकोशे १।३।२२ व्याख्यायां रायमुकुट आह–'सुप्रात.......' इति प्रोष्ठपदा भद्रपदाश्च निपातिताः' इति ! अनेन सूत्रमध्ये भद्रपदशब्दः पठित इत्येव गम्यते]

(८२) नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् । (५।४।१२१)
नञ्दुःसुभ्यो हलिशुक्तयोरन्यतरस्याम् । [पद०]

(८३) स्फुरतिस्फुलत्योर्घञि । (६।१।४७)
स्फुरिस्फुल्योर्घञि । [क्षीर० ६।९६]

(८४) विभाषा लीयतेः । (६।१।५१)
लियो वा । [क्षीर० १०।२६६]

(८५) प्रकृत्यान्तःपादमव्यपरे । (६।१।११५) [का०; सि०कौ०]
नान्तःपादमव्यपरे । [पद०; शब्दकौ० १.१.३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(८६) अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च। (६।१।११६)
अव्यादवद्यादवक्रमु ......। [पद०]

(८७) यजुष्युरः। (६।१।११७) [सि०कौ०]
यजुष्युरो। [का०]

(८८) अवङ् स्फोटायनस्य। (६।१।१२३)
अवङ् स्फौटायनस्य। [पद०; शब्देन्दु०]

(८९) आङोऽनुनासिकश्छन्दसि। (६।१।१२६)
आङोऽनुनासिकश्छन्दसि बहुलम्। [का०]

(९०) संपरिभ्यां करोतौ भूषणे। (६।१।१३७)
संपर्युपेभ्यः करोतौ भूषणे। [का०]

(९१) किरतौ लवने। (६।१।१४०) [सि०कौ०]
किरतेर्लवने। [क्षीर० ६।११६]

(९२) विष्किरः शकुनौ वा। (६।१।१५०)
विष्किरः शकुनिर्विकिरो वा। [का०; प्रदीप; उद्योत]

(९३) चूर्णादीन्यप्राणिषष्ठ्याः। (६।२।१३४)
चूर्णादीन्यप्राण्युपग्रहात्। [का०]

(९४) ओजःसहोम्भस्तमसस्तृतीयायाः। (६।३।३)
ओजःसहोम्भस्तपसस्तृतीयायाः। [भाषावृत्तिः]

(९५) स्वाङ्गाच्चेतः। (६।३।४०)
स्वाङ्गाच्चेतोऽमानिनि। [का०; प्रदीप]

५६ (९६) पादस्य पदाज्यातिगोपहतेषु। (६।३।५२)
पादस्य पदाज्यतिगोपहतेषु। [क्षीर० १।३८]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(९७) इष्टकेषीकामालानां चिततूलभारिषु । (६।३।६५)
इष्टकेषीकामालानां चिततूलहारिषु । [धातुवृत्तिः–पृ० १००]

(९८) प्रकृत्याशिषि । (६।३।८३)
प्रवृत्त्याशिष्यगोवत्सहलेषु । [का०; प्रदीप]

(९९) नहिवृतिवृषिव्यधिरुचिसहितनिषु कौ । (६।३।११६)
नहिवृति ······ रुजि ······ क्वौ । [क्षीरवृत्तिः–६।१२३]

(१००) च्छ्वोः शूडनुनासिके च । (६।४।१९)
च्छोः शूडनुनासिके च । [न्यास०]

(१०१) दंशसञ्जस्वञ्जां शपि । (६।४।२५)
दन्शसन्जस्वन्जां शपि । [क्षीर० १।१०३६]

(१०२) जनसनखनां सञ्झलोः । (६।४।४२)
जनखनसनां सञ्झलोः । [क्षीर० ४।४१]

(१०३) ल्यपि लघुपूर्वात् । (६।४।५६)
ल्यपि लघुपूर्वस्य । [पदमञ्जरी]

(१०४) इस्मन्त्रन्क्विषु च । (६।४।९७)
इस्मन्त्रन्क्विप्सु च । [क्षीर० १०।४१]

(१०५) घसिभसोर्हलि । (६।४।१००)
घसिभसोर्हलि च । [का०; पद०; प्रदीप]

(१०६) नित्यं करोतेः । (६।४।१०८)
कुरोतेः । [क्षीर० ८।१०]

(१०७) न शशददवादिगुणानाम् । (६।४।१२६) [तत्त्व० शद्यधातुः]
न शसददवादिगुणानाम् । [सि०कौ०]
न शशद्ददवादिगुणिनाम् । [क्षीर० १।१७]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१०८) जश्शसोः शिः। (७।१।२०)
जशिशसोः शिः। [न्यास०]

(१०९) यजध्यैनमिति च। (७।१।४३)
यजध्वैनमिति च। [सि०कौ०; पद०]

(११०) गोतो णित्। (७।१।९०)
ओतो णित्। [का०; प्रक्रियाकौमुदीटीका]

(१११) ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्। (७।२।५)
ह्म्यन्तक्षणशसजागृणिश्व्येदिताम्। [क्षीर० १।७६३]

(११२) श्र्युकः किति। (७।२।११)
श्र्युकः क्किति। [का०; ३।२।१३६ भाष्यम्]

(११३) धृषिशसी वैयात्ये। (७।२।१९)
धषशसी वैयात्ये। [क्षीर० १।७६३]

(११४) प्रसितस्कभित ··· क्षरितिवमितीति च। (७।२।३४)
प्रसितस्कभित ······ क्षरितिक्षमितिवमित्यमितीति च।
[सि०कौ०]

(११५) सिचि च परस्मैपदेषु। (७।२।४०)
सिचि परस्मैपदेषु। [क्षीर० १।१०१८]

(११६) तीषसहलुभरुषरिषः। (७।२।४८)
तीषुसहलुभरुषरिषः। [का०; प्रदीप ७।२।४९]

(११७) सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। (७।२।४९)
सनी ······ भरज्ञपिसनितनिपतिदरिद्राणाम् [का०; न्यास०

(११८) सेऽसिचि कृतचृतच्छृदतृदनृतः। (७।२।५७)
सेऽसिचि कृतिचृतच्छृदतृदनृतः। [क्षीर० ७।६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(११९) यमरमनमातां सक्च । (७।२।७३)
यमरमनमातां सुक्च । [क्षीर० २।४०]

(१२०) स्मिपूङ्रञ्ज्वशां सनि । (७।२।७४)
स्मिङ्पूङ्रञ्ज्वशां सनि । [क्षीर० ७।२१]

(१२१) ईडजनोर्ध्वे च (७।२।७८)
ईडजनोः स्ध्वे च । [का०]

(१२२) अतो येयः । (७।२।८०)
अतो यासियः । [का०; प्रदीप]

(१२३) किमः कः । (७।२।१०३)
इमः कः । [न्यासः]

(१२४) परिमाणान्तस्याऽसंज्ञाशाणयोः । (७।३।१७)
परिमाणान्तस्याऽसंज्ञाशाणकुलिजानाम् । [का०]

(१२५) लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने । (७।३।३९)
लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपाटने । [क्षीर० २।४६]

(१२६) ष्ठिवुक्लमुचमां शिति । (७।३।७५)
ष्ठिवुक्लम्वाचमां शिति । [का०; तत्त्व०]

(१२७) इषगमियमां छः । (७।३।७७)
इषुगमियमां छः । [का०; दैवम्-पृ० १००]

(१२८) भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् । (७।४।३)
भ्राजभासदीपजीव ······· । [क्षीर० मीलधातुः]

(१२९) लोपः पिबतेरीच्चाभ्यासस्य । (७।४।४) [का०] ५९
लोपः पिबतेरोच्चाभ्यासस्य । [क्षीर० १।६७२]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१३०) नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । (७।४।८४)
नीग्वन्चुस्रन्सु .... स्कन्दाम् । [क्षीर०]

(१३१) अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् । (७।४।९५)
अत्स्मृदृत्वर .... । [सि०कौ० पृ० २८८]

(१३२) आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । (८।२।१२)
आसन्दीवदष्ठीवच्चक्रीवद्रुमण्वच्चर्मण्वती । (उद्योत ६।१।३७)

(१३३) कृपो रो लः । (८।२।१८)
कृपे रो लः । [क्षीर० १।३६६; तत्त्व०]

(१३४) दादेर्धातोर्घः । (८।२।३२)
दादेर्घः । [क्षीर० १।१०४०]

(१३५) ल्वादिभ्यः । (८।२।४४)
ल्वादिभ्यश्च । [क्षीर० ६।१३; अमरटीकासर्वस्व-भाग २ पृ० २६६]

(१३६) वसुस्रंसुध्वंस्वनडुहां दः । (८।२।७२)
वसुस्रंसुध्वंस्वनडुहो दः । [क्षीर० १।३६०]

(१३७) न भकुर्छुराम् । (८।२।७९)
न भकुरुछुराम् । [क्षीर० ६।७६]

(१३८) नपरे नः । (८।३।२७)
नपरे न । [न्यासः-भाग २ पृ० १०४६]

(१३९) सदिरप्रतेः । (८।३।६६)
सदेरप्रतेः । [क्षीर० १।२०७]

१० (१४०) अवाच्चालम्बनाविदूर्ययोः । (८।३।६८)
अवादौजित्यालम्बनाविदुर्ययोः । [क्षीर० ष्टभिधातुः]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१४१) प्रष्ठोऽग्रगामिनि । (८।३।९२)
प्रष्ठोऽग्रगामिणि । [न्यासः–भाग २ पृ० १०८८]

(१४२) सदेः परस्य लिटि । (८।३।११८)
सदिष्वञ्जोः परस्य लिटि । [का०]

(१४३) वमोर्वा । (८।४।२३)
व्मोर्वा । [क्षीर० २।२]

(१४४) वा निंसनिक्षनिन्दाम् । (८।४।३३)
वा निक्षनिंसनिन्दाम् । [क्षीर० १।६८६]

(ख) कृत्रिमाणि पाठान्तराणि

(१) स्थानेऽन्तरतमः । (१।१।५०)
स्थानेऽन्तरतमे । [भाष्यम्]

(२) विशेषणानां चाजातेः । (१।२।५२)
विशेषणानां च अजातेः । [शब्दकौ०; का०]
· · · · · च आजातेः । [भाष्यम्]

(३) अनुपसर्गाज्ज्ञः । (१।३।७६)
अनुपसर्गाद् ज्ञः । [शब्दकौ० १।१।८]

(४) मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य (३।१।६)
······ दीर्घश्च अभ्यासस्य । [भाष्यम्]
······ दीर्घश्च आभ्यासस्य । [सि०कौ०]

(५) काम्यच्च । (३।१।९)
चकाम्यच्च । [भाष्यम्]

(६) तदो दा च । (५।३।१९)
तदोऽदा च । [प्रदीप]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(७) [1]इन्द्रे च। (६।१।१२४) [सि०कौ०]
इन्द्रे च नित्यम्। [का०]

(८) [1]प्लुतप्रगृह्या अचि नित्यम्। (६।१।१२५) [सि०कौ०]
प्लुतप्रगृह्या अचि। [का०]

(९) भ्यसो भ्यम्। (७।१।३०)
भ्यसोऽभ्यम्। [का०]

(१०) दो दद् घोः। (७।४।४६)
[अत्र 'दद्'-स्थाने दथ्, दद्, दध्—इत्येवं पदच्छेदा भवन्ति, स्वीकृताश्च ते विभिन्नैर्व्याख्यातृभिः।]

(११) उपसर्गादनोत्परः। (८।४।२८)
उपसर्गाद्बहुलम्। [का०]

इदं कृत्रिमपाठान्तरसंकलनमपूर्णम्, यतो ह्यस्मिन् विषये व्याख्यातृवच एव प्रधानं न तु पाणिनीयम्। अतो दिङ्मात्रमुदाहृतम्।

पाठान्तरसंकलनविषयेऽयं प्रथमः प्रयासः, अत इदं संकलनमपूर्णमिति मन्तव्यम्। कदाचिदत्र स्खलनमपि संजातमिति मन्ये। आशासे यदपरेऽपि विद्वांसोऽस्मिन् विषये पूर्णाङ्ग-विचाराय प्रयतिष्यन्तीति॥

---

१ परसूत्रीयपदाकर्षणमूलकमिदं पाठान्तरम्। अस्य उदाहरणान्तरम् ८।१।७३ सूत्रे द्रष्टव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैदिकं वाग्विज्ञानम्

श्रीवैद्यनाथशास्त्री

चैतन्यविशिष्टः प्राणी सृष्टिकुलचूडामणिश्चायं मानवो जगत्यस्मिन्निति सुविज्ञातमसन्दिग्धं च विपश्चिदपश्चिमानाम्। अस्य सुविस्तृतश्चेतनाव्यापार एव विचार इति संज्ञां लभते। स च पुनर्बुद्धितत्त्वस्य गौचरिकविषयत्वं प्रतिपद्यमानो ज्ञानकोटिमारोहति। बहिर्जगति यथा सर्वाणि कर्मेन्द्रियाणि ज्ञानेन्द्रियाण्येवानुसरन्ति तथैवान्तर्जगति विद्यन्तेऽन्तरिन्द्रियाण्यपि आन्तरिकं कार्यं संपादयितुमिति। एतान्येवान्तरिन्द्रियाणि अन्तःकरणानीति तन्त्रेषु परिभाषितमस्ति। तानि पुनरेतानि प्रेरकमात्मानमेवाधिष्ठाय परस्परमनुसरन्ति। शास्त्रदृष्ट्या चतुष्टमन्तःकरणानाम्। तच्च—मनः, बुद्धिः, चित्तम्, अहङ्कार इति भेदेन व्याक्रियते। चतुर्ष्वेतेषु मनः सर्वाः कल्पनाः सृजति। चित्तं च ताभ्यो मूर्त्तरूपं प्रदाय विवेचनार्थं बुद्धौ समर्पयति। यतो हि बुद्धिरेव तर्क-वितर्काभ्यां कस्यचिद्विषयस्योपादेयानुपादेयत्वे व्यवस्थापयितुं समर्था। संपद्यमानायां व्यवस्था-यामात्मा समुपादेयमुपादत्ते करोति च तदात्मसात्, जहाति पुनरनुपादेयं हेयमिति बुद्धितत्त्वस्य गौचरिकं विषयज्ञानं यावत्तु मानवीयेषु मस्तिष्केषु समवतिष्ठते तावदिदं विचार-संस्कारस्य स्वरूपमेव भजते। यदा खलु तद्बौद्धिकं विषयज्ञानमयमात्माऽन्यान् प्रति प्रेषयितुं प्रकटयितुं वा चेष्टते तदेदं व्यक्तभाषामाध्यमेनैव तेन कर्त्तुं शक्यते नान्यथेति। एवं बुद्धेर्गौच-रिकं विषयज्ञानमेव मस्तिष्के विचारसंस्कारत्वं लभमानं बाह्यजगति प्रकटीकरणेन व्यक्तभाषारूपं लभते। भाषा खलु बाह्यो विचारः, विचारः पुनरान्तरिकी भाषेति द्वयोरेकरूपत्वम्। व्यक्त-रूपेण प्रयुज्यमाना वागपि अस्माभिरन्तर्जगति व्यक्तीकर्त्तुं शक्यते क्रियते चापि। आन्तरिके जगति समव्यक्तरूपेण कार्यं कुर्वतीनां वाणीनामपि पुनः स्तरत्रयं समवस्थानत्रयं वा दृश्यते। ऋग्वेदीयः १।१६४।४५[1] मन्त्रो विषयमेनं साकल्येन प्रस्फोटयति। वाचश्चत्वार्यवस्थानानि विद्यन्ते। ज्ञानवतां मनस्विनामेव तेषां सम्यग्ज्ञानं नान्येषाम्। एतेष्ववस्थानेषु त्रीणि खल्वा-

---

१ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। त्रीणि गुहा निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ [ऋ० १।१६४।४५]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भ्यन्तरे जगति गुप्तानि समव्यक्तरूपेणान्तर्हितानि सन्ति। वाचश्चतुर्थमवस्थानमेव मानुषाणां व्यक्तभाषणे श्रवणे वा संघटते। शब्दान्तरेण पारिभाषिकरूपेणैतानि वाचः पदानि—परा, पश्यन्ती, मध्यमा, वैखरीति नामभिः प्रयुज्यन्ते। अन्तराले समुद्भूतैर्वेपनैः सर्वासु दिक्षु विसरणं लभमाना जगति विस्तरं लभते हीयमित्यस्या वैखरीत्वं यथार्थम्। अन्याश्च पुनरान्तरिके जगति समव्यक्ताः। अतः सूक्ष्मसूक्ष्मतरसूक्ष्मतमरूपेणावस्थिताः क्रमशो मध्यमा परा पश्यन्तीति समभिख्यया व्यवह्रियन्ते। एतासां वाणीनां नामसार्थकत्वं विज्ञानपरत्वं चास्ति। वैखर्या वाण्याः कथं क्रमिको विकास इति ज्ञातुं विचारकैः पाणिनीयं[1] शिक्षावचनमनुचिन्तनीयम्। यदा खल्वयमात्मा बुद्धिमाध्यमेन ज्ञातव्यं मूर्त्तं वस्तु प्रति आकृष्टः, तत्स्पष्टयितुं मनः सुषुम्णा-केन्द्रगं माध्यमत्वेन नियोजयति तदा तस्य प्रेरणा प्राणिकीमूष्माणम् (Animal-Heat) आहन्ति, तेन मारुतो वायुः प्रचरति। स चायमुरसि चरन्, उदानरूपेण बहिरागच्छन्, कण्ठे संलग्नानि स्वरतन्त्राणि (Vocal Cards) संघट्टयन्, मन्द्रान् स्वरान् समुत्पादयति। अयं स्वरो झंकृतिरूपेण तालौ जिह्वाया विविधेषु भागेषु स्पर्शं कुर्वन् शब्दरूपेण परिवर्तते। अत्र प्रसङ्गतः शब्दोत्पादने हेतुभूतस्य मारुतस्य विषये किंचिद्विचार्यते। तत्र अथर्वणि ५।३०।१०[2] मन्त्रवर्णः समुट्टङ्कयति यद् बोधप्रतिबोधौ वा ऋषी प्राणानां गोप्तारौ शरीरे स्वकार्यं कुर्वतः, एतौ नक्तंदिनं जाग्रतः सावधानतया कार्यं संपादयतश्च। मारुतस्तु लोके 'अद्रिजन' इत्येवं कथ्यते। एतौ प्राणोदानावेव बोधप्रतिबोधौ वस्तुतः। प्राणो वैदिकभाषायां 'वरुणः', आयुर्वेदे पुनः 'विष्णुपदामृतम्' इति नाम्ना प्रसिद्धोऽस्ति। विषयेऽस्मिन् शार्ङ्गधरसंहितायां[3] पञ्चमेऽध्याये यदलेखि ग्रन्थकृता तत्सुतरां प्रचुरं प्रकाशं प्रक्षिपति। नाभिदेशपर्यन्तं लब्धप्रचारः प्राणो हृत्पङ्कजं संस्पृशन् कण्ठद्वारेण बहिर्निःसरति। हेतोरस्माद् यद् विष्णुपदामृतं पातुं शक्नुयात्।

---

१ आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥ मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।

२ ऋषी बोधप्रतिबोधावस्वप्नो यश्च जागृविः। तौ ते प्राणस्य गोप्तारौ दिवानक्तं च जागृताम्॥ [अथर्व ५।३०।१०]

३ नाभिस्थः प्राणपवनः स्पृष्ट्वा हृत्कमलान्तरम्। कण्ठाद्बहिर्विनिर्याति पातुं विष्णुपदामृतम्॥ पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः। प्रीणयन् देहमखिलं जीवयन् जठरानलम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स च पुनरन्तर्लोकात् (Ethereal Space) प्राणवायकममृतं गृहीत्वा वेगेन परावर्त्तते। तर्पयति च सकलानि मानवशरीराणि सजीवीकुर्वन् जाठराग्नेः रससीकरान्। विचारो ज्ञानं भाषेति त्रयमेतत् परस्परं नित्यतया सम्बद्धम्। नास्त्यत्रान्यतमः कार्यक्षमोऽन्यस्यैककस्य साहाय्यं विना। संमतं चैतत् पाश्चात्यानां[1] भाषाविज्ञानविशारदानामपि।

तासु पूर्वोक्तासु वाक्षु मध्यमा अन्तर्मुखी न कैश्चिद्भौतिककर्णमाध्यमेन श्रोतुं शक्या, अन्यान् प्रति वाग्व्यवहारेण प्रेषितुं समर्था वा भवति। अस्या उद्गमस्थानं सुषुम्णाकेन्द्रम्। शरीरविज्ञानविचारकैर्मस्तिष्कादारभ्य सुषुम्णापुच्छपर्यन्तं सम्यग्विचार्यते। ग्रीवाया अन्तिमात् कशेरुकादुपरि सुषुम्णाशिखरं (Madulla Oblongata) विद्यते, तत्र मस्तिष्ककल्यस्याऽऽज्ञाचक्रस्य वा अवस्थितिः। शिखरादस्मादधस्ताद् मूलाधारात्कटिभागादुपरिष्टात् सौरचक्रमपि किंचिदधो विहाय सुषुम्णाया उपरि भागे गुहायामनिःस्वनमनिर्घोषं यः स्वरव्यञ्जनपरिपूर्णः शब्दराशिर्निर्मीयते स एव मध्यमा वागिति समुच्यते। प्रवचनसाहित्यान्तर्गतासूपनिषत्सु यत्र तत्र [2]गुहाशब्दस्य बहुधा गुप्तहृदयार्थकः प्रयोगो दृश्यते। इदमेव 'गुप्तहृदयम्' लघुमस्तिष्कशब्देनाधुना

---

१ We never meet with articulate sounds except as wedded to determinate ideas, nor do we ever meet with determinate ideas except embodied forth in articulate sounds. I therefore, declare my conviction as explicitly as possible that thought in the sense of easoning is not possible without language. (Mex mullor in Science of Language). Without language it is impossible to concieve philosophical nay even any human consciousness—Mr. Sheelling.

२ अस्य ज्योतिर्निहितं गुहायाम्–कठ० १।२।१९; गुहाहितं गह्वरेष्ठं पुराणम्–क० १।२।१२; गुहां प्रविश्य तिष्ठन्तम्–क० २।१।६; गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति–मुण्डक० ३।२।९; यो वेद निहितं गुहायां परमे व्योमन्–तै० ब्रा० २।१; यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः–क० ३।६।१५; स य एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयः–तै० ६।१; अपगूळं गुहाहितम्–ऋ० १।२३।१४; पश्वा न तायुं गुहा चरन्तं नमो युजानं नमो वहन्तम्–ऋ० १।६५।१; गुहाचरन्ती मनुषो न योषा सभावती विदथ्येव संवाक्–ऋ० १।१६७।३ सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः–ऋ० ४।५८।६; वेनस्तत्पश्यन्निहितं गुहासद् यत्र विश्वं भवत्येकनीडम्–यजु० ३२।८।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समभिख्यायते। यथा च योगिनः पर्वतगुहायां योगं साधयन्ति तथैवान्तर्जगति साधनां कुर्वाणै- र्योगिजनैः पर्वतस्य तत्र च गुहायाः समन्वेषणं कृतम्। मेरुदण्डपदस्य सार्थकत्वमप्यान्तरिकं पर्वतमवलम्ब्यैव सुसाधु नान्यथेति। मानवशरीरेऽस्मिन् कृत्स्ने पृष्ठवंशे पाश्चात्त्यवैद्यानां मतेन सप्तविंशतिः, भारतीयानां च मतेन त्रयस्त्रिंशत् पर्वताः (Vertibrus) स्वीक्रियन्ते। एत एव कशेरुकाभिधायिनः। अस्मिन्नेव मेरुदण्डे सुषुम्णाया अवस्थानम्। एषा सुषुम्णा सूत्राणीव दृश्य- मानानि शाखाबहुलानि परिगृह्य संतिष्ठते। अस्याः शाखानामपि गणना आचार्यैः कृता लभ्यते[1]। पञ्चपर्वेयं शाखासु विभज्यमाना लक्षत्रयमिति यावद् भेदान् प्राप्नोति। शरीरविज्ञानशास्त्वस्याः पञ्चाशत्सहस्रं शाखाभेदमाकूतयन्ति। शिवस्वरोदये[2] खलु द्वासप्ततिसहस्रमस्याः शाखाः परिगणिताः। सर्वाश्चैताः शाखाप्रशाखाभेदैर्दक्षिणतो वामतश्च सकले देहे विस्तरमाप्नुवन्ति। इडा पिङ्गला सुषुम्णा च तिस्रः प्रधानभूता नाड्यः। मेरुदण्डस्य वामत इडायाः, दक्षिणतः पिङ्गलायाः, मध्यतश्च सुषुम्णायाः समवस्थितिः। एका गान्धारीति नाम्ना प्रसिद्धा नाडिकाऽप्यस्ति, या वामेऽक्षिणि गता तत्र परिसमाप्नोति। इडा पिङ्गला सुषुम्णेति तिस्रः प्राणजीवनस्य व्यवस्थापने साहाय्यं विदधति। मानवशरीरे सा चेयमिडा या लोके गङ्गेति प्रसिद्धा। पिङ्गला तु यमुनेति कथ्यते। सुषुम्णायाः पुनः सरस्वतीति नामान्तरम्। वेदेषु दृश्यमाना इमा गङ्गेत्यादिनामिका नद्यो नाड्यर्थे प्रयुक्ता ज्ञायन्ते। तिसृणां यत्र संगमो भवति स एव योगिभिः प्रयाग इत्युच्यते। इडा क्रियासूत्रस्य (Active nerves) केन्द्रभूता, पिङ्गला च ज्ञान- सूत्रस्य (Sensitive nerves)। सुषुम्णा तु द्वयोः कार्यकलापं संचालयति। वयं यत् किमपि मनसि मन्त्रात्मकं वाक्यात्मकं शब्दात्मकं वा समुच्चारयामस्तत्तु मस्तिष्कसुषुम्णयोर्मध्य- वर्तिनः क्रियासूत्रस्य वेपनमात्रमेव। अस्माकमेतेषां वेपनानामनुभूतिस्तु सर्वथा स्पष्टमिव

---

१ मध्यस्थायाः सुषुम्णायाः पर्वपञ्चसंभवः। शाखोपशाखतां प्राप्ताः शिरालक्षत्रयात्म- कम्। अर्धलक्षमिति प्राहुः शरीरार्थविचारकाः॥ [अथर्ववेदभाष्ये]

२ नाभिस्थानकन्दोर्ध्वमुकुराद्देव निर्गताः। द्विसप्ततिसहस्राणि देहमध्ये व्यवस्थिताः ॥३२॥ इडा च पिङ्गला चैव सुषुम्णा च तृतीयका ॥३६॥ इडा वामे स्थिता भागे पिङ्गला दक्षिणे स्मृता। सुषुम्णा मध्यदेशे तु गान्धारी वामचक्षुषि ॥३८॥ इडा पिङ्गला सुषुम्णा प्राण- मार्गव्यवस्थिताः। ४१॥ इडा गङ्गेति विज्ञेया पिङ्गला यमुना मता। मध्ये सरस्वती ज्ञेया प्रयागादिसमस्तथा ॥३०१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवति किन्तु नैवैतेषां कर्णगोचरत्वमिति। एषां श्रवणे कर्णानामसमर्थतैव दृश्यते। नैवैषां सम्बन्धः स्वरतन्त्रेभ्यः। एतानि वेपनानि केवलं लघुमस्तिष्कमभिप्राप्य समवतिष्ठन्ते, वरुणाभिधानं बृहन्मस्तिष्कं गृह्णाति चैनानि। एतानि खलु वेपनानि वेदे 'मध्यमा वाक्' इति व्यवहृतिं लभन्ते। प्रसिद्धोऽजपाजापस्त्वेतदर्थसंकेतक एव। आस्तिकेषु सर्वेषु संप्रदायेषु स्वस्वपरिभाषया या मौनप्रार्थना दृश्यते साप्येतन्मूलैव। तदर्थाभिधायी चायमृग्वेदीयः १०।४७।७[1] मन्त्रः। अस्माकं स्तुतिवचनानि हृदयस्पर्शीनि—मनसैवोच्यमानानि न च वाचा—दूतभूतानि परमेश्वरं प्राप्नुवन्तीति भावः। मनसि संभूतो व्यापारो वाणीमुच्चारणे प्रेरयति। अतो मध्यमेयं वाग् वैखर्या जन्मदात्रीति। आमनन्ति च छन्दोगाः[2]—संकल्पस्तु मनसो विशुद्धो व्यापारः। यदा कश्चन संकल्पयति तदा स मनस्यत्येव, अनन्तरं वाचमीरयति। यथेयं जडप्रकृतिर्व्यक्ताव्यक्तभेदेन रूपद्वयं भजते तथैव चैषा वागपि। सूक्ष्मतां भजमाना प्रकृतिराकाशमभिव्याप्य परमाणुरूपेण स्थितिं लभते। एवमव्यक्तवाक्तत्त्वमपि सूक्ष्मवेपनरूपेणान्तरिक्षं व्याप्यावतिष्ठते। यदा प्रकृतिरव्यक्तावस्थां विहाय विषमां कार्यावस्थां प्रति परिणमितुं प्रारभते तदा तत्र क्रियाया उद्भवेन परमाणवो नृत्यन्तीव। अवस्थायामस्यां न चेयं प्रकृतिर्व्यक्तभूता न चाव्यक्तभूता कथयितुं शक्यते, मध्यमेति सुतरां तदभिधानं तदानीम्। इयमेवावस्था मध्यमाया वाचोऽपि। अव्यक्तावस्थायां सेयमन्तरिक्षव्यापिनी भवति। यदा चास्यां सूक्ष्मवेपनानि समुद्भवन्ति तदेयं पश्यन्ती भूत्वा आत्मदृष्टा जायते। सैव पुनर्वेपनानां स्पष्टीभवनेन मध्यमावस्थायां सुषुम्णायाः शिखरेषु स्थितिं कुर्वती मनसि ध्वन्यते। यद्यपि मध्यमाया ध्वनिर्नैव कर्णयोर्गोचरीभूतस्तथापि तस्यानुभूतिः सुस्पष्टा।

अव्यक्तप्रकृतिवत् समव्यक्ता वाक् सर्वज्ञस्य विभोः सर्गक्रमे प्रेरणां लभमाना सूक्ष्मैर्वेपनैः समाहितचित्तैरात्मभिर्दृष्टा पश्यन्तीति समभिख्यां गच्छति। अस्यामेव आदिकालिकानां कृतसाक्षाद्धर्मणामृषीणां मन्त्रज्ञानामनुभूतिर्भवति। कारणादस्मात्ते मन्त्रद्रष्टार इति निगद्यन्ते।

---

१ वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः। हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः॥ [ऋ० १०।४७।७]

२ संकल्पो वाव मनसो भूयान्, यदा वै संकल्पयतेऽथ मनस्यत्यथ वाचमीरयति। [छा० ७।४।१]

६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मध्यमायां वाचि वेपनानां समभिव्यक्तिरनुभवगम्या किन्तु पश्यन्त्या वेपनानि सर्वथाऽव्यक्तान्येव। शब्दार्थसम्बन्धवद् मध्यमापश्यन्त्योरपि व्यक्ताव्यक्तभावेन नित्यः सम्बन्धः। नैकतरा अन्यां विना स्वसत्तां स्पष्टयितुं समर्था। पश्यन्ती मध्यमा वैखरीति तिस्र एता वाग्विलासस्य विकासक्रमभूताः। ताश्चैताः पुनः क्रमशो ज्ञानम्, अनुभूतिः, क्रिया चेति नाम्ना प्रसिद्धिमायान्ति। पश्यन्त्या अवस्थायामात्मदृष्टिद्वारेण ज्ञानं गोचरीभवति, मध्यमायामवस्थायां गोचरीभूतं दृष्टं वा ज्ञानं मनसि समनुभूयते, वैखर्यां पुनरवस्थायां तदेवोदानेन वायुना स्वरतन्त्रीषु प्रेरितं स्वरव्यञ्जनरूपैर्वर्णैः स्फुटीभवद्बहिरुद्भवति। एषा वागेव जनैः श्रवणेन लिपिसंकेतेन सम्यक् परिज्ञायते। चन्द्रमसः षोडशी कला आगमतन्त्रेषु 'अमृता' इति कथ्यते। स्फोटविज्ञानविद्भिः सैव 'पश्यन्ती' इत्याख्यायते। तन्त्रदर्शनेषु त्वस्याः पारिभाषिकं नाम 'आत्मदृष्टिः'। मन्त्रशास्त्रे कदाचिदियमेव मन्त्रदेवतेति। चन्द्रमसः षोडशी कला नित्या अमृता एवमखण्डिता। पश्यन्त्या नाम आत्मदृष्ट्या दृष्टो मन्त्रो निगमो वेदो वा नित्योऽनिधनश्च। विज्ञानवान् साधको वैखर्या वाचोऽन्तर्मुखीभूय मध्यमाया मूलोद्गमनुगच्छति। मध्यमातः पुनरुत्थायाऽन्तर्दृष्ट्या पश्यन्तीमवतिष्ठते। मध्यमेति यावत्तु सर्वसाधारणस्य गतिः, किन्तु पश्यन्तीं त्वन्तर्दृष्टयो महर्षयः समाधिक्षपितकल्मषा एवाधिगन्तुं शक्नुवन्ति।

आर्यवाङ्मयेषु शब्दानां नित्यत्वं सुस्पष्टमेव। वैज्ञानिकैरपि तथ्यमिदं सर्वथा स्वीक्रियते। वेदे खल्वपि वाचो नित्यत्वं दर्शितम्। वेदस्य ज्ञानमयत्वेन शब्दमयत्वमप्यस्ति। शब्दस्य नित्यत्वं स्वीकुर्वद्भिर्वेदस्यापि नित्यत्वं सुतरां स्वीकृतम्। कथंभूतं नित्यत्वं वेदानाम्? औत्पत्तिकेन [1]सम्बन्धेनेति। औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति निपुणमेवोक्तमाचार्यैः। वेदशब्देभ्य एव निर्मिता सृष्टिगतपदार्थाः, यतः शब्दादेव जगतः प्रभव इति। वेदव्यासा-

---

1 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः०' जैमिनीयमीमांसायां प्रथमाध्याये प्रथमपादे। '....अतः प्रभवात्....', 'अत एव च नित्यत्वम्'–वेदान्तसूत्राणि १।३।२८-२९; सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे॥'–मनुः १।२१; "शब्दादेव जगतः प्रभवादुत्पत्तेः प्रलयकालेऽपि सूक्ष्मरूपेण परमात्मनि वेदराशिः स्थितः। स इह कल्पादौ हिरण्यगर्भस्य परमात्मन एव प्रथमदेहिमूर्त्तेर्मनस्यवस्थान्तरमापन्नः सुप्तप्रबुद्धस्येव प्रादुर्भवति।" –मनुस्मृतौ १।२१ कुल्लूकभट्टः; तस्मै नूनमभिद्यवे वाचा विरूप नित्यया–ऋग्वेदे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दिभिर्मन्वादिभिश्च महर्षिभिर्जगतो वेदशब्दप्रभवत्वं प्रतिपाद्य वेदानां नित्यत्वं सम्यक् प्रत्यपादि। औत्पत्तिकपदस्यार्थे केचनान्यथैव कल्पयन्ति। वस्तुतस्तु वेदशब्दानां सृष्टिगतार्थैः सहोत्पत्तिविषयकं सम्बन्धं संगमय्य योऽर्थः प्रतिपद्यते स एवात्र ग्राह्यः। नित्यत्वप्रतिपादनार्थस्तु व्यञ्जनावृत्त्यैव समाकृष्यते। शब्दानामर्थैः सह नित्यः सम्बन्ध इति यद् गृह्यते तत्तु केवलमिमं भावमादायैव यज्जगतः शब्दप्रभवत्वमिति। मीमांसायां जैमिनिना वेदान्तसूत्रे च भगवता कृष्णद्वैपायनेन विषयेऽस्मिन् बहु पल्लवितम्। ये चाधुनिकास्तान्त्रिकीं परिभाषां सम्यगनवधार्य शब्दानां नित्यत्वमनित्यत्वं वेति बहु विवदन्ते तत्तु नैव समीचीनम्। नात्र विषये प्राचीनाचार्याणां काचन विप्रतिपत्तिः। विप्रतिपत्तिस्तु नवीनैराविष्कृता। शब्दानां नित्यत्वमनित्यत्वमपि चोभयं संमतम्। वैदिकानां शब्दानां सृष्टिपदार्थैः सहौत्पत्तिकसम्बन्धत्वेन नित्यत्वम्, लौकिकानां शब्दानां चानित्यत्वमेव। ये चास्मदादीनां शब्दास्ते त्वनित्याः, ये पुनर्वैदिकास्ते तु नित्याः। व्याकरणशास्त्रप्रवक्ता पाणिनिर्भाष्यकारः पतञ्जलिश्च स्वसिद्धान्तावरोधेन लौकिकानां वैदिकानामुभयविधानामनुशासनं दर्शयतः, अतः शब्दानामनित्यत्वं नित्यत्वं चोभयं प्रतिपादयतः। नैयायिकाः केवलं लौकिकानां शब्दानां प्रतिपादनं कुर्वन्ति, कारणादस्मात्ते शब्दानामनित्यत्वमेव दर्शयन्ति। मीमांसकाः पुनर्वैदिकानां शब्दानां ग्रहणं स्वदर्शने कुर्वन्ति, अतस्ते शब्दानां नित्यत्वमेव समूरीकुर्वन्ति। नात्र काचन सिद्धान्तभूता विप्रतिपत्तिः। सर्वेषां मतं स्वप्रक्रियानुसारेण समीचीनमेव। असमीचीनं तु तद्यत् प्रक्रियामविज्ञाय मुधैव परस्परं खण्डयन्ति।

नित्या पुनरव्यक्ता वागेव परा वागिति कथ्यते। परा वाक् तु ब्रह्मणि स्थिता। योगिन एव तां प्राप्तुं समर्थाः। सा चैषा यावद्ब्रह्म [1]तावत्तिष्ठति। त्रिंशद्धामसु विराजमाना ब्रह्मण एव समुद्भवति। परमात्मतत्त्वमेव तस्याः परमं व्योम। एषा सर्वत्र व्याप्तवती नैवोपक्षी-

---

१ यावद्ब्रह्म विष्ठितं तावती वाक्–ऋ० १०।११४।८; त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते–ऋ० १०।१८९।३; ब्रह्मायं वाचः परमं व्योम–ऋ० १।१६४।३५; वाग्वै ब्रह्म–ऐतरेयब्रा० २।१५; ब्रह्मैव वाचः परमं व्योम–तैत्तिरीयब्रा० ३।९।५।५; वाग्वै विराट्–श० ३।५।१।३४; वागिति द्यौः–जै०उ० ४।२२।११; वाक् सावित्री–गोपथ० पू० १।३३; वाग्वै समुद्रो न वै वाक्क्षीयते न समुद्रः क्षीयते–ऐतरेयब्रा० ५।१६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यते कदाचन। परब्रह्मणः प्रतीकभूता चेयम्। आकाशवद्व्यापिनी हीयम्। न कदाचनाकाशः क्षीयते न चैषा परा वाणीति। एषा परा वाणी वेदानां मौलिकशब्दराशिरूपेणाऽव्यक्तभावमापन्ना नित्यत्वेन ब्रह्मणि स्थिता वर्तते। सैव सर्गकाले पश्यन्ती भूत्वा साक्षात्कृतधर्मभिर्ऋषिभिः साक्षात्क्रियमाणा मध्यमारूपेण प्रकटीभवति। मध्यमायाः पुनर्विस्तरो वैखरी भवति। बहुधा च पुनः प्रपञ्चो विषयेऽत्र वेदेषु मूलं लभते। [1]'सरस्वती' अस्या वाचो नामधेयम्। सरस्वती उदकवतीत्यर्थः। वाक् पूर्वमव्यक्ता भवति। पश्चादन्तरिक्षमभिव्याप्योदकेन सार्धं मेघादिषु तिष्ठन्ती तद्वती भवति। इयमेव मध्यदेवस्थानीया मध्यमा वाक्। इयमेव गर्जनलक्षणा जलादिकं समुत्पादयति। द्युलोकस्था वागव्यक्ता सा तु नैव ज्ञायते किन्तु माध्यमिकी हीयं वाक् सर्वप्राण्यन्तर्गता सर्वार्थाभिवादिनी भवति। अन्तरिक्षस्थाना देवगणा यां माध्यमिकीं वाचं जनयन्ति तामेव व्यक्तवाचोऽव्यक्तवाचश्च सर्वे प्राणिनो वदन्ति। परापश्यन्त्यौ नैव व्यवहारयोग्ये, किन्तु मध्यमा वेपनैर्व्यवहारभावमापद्यते। वागर्थेषु विधीयत इति सर्वे जगदन्तर्वर्त्तिनः पदार्थास्तस्या अर्थाः। एवं [2]वाचश्चत्वार्येव पदानि भवन्ति न तस्याः पञ्चमं पदमस्ति। तत्र त्रीणि पदानि बुद्धिगम्यानि नार्थं प्रकटयन्ति, केवलं तुरीयं पदमेव मनुष्याः परिज्ञानार्थं वदन्ति। वैदिकीषु च पुनरार्षाभिधायिनीषु दृष्टिषु वाचश्चत्वारि पदानि—ओंकारः, भूर्भुवःस्वरिति तिस्रो महाव्याहृतयश्च। नामाख्यातोपसर्गनिपाता एव चत्वारि वाचः पदानीति वैयाकरणा मन्यन्ते। साधारणा जनास्तु चतुर्थं भागं निपातमेव वदन्ति। तेषां वाक्यानि केवलमर्थानभिज्ञतया निपातवदेव भवन्ति। मन्त्रः, कल्पः, ब्राह्मणम्, चतुर्थी व्यावहारिकीति याज्ञिकानां मतम्। त्रयाणां पदानां ज्ञाने न सर्वे समर्थाः केवलं व्यावहारिकं वाचो भागं मनुष्या व्यवहरन्ते। नैरुक्तपक्षेऽपि ऋग्यजुःसामानि, चतुर्थी व्यावहारिकी वागिति भेदाः स्वीकृताः। अत्रापि व्यावहारिक्या एव प्रयोगो जनसाधारणैर्दृश्यते। केषांचिद्भूतविदां मते-सर्पाणां वाक्, वयसाम्, क्षुद्रस्य सरीसृपस्य वाक्, चतुर्थी व्यावहारिकीति। आत्मविदस्तु पशुषु, तूणवेषु, मृगेषु, आत्मनि च वाचश्चत्वारि पदानि दर्शयन्ति। इदं सर्वं विस्तरतो वाचः क्षेत्रम्। मनुष्य-

---

१ पावका नः सरस्वती–ऋ० १।३।१०; यद्वाग्वदन्त्यविचेतनानि–ऋ० ८।१००।१०; देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति–ऋ० ८।१००।११।

२ निरुक्ते त्रयोदशाध्याये दशमे खण्डे द्रष्टव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्यवहारे तु केवलं वाचश्चतुर्थोंऽश एव समागच्छति । भागत्रयं न व्यवहारयोग्यम् । वाक् सृष्टा असृष्टा च । सृष्टा वाक्चतुर्धा विभागमापद्यत । त्रिषु लोकेषु पशुषु च तस्या अवस्थानमभूत् । या वाक्पृथिव्यां सा अग्नौ सा रथन्तरे । या पुनरन्तरिक्षे सैव वायौ वामदेव्ये च । या दिवि विद्यते सैव बृहति सैव स्तनयित्नावथ पशुषु । तदनन्तरं या अत्यरिच्यत सा ब्राह्मणे समागता । तस्माद्ब्राह्मणाः कर्मकाण्डसमये वैदिकीम्, व्यवहारे च लौकिकीमित्युभयीं वाचं वदन्ति । एवं वाणी त्रिषु लोकेषु व्याप्तास्ति । या लोकेषु सैव सामत्रयेषु विद्यते । एभ्योऽतिरिक्ता पशुषु विद्यते । सैव यदा विस्पष्टा जायते तदा मनुष्या वदन्ति । इयमेव 'वैखरी' एवं व्यावहारिकीति कथ्यते । सर्वासामासां वाचां कार्यकारणभावो दृश्यते । परा वागोङ्काररूपा, पश्यन्ती स्वर्भूता, मध्यमा भुवःस्वरूपिणी, वैखरी पुनर्भूःस्वरूपमवतिष्ठते । ओङ्कारस्तु सर्वासामासां मूलम् । उच्यते च शाकपूणिना—"कतमत्तदेतदक्षरम्[1] ओमित्येषा वागिति" नानादैवतेषु मन्त्रेषु, सर्वासु वाक्षु चेदमक्षरमभिव्याप्तम् । ओमित्येतदेव वेदेऽक्षरमिति कथ्यते वाचोऽक्षभूतत्वात् । यथा सर्वा वाचोऽक्षभूतेऽस्मिन्नक्षरेऽधिनिषण्णास्तथैव तेषामर्थभूताः पदार्था वैदिकाश्च देवाः सर्वे तत्रैव निषीदन्ति । इदमेवाक्षरमोङ्काररूपं ऋचामन्यासां वाणीनां च परममुद्गमस्थानम् । एतस्याक्षरस्य ज्ञानमेव परा विद्येति कथ्यते । वागर्थेषु बलवतीति तस्याः स्वभावतोऽर्थवत्त्वम् । सर्वो वेदराशिर्वाङ्मयः । तस्याभिधेयास्त्वर्था देवता एव । अर्थो वाचः पुष्पफलभूतः । तत्पुष्पफलं देवताऽध्यात्मं यज्ञदैवतं वा । समन्वयेन दैवतं याज्ञिकमध्यात्ममर्थमेव वाचः पुष्पफलम् । एवं त्रिविधानामर्थानामभिधाने एव वाण्याः साफल्यम् । अक्षरभूतमों यथा सर्वा वाचोऽभिव्याप्तं तथैव सर्वान् पदार्थान् प्रत्यप्यभिव्याप्तम् । लौकिकेषु व्यवहारेषु विचरतामस्मादृशानां नैव सम्यग्ज्ञातं भवत्येतत् । योगिनां साक्षात्कृतधर्मणामेव ज्ञानविषयोऽयं विषयः । आस्माकीनं यदपि ज्ञानं भवति तत्सर्वं दिक्कालपरिच्छिन्नमेव । अन्यच्च [2]पुनस्तच्छब्दार्थज्ञानविकल्पैः संकीर्णमपि । गौरिति व्यवहारे गौरिति शब्दः, गौरित्यर्थः, गौरिति ज्ञानम्, सर्वमेतत्त्रयं संकीर्णम् । वस्तुतोऽन्ये शब्दधर्माः, अन्ये विज्ञानधर्माः, अन्ये च पुनरर्थधर्मा इति विभक्तः पन्थाः । किन्त्वेषां पार्थक्यज्ञानं समाधिप्रज्ञां विना नैव सुशकम् । ऋषयः साक्षात्कृतधर्माणः सूक्ष्मज्ञा विषयेऽस्मिन् प्रभवः । ते खलु निरस्तसंशीतय उद्घाटित-

---

१ ओमित्येषा वागिति शाकपूणिः–निरुक्ते त्रयोदशाध्याये एकादशखण्डे द्रष्टव्यम् ।

२ पातञ्जलयोगदर्शने व्यासभाष्ये १।४२ द्रष्टव्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समस्तग्रन्थय ऋतम्भराप्रज्ञावशाद्वाचं तस्या अर्थं च, ययोः सुतरां संकीर्णता विद्यते पृथक्करणे तयोः पारयिष्णवः । नान्येषामत्र गतिः । एतादृशैरुच्चावचैरभिप्रायैर्वेदेषु वाग्वर्णनं दृश्यते । तस्यास्तु स्वतन्त्रमेकं दर्शनम् । तदेव विविधेषु शब्दशास्त्रेषु लब्धविस्तरम् । ऋग्वेदीये १०।७१।१ [१]मन्त्रे यत्किंचित् प्रकटीकृतं तदप्यत्र बहु प्रस्फोरयति । वैदिकवाग्विषयेऽत्र–प्रथमम्, वाचोऽग्रम्, नामधेयं दधानाः, श्रेष्ठम्, अरिप्रम्, प्रेणा, गुहानिहितमित्यादिभिः पदैर्महत्त्वानुरूपमेव दर्शितम् । इयं वाक् सर्गावस्थायाः प्राक् परमात्मज्ञाने परारूपेणावस्थिता तिष्ठत्यत उक्तम्–प्रथममिति । सैव पश्यन्तीभावमागता वेदेषु मन्त्ररूपेण विद्यमाना मध्यमावस्थामवतरन्ती सर्वासां वैखरीवाणीनां मूलमतः सूचितम्–वाचोऽग्रम् नामधेयं च पदार्थानाम्–"सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एव" [२]इति न्यायाद्वाचाऽनया कल्पादौ क्रियते तेन कारणेन–नामधेयं दधाना इत्येतस्याः कर्मोक्तम् । व्याकरणादिनियमैः परिपूर्णाऽपीयं वैज्ञानिकी वाग् न संकोचमागच्छतीति श्रेष्ठत्वमस्याः । न चेयं कस्यचिद्देशस्य भाषा, यद्यपि मूलभूता सर्वासां भाषाणामिति निर्दोषत्वं दर्शयितुमस्या उक्तम्–अरिप्रमिति । एषा कल्पेषु प्रेरणाद्वारेण प्रकाश्यते कारणादस्मादुक्तम्–प्रेणेति । वाचा नैवैषा पूर्वं प्रकटीभवति केवलमस्याः साक्षात्कार एव सर्गादौ जायते । [३]स च पुनर्गुहायामिति कथितम्–गुहानिहितमिति । एवं वाग्विषयको विविधः प्रपञ्चो वेदेषु दृश्यत इत्यलमत्रैव ॥

---

१ बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
[५]देषां श्रेष्ठं यदरिप्रमासीत् प्रेणा तदेषां निहितं गुहाविः ॥ १०।७१।१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विविधम्

उपरागविज्ञानम्

पुराकालत एव मानवैः सूर्यस्य खग्रासः साश्चर्यमवालोक्यत। ११४० ईशवीये लन्दन-नगरे यदा सूर्यस्य खग्रासः समपद्यत तदा आंग्ला भीतभीताः स्थाल्यौदनमपि त्यक्त्वा पलायिताः। भारतीयैर्मनीषिभिस्तु वैदिककालत एव ग्रहणविज्ञानमाविष्कृतम्। श्रूयते हि ऋग्वेदे तमसावृतस्य सूर्यस्यात्रेः प्रयत्नेन मोक्षः—

अत्रिः सूर्यस्य दिवि चक्षुराधात् स्वर्भानोरप माया अघुक्षत् ॥

यं वै सूर्यं स्वर्भानुस्तमसा विध्यदासुरः।
अत्रयस्तमन्वविन्दन नह्यन्ये अशक्नुवन् ॥ इति।

[ऋ० ५।४१।८–९]

परिवर्तनशीलमिदं जगत्। परवर्तिनि काले भारतीया दानपुण्याभ्यां ग्रहणमोक्षमकामयन्त। यूरोपीयास्तु ज्ञानेन तद्रहस्यमजिज्ञासिषन्त।

विगतसूर्यग्रहणावसरे भारते दानपुण्याभ्यां सह ज्ञानस्यापि योगः संजातः। भारतीया वैज्ञानिकाः 'बसरा'–(ईराकदेशीये) नगरे ग्रहणस्य प्रतिबिम्बादिग्रहणार्थमगच्छन्। किन्तु तत्र ऋतुवैपरीत्येन दुर्दिनाक्रान्तत्वाद् ग्रहणदर्शने सफला नाभवन्। आकाशवाणीविशेषज्ञैराकाशवाणीलहरीषु ऋतुविशेषज्ञैश्च ऋतौ सूर्यग्रहणस्य कीदृशः प्रभावः पततीत्यस्याध्ययनं कृतम्।

केनचित्पापेन शापेन वा न ग्रहणस्याविर्भावः। गणितेन सहस्रवर्षाणि यावद्विगतानामागामिनां च ग्रहणानां यथार्थं ज्ञानं हस्तामलकवदधिगन्तुं शक्यते।

अग्रिमः सूर्यस्य खग्रासः १९७० ईशवीये लगिष्यति। एकस्यां शताब्द्यां २७५ ग्रहणानि भवन्ति। चक्रमेकम् १८ वर्षं ११⅓ दिनेषु परावर्तते। एकस्मिन् चक्रे ७०–७१ संख्याकानि ग्रहणानि भवन्ति। तेषु ४२ सूर्यस्य, २८ चन्द्रस्य च भवन्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं च माघकवेः—

तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥

इति रिक्तं वचः । पृथिव्याः कस्माच्चिदप्येकस्मात् स्थानात् ७० ग्रहणेषु सूर्यस्य सप्त, चन्द्रस्य चाष्टादश ग्रहणान्यवलोक्यन्ते । एतदेव पूर्वोक्ताया माघकवेः कल्पनाया आधारोऽभूत् । शिष्टानि ४५ ग्रहणानि विभिन्नैः स्थानैरवलोक्यन्ते । ग्रहणचक्रम् १८ वर्ष ३४८ दिनानाम्, ५२१ वर्षाणामपि च भवति । अस्य गणितमधुनैतावत्परिष्कृतं सुव्यवस्थितं च वर्तते यत्कला-काष्ठादिषु स्पर्शमोक्षकालः, अङ्गुलिवितस्त्यादिषु च दर्शनस्थानं निर्देष्टुं पार्यते ।

सूर्यस्य खग्रासावस्था क्षण-(मिनट) त्रयादूर्ध्वं न तिष्ठति । यस्मात् स्थानादेकदा सूर्यस्य खग्रासो दृष्टस्तस्मादेव स्थानात् कतिपयशताब्द्यनन्तरमेव पुनस्तदवलोक्यते । लन्दननगरे ११४० ई० अनन्तरं १७१५ ई० पुनस्तदवलोकितम् । अतः कस्यचिदेकस्य मानवस्य जीवन-काले एकाधिकवारं सूर्यस्य खग्रासोऽद्भुत एव योगो मन्तव्यः ।

सूर्यग्रहणे सूर्यस्य बिम्बश्चन्द्रगोलेन ग्रस्यते । चन्द्रग्रहणे च चन्द्रबिम्बं पृथिवीगोलेन ग्रस्तं भवति । छायाक्षेत्रं यदा धरायां नावतिष्ठते तदा कङ्कणग्रहणं भवति । एतच्च भारतीयै-र्मनीषिभिः श्रीभास्कराचार्यकमलाकरप्रभृतिभिः स्वीयेषु सिद्धान्तशिरोमणिसिद्धान्ततत्त्वविवेक-प्रभृतिषु ग्रन्थेष्वपि विवृतप्रायम् । श्रीकमलाकरेण सिद्धान्ततत्त्वविवेके वलयग्रहणस्याथ च चन्द्रसूर्यग्रहणवत् पृथिवीग्रहणस्याप्युल्लेखः कृतः । भास्कराचार्येण सिद्धान्तशिरोमणौ ग्रहण-विषयकशास्त्रविज्ञानविरोधपरिहारः—

"राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम्"

इत्यादिना कृतः । अद्भुतमिदं संपूर्णमुपरागविज्ञानम् । कुरुक्षेत्रादिष्ववगाहनमात्रेण नहि तस्य परिज्ञानं भवितुमर्हति । २१६८ ईशवीयेऽभूतपूर्वं प्रभूतकालव्यापि सूर्यग्रहणं समेष्यति । तद्दर्शनं च मद्रासमीपे भविष्यति ।

व्र. व. द्वि.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पादकीयम्

सप्तमवर्षप्रवेशः

अस्ति परमप्रमोदस्यायमवसरः सारस्वती सुषमा स्वजीवनस्य षड्वर्षाणि समाप्य सप्तमे वर्षे प्रविष्टेति। क्षणमत्रास्माभिः स्थित्वा विमृष्टव्यमतीतकालविषयकं किंचित्, विचारणीयं च भाविस्वरूपम्। आंग्लशासकैः १७९१ ई० संस्थापितोऽयं महाविद्यालय आरम्भादेव वितरति संस्कृतजगते कानप्यपूर्वान् विचारमणीन्। १८६६ ईशवीयतः १९१७ पर्यन्तं यावत् 'काशी-विद्यासुधानिधि (दी पण्डित)'–नामकमासिकपत्रद्वारा, १८९० वत्सरादारभ्य च विजयनगर-संस्कृतग्रन्थमाला'–साहाय्येन बहूनामप्रकाशितग्रन्थानामैतिहासिकतथ्यानां च प्रकाशनं विहित-मनेन विद्यालयेन। अतः परं १९२० ईशवीयतः सरस्वतीभवनग्रन्थमाला सरस्वतीभवना-नुशीलनपत्रिका च प्राकाश्यं नीते। तत्रानुशीलनपत्रिकाया दश अङ्का आधुनिकगवेषणासाहित्य-मूर्द्धन्या इव विराजन्ते। ग्रन्थमालायां च साम्प्रतमशीतिपरिमिता महत्त्वशालिनो ग्रन्थाः प्रकाशिता विद्यन्ते। अनुशीलनपत्रिकायां प्राय आंग्लभाषीया लेखाः प्रकाश्यन्ते स्म; संस्कृत-लेखानां च प्रकाशनाय सारस्वतालोकनाम्ना प्रयत्नः प्रावर्तत। परं त्वेतत्पत्रिकाद्वयसम्पादनाय स्वतन्त्रव्यवस्थाया अभावादेतदायोजनं तदा सफलतां नावाप्नोत्। एतत्काठिन्यमनुभूयानुशीलन-पत्रिकायाः सारस्वतालोकस्य च सामग्रीमेकत्र संकलनकामनयेवास्याः सारस्वत्याः सुषमायाः प्रकाशनं १९४१ ई० महाविद्यालयस्य सार्द्धशताब्दीसमाप्त्यवसरे प्रारब्धम्।

अस्य प्रथमोऽङ्कः १९४२ ईशवीये अप्रैलमासे प्रकाशितः। सर्वाङ्गपूर्णेऽस्मिन्नङ्के महा-विद्यालयीयानां भूतपूर्वप्रसिद्धविदुषामध्यक्षाणां च चित्राणि, त्रयोविंशतिविदुषां चरितानि, महाविद्यालयस्य संक्षिप्तेतिहासः, विचारगभीरा विंशत्यधिका लेखाश्च प्रकाशिताः। तदैषा पत्रिका षाण्मासिकी भवेदित्यधिकारिणां विचार आसीत्; किन्तु सम्पादनस्य स्वतन्त्रव्यवस्थाविरहात्स साफल्यं नाधिजगाम। अस्या द्वितीयोऽङ्को द्वितीयवर्षाङ्कनाम्ना तृतीयाङ्कश्च तृतीयवर्षाङ्करूपेण क्रमशो दिसम्बर १९४३ ई०, दिसम्बर १९४५ ई० च प्रकाशितावभूताम्। एवं चतुर्षु वत्सरेषु कृच्छ्रेण त्रयोऽङ्काः प्रकाशिताः। तदनन्तरं चास्याः प्रकाशनं रुद्धप्रायमिवाभवत्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ स्वातन्त्र्यवेलायां समायातायां सर्वं नवमिवाभवत्। संस्कृतोन्नत्यर्थं राष्ट्रियशासनं बद्धपरिकरमभूत्। १६४८ ई० सरस्वतीभवनेऽनुसन्धानमन्दिरस्य स्थापना समजनि। तत्रास्याः पत्रिकायास्त्रैमासिकरूपेण सुव्यवस्थितसम्पादनार्थमेकः स्वतन्त्रो विभाग एव पुरस्कृतः। ततः प्रभृत्येव चास्यास्त्रैमासिकरूपेण प्रकाशनं प्रारब्धम्; प्रथमाङ्कश्च चतुर्थवर्षप्रथमाङ्कनाम्ना जनवरी १६४६ ई० प्रकाशितः। ततो निरन्तरं त्रिषु त्रिषु मासेष्वस्याः पत्रिकाया नियमेन प्रकाशनं भवति। अद्य यावदस्याश्चत्वारो विशिष्टाङ्काः सम्पादिताः। इत्थं पत्रिकायाः षड्वर्षाणि व्यतीतानि। तेषु पञ्चमवर्षसमाप्तिपर्यन्तं यावत् प्रकाशितानां लेखानां विषयसूची पञ्चमोपाधि-वितरणोत्सवाङ्के, षष्ठवर्षे प्रकाशितानां लेखानां विषयसूची च षष्ठवर्षचतुर्थेऽङ्के दत्ता।

अस्यां सरस्वतीभवनस्था महत्त्वपूर्णा अप्रकाशिता लघवो ग्रन्थाः प्रकाशिताः स्युरित्या-रम्भत एव स्वीकृतम्। तदनुरूपमेव द्वितीयवर्षाङ्के तृतीयवर्षाङ्के च नागोजीभट्टप्रणीतः प्रत्या-ख्यानसंग्रहः, चतुर्थवर्षद्वितीयाङ्के च महेशप्रणीतः सुवर्णमुक्तासंवादश्च प्रकाशितौ। साम्प्रतं वयं प्रत्येकस्मिन्नङ्के एकैकं पुस्तकं प्रकाशितं स्यादिति विचारयामः। तदनुगुणमेव चास्मिन्नङ्के महेश्वरनिर्मिता पथिकजनपातकचिन्तनस्मृतिः प्रकाश्यते।

स्वमूलोद्देश्यं सफलयितुमनवरतकृतप्रयत्नैरस्माभिर्यत्किंचिदपि साफल्यमवाप्तं तत्कृपालूनां सुषमाया लेखकानामेवानुकम्पयेति मन्यामहे। सन्त्यद्यापि काश्चनानुपपत्तयः, नाभूत् सा सुव्यवस्था यया पिपठिषूणां समेषां पुरतो निर्बाधमेषोपस्थापिता स्यात्; नास्ति च सा सेवा यया लेखकानां श्रमस्य कृपाया वा किमपि प्रतिदानं भवेत्। तथाप्याशास्महेऽचिरादेवासु काश्चन दूरी-भविष्यन्तीति। अस्त्यस्माकं किंचिन्निवेदनं दयालुलेखकानामन्येषां च संस्कृतविदुषां पुरस्तात्। जानन्त्येव विद्वांसः कस्याश्चन पत्रिकाया द्वे विशेषकार्ये इति। ते च प्राचीनविचाराणां शास्त्रीयपद्धत्या संरक्षणम्, नवीनानामुपयोगिनां विचाराणामूहनमालोचनं च। एतद्द्वयमधिकृत्यैव सुषमायामेनेके स्तम्भाः स्थापिताः सन्ति। तत्र प्रथमं विषयमवलम्ब्य प्राचुर्येण लेखाः प्रकाश्यन्ते; परं च द्वितीयमभिलक्ष्य न सुकरतया लेखाः प्राप्यन्ते। जागरूकेषु संस्कृतपाठकेषु नूतनविचार संचारार्थं द्वितीयकोटिकानां निबन्धानामतिवेलमपेक्षा वरीवर्ति। कृपालवो निबन्धारः प्रार्थ्यन्ते समपेक्षितनिबन्धप्रदानेनानुगृह्णन्तु संस्कृतसमाजमस्मांश्चेति।

 सुषमायाः सप्तमे पदक्रमे शमत्र विदधातु भगवान् विश्वनाथः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

*काण्वसंहिताभाष्यसंग्रहः

आनन्दबोधभट्टोपाध्यायप्रणीतः

चतुर्थो दशकः

एकत्रिंशोऽध्यायः

समिद्धो[1] अञ्जन्नाश्वमेधिकोऽध्यायः। आद्या एकादश त्रिष्टुभः आग्नेय्यः अश्वस्तुतिः। ऋषिर्बृहदुक्थो वामदेवः, अश्वो वा सामुद्रिः। तथा च–"समिद्धो अञ्जन्कृदरं मतीनामिति बार्हदुक्थीभिराप्रीणीयाद् बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्याप्रीर्ददर्श। ता एतास्ताभिरेवैनमेतदाप्रीणीम इति वदन्तो न तथा कुर्याज्जामदग्नीभिरेवाप्रीणीयात् प्रजापतिर्वै जमदग्निः सोऽश्वमेधः स्वयैवैनं[2] देवतया समर्धयति" इत्यादिश्रुतेः [शत. ब्रा. १३।२।२।१४]।

[3]पाठस्तु—

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः।
वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्॥ १॥

इति। (मा. २९।१)

---

* श्रीमदानन्दबोधभट्टोपाध्यायकृतशुक्लयजुर्वेदीयकाण्वसंहिताभाष्यसंग्रहो न केनचिदिदानीं यावत् प्राकाश्यं नीतः। तस्य चतुर्थदशकस्य द्वौ आदर्शग्रन्थौ सरस्वतीभवने काश्यां वर्तेते। तावेवानुसृत्य भाष्यसंग्रहोऽयमत्र प्रकाश्यते। तयोरेकः 'क'-पदेनापरस्तु 'ख'-पदेनात्र सूचितः।

अन्येभ्यः स्थानेभ्योऽपि भाष्यसंग्रहस्य ग्रन्थान् प्राप्तुं यतमानोऽहमाशासे यत् कतिषुचिदेव वर्षेषु सम्पूर्णं भाष्यसंग्रहं पाठकमहोदयानां करकमलानि प्रापयिष्यामीति—सम्पादकः।

१ 'समिद्धो अञ्जन्निति। आश्वमेधिकोऽयमध्यायः।' इति खपुस्तकस्थः पाठः।

२ 'स्वयै···यति' इति खपुस्तके नास्ति।

३ 'पाठस्तु' इति, सम्पूर्णो मन्त्रः, 'इति' इति च खपुस्तके नास्ति। एवमेवाग्रेऽपि।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे श्रीभगवन्नग्ने, समिद्धः संदीप्तः। अञ्जन् 'अञ्जू [1]व्यक्तिम्लक्षणकान्तिगतिषु' [१४५६ रुधादिः] अभिव्यक्तिं कुर्वन्। कृदरम्। वर्णव्यत्ययः। अरंकृत् अलंकृत्[2] मतीनाम् अलंकर्ता। मधुमत् [3]मधुरसवत्। घृतं पिन्वमानः 'पिन्व पिन्व[4] सेचने' घृतसेचनं कुर्वाणः, यजमानेन दत्तं घृतमादाय देवान् प्रति सिञ्चन् स्वात्मानं च प्रति। वाजी स्वयं हविर्लक्षणान्नवान्। वाजिनम् [5]वाजिलक्षणं विशिष्टं हविः। वहन् देवान् प्रति वहन् प्रापयन्। हे श्रीजातवेदः, देवानां प्रियं मधुमद् घृतम्। आसधस्थम् सह स्थितम्। देवान् प्रति आवक्षि 'वह प्रापणे' [१००४ भ्वादिः] आभिमुख्येन प्रापय ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान्।
अनु त्वा सप्ते प्रदिशः सचन्ताᳪं स्वधामस्मै यजमानाय धेहि ॥ २ ॥
(मा. २९।२)

असौ [वाजी। [6]वेजनवान्] देवानप्येत्विति सम्बन्धः। किं कुर्वन्नेत्विति घृतेन आज्येन पथो देवयानान् मार्गान् अभिव्यक्तिं कुर्वन् प्रजानन् देवान्. ऋतुसम्बन्धिनो देवान् प्रकर्षेण जानन् अवगच्छंश्च। तान् देवान् प्रति एतु गच्छतु। किं च, अनु त्वा सप्ते प्रदिशः सचन्ताम्। हे सप्ते, [7]प्रदिशः सचन्ताम्। हे सप्ते हे अश्व। तं त्वां प्रदिशः प्रदिगुपलक्षितानि भूतानि। सचन्ताम 'षच समवाये' [९९७ भ्वादिः] समवायिकुरुताम् अनुसंगच्छन्तु[8]। किं च, स्वधामस्मै यजमानाय धेहि। अस्मै यजमानाय। स्वधाम् अन्नम्। धेहि प्रयच्छ ॥ २ ॥

तत्स्थाने भाष्यारम्भे 'समिद्धो अञ्जन्निति।' इत्येवं प्रकारेण सर्वत्र मन्त्रस्य प्रतीक एवोद्धृतः। अत्र तु द्वितीयमन्त्रतः खपुस्तकस्थं प्रतीकम्, कपुस्तकस्थौ 'पाठस्तु', 'इति' इति पाठौ च विहाय केवलो मन्त्र एव प्रदीयते।

१ 'व्यक्तिश्लक्षणगतिषु' इति खपुस्तके। 'व्यक्तिम्रक्षणकान्तिगतिषु' इति तु धातुपाठस्थः पाठः। २ '....कृत्। अरंकृत् मती....'इति खपुस्तके। ३ मधुररसवत्—खपुस्तके।
४ पिन्व मिन्व-ख०। वस्तुतस्तु 'पिवि मिवि णिवि सेचने' [५८८-९० भ्वादिः]।
५ 'वाजिनलक्षणम्' इति-क० ख०। ६ 'वाजिनवान्' इति-क०ख०।
७ 'हे सप्ते, प्रदिशः सचन्ताम्' इति नास्ति-ख०। ८ अनुगच्छन्तु-क०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥
(मा. २९।३)

हे वाजिन्, ईड्यः स्तुत्योऽसि। वन्द्यश्च नमस्कार्योऽसि। आशुः शीघ्रगामी असि। मेध्यश्च यज्ञार्होऽसि। हे सप्ते सरणशील। अग्निष्ट्वा देवैरिति। अश्वं त्वां वसुभिर्देवैः सह सजोषाः जातवेदाः। जातप्रज्ञानः श्रीभगवानग्निः। त्वां दृष्ट्वा प्रीतं जातं वह्निं देवानां हविर्वाहकं प्रापकम्। वहतु [१]प्रापयतु ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम्।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥
(मा. २९।४)

पृथिव्यां वेद्याम्। उरु। [२]पृथु स्थूलम्। प्रथमानं पृथुभावमापद्यमानम्। स्तीर्णं विस्तीर्णम् आस्तृतं बर्हिः। जुषाणा। व्यत्ययः। [[३]जुषाणम् [४]सेवमानम्।] [५]सुष्टरीमा 'स्तृञ् आच्छादने' [१२५३ स्वादिः] शोभनमावरणं कुर्मः। अश्वं प्रतीति शेषः। देवेभिर्युक्तमदितिः सजोषाः। देवेभिः [[६]देवैः] युक्तमश्वम्। सजोषं समानजोषणम्। स्योनं सुखम्। कृण्वाना। अदितिः देवमाता। सुविते [७]सुष्ठु इते खाद्ययुक्तप्रदेशे। दधातु स्थापयतु ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा विपक्षोभिः श्रयमाणा उदातैः।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥
(मा. २९।५)

[८]हे सुभगाः सौभाग्यसंपन्ना हे ऋत्विग्यजमानाः आश्वमेधिकाः। वः युष्माकम्। एता उ एव द्वारः [९]अश्वमेधयज्ञद्वारः। सुप्रायणाः भवन्तु। ताः कथंभूता इति। विश्वरूपा विपक्षोभिः।

---

१ 'प्रापयतु' नास्ति—ख०। २ 'पृथु' इति नास्ति—क०। ३ जुषाणाः—क०, जुषाणां—ख०। ४ सेवमानाः—क०, सेवमानां-ख०। ५ सुष्टरीम—क०। ६ वेति—क० ख०। ७ सुष्ठु रस्यायुक्तप्रदेशे—ख०। ८ 'हे सुभगाः' इति नास्ति—ख०। ९ यज्ञगृहद्वारः—ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्यत्ययः। विपक्षाभ्याम् उभयपार्श्वाभ्यां विश्वरूपाः विचित्ररूपाः चित्रपक्षैर्विचित्रिताः। श्रयमाणा उदातैः। उत् आतैः 'अत सातत्यगमने' [३८ भ्वादिः] [1]उत्कृष्टगन्तृभिः श्रयमाणाः आश्रयमाणाः सेवमानाश्च। भवन्तु सन्तु। ऋष्वाः सतीः सुषिराः सतीः। कवषः [[2]कुषिताः]। शुम्भमानाः शोभमानाः। द्वारो देवीः देव्यः। सुप्रायणाः सुप्रशमनयुक्ताः। भवन्तु ॥ ५ ॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने।
उषासा वाᳫँ सुहिरण्ये सुशिल्पे ऋतस्य योना इह सादयामि ॥ ६ ॥
(मा० २९।६)

[3]अन्तरा मध्ये। मित्रावरुणा अन्तरा मित्रावरुणयोर्मध्ये। मित्र इत्ययं लोकः। वरुण इत्यसौ लोकः। "अयं वै लोको मित्रोऽसौ वरुणो यदेवेदमन्तरेण" इति श्रुतेः [शत० ब्रा० १२।९।२।१२]। मित्रावरुणयोर्द्यावापृथिव्योर्मध्ये। मुखं यज्ञानामभिसंविदाने। यज्ञानां मुखम् अग्निहोत्रम्। अभि आभिमुख्येन। संविदाने अग्निहोत्रस्य होमकाले संविदाने संवादयन्त्यौ कथयन्त्यौ होमकालं सूचयन्त्याविव। उषासा। नक्तशब्दस्याध्याहारः। नक्तोषासा। छान्दसं पदम्। नक्तोषसे। चरन्ती चरन्त्यौ भवतः। वां सुहिरण्ये सुशिल्पे ऋतस्य योनौ। तयोः वां युवयोः सम्बन्धिनि। सुहिरण्ये साधुहिरण्ये हिरण्यालङ्कारभूषिते। सुशिल्पे शोभनविचित्रयुक्ते। ऋतस्य सत्यस्य। इह अस्याम्। योनौ स्थाने। दम्पती यजमानौ। [4]सादयामि। एवं स्थापनादिद्वारा अश्व एव स्तूयते ॥ ६ ॥

प्रथमा वाᳫँ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥
(मा० २९।७)

---

१ उत्कृष्टं गन्तृभिः–क०। २ कवषः कविताः–क० ख०।
३ 'अन्तरा मध्ये मित्रावरुणा। मित्रावरुणा अन्तरा' इति खपुस्तकपाठः।
४ सादयामि स्थापयामि–खपुस्तके।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रथमा वाम् । प्रथमा होतारा हे [1]प्रथमौ होतारौ । अयं चाग्निरसौ मध्यमो वायुरित्येतौ होतारौ । कथंभूतौ । सरथिना सरथिनौ समानरथवन्तौ । सुवर्णा सुवर्णौ शोभनवर्णवन्तौ । देवौ द्योतनादिगुणवन्तौ [2]मध्यस्थतया पश्यन्तौ भुवनानि विश्वा । विश्वा सर्वाणि भूतानि पश्यन्तौ । श्रीभगवदात्मकत्वेन भुवनानां साक्षाद्द्रष्टारौ । [3]वां युवाम् । अपिप्रयम् । [4]प्रीणातेर्णिजन्तस्य लुङि उत्तमैकवचनस्यैतद्रूपम् । एवं गुणयुक्तौ होतारौ [5]प्रीणितवानस्मि युवयोः प्रीणनं कृतवानस्मि । चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता । चोदना चोदनेति चोदनाप्रमाणकं कर्म लक्ष्यते । वां युवयोः दम्पतीयजमानयोः युवयोः । मिमाना मिमानौ । ज्योतिः पारमार्थिकं ज्योतिःस्वरूपम् । दिशन्ता हितमुपदिशन्तौ होतारौ । प्रदिशा । व्यत्ययः । [6]प्रदिशतम् उपदिशतमित्यर्थः ॥ ७ ॥

आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् ।
इळोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८ ॥
(मा. २९।८)

आदित्यैर्नः । देवैः सहिता श्रीभारती । नः अस्माकम् । वष्टु यज्ञम् । वष्टु 'वश कान्तौ' [१०८० अदादिः] कामयन्ती सरस्वतीदेवता रुद्रैः सहिता । नः अस्मान् । आवीत् अवतु । इळोपहूता वसुभिः । अत्रोपहूता इळानाम देवी वसुभिः सहिता । सजोषाः समानप्रीतिमती । नः अस्मान् । आवीत् अवतु । एवं संस्तुताः अपरोक्षीकृताः [7]त्रियो देव्यः । नः अस्माकम् । यज्ञम् । हे देव्यः, अमृतेषु देवेषु । यूयं धत्त स्थापयत ॥ ८ ॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ ९ ॥
(मा० २९।९)

---

१ 'प्रथमौ' इति नास्ति–ख० । २ अध्यस्ततया–ख० । ३ 'तौ कौ वाम्' इति–क-ख० । ४ प्रीणयतेरेतद्रूपम्–ख० । ५ प्रीणीतवान्–ख० । ६ प्रदिशतेव पदस्थितमित्यर्थः–ख० । ७ 'तिस्रो देव्यः' इति उवटमहीधरौ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वष्टा यः [1]पत्रादितनूकरणकर्ता संहरणकर्ता । देवकामं देवैः काम्यमानमृणत्रयापाकरणदक्षम् । वीरं पुत्रम् । जजान 'जनी प्रादुर्भावे' [११४९ दिवादिः] जनयति । किं च, त्वष्टुः सकाशात् । अर्वा अरणभूतः । आशुः शीघ्रगामी । अश्वः उक्तलक्षणः । जायते । त्वष्टेदं विश्वं भुवनं जजान । इदं विश्वं सर्वं भुवनजातम् । त्वष्टा जजान जनयति । तमेव गुणसंपन्नं बह्वोः बहुविधभूतग्रामस्य कर्तारं श्रीभगवन्तं त्वष्टारम् । होतः, इह यज्ञे । यक्षि यजस्व ॥ ९ ॥

अश्वो॑ घृ॒तेन॑ त्म॒न्या॑ सम॑क्त॒ उप॑ दे॒वाँ२ ॠ॑तु॒शः पाथ॑ एतु ।
व॒न॒स्पति॑र्दे॒वलो॒कं प्र॑जा॒नन्न॒ग्निना॑ ह॒व्या स्व॑दि॒तानि॑ वक्षत् ॥ १० ॥
(मा. २९।१०)

अश्वः । त्मन्या । छान्दसं पदम् । आत्मना स्वयमेव । घृतेन समक्तः [2]सञ्जितः । उपदेवानृतुशः । ऋतावृतौ पाथः देवानामन्नं भूत्वा । देवान् उपैतु उपगच्छतु । किं च, [3]वनस्पतिः प्रयाजदेवता । देवलोकं प्रजानन् अवगच्छन् स्वयमश्वस्य देवलोकं दर्शयन्नुपगच्छतु । किं च, अग्निना हव्या । अग्निना च शामित्रेण । स्वदितानि [4]मुष्टीकृतानि । हव्यानि हवींषि । वक्षत् अश्वः वनस्पतिश्च वहतु[5] ॥ १० ॥

प्र॒जाप॑तेस्तप॑सा वावृधा॒नः स॒द्यो जा॒तो द॑धिषे य॒ज्ञम॑ग्ने ।
स्वाहा॑कृतेन ह॒विषा॑ पुरोगा या॒हि सा॒ध्या ह॒विर॑दन्तु दे॒वाः ॥ ११ ॥
(मा. २९।११)

हे श्रीभगवन्नग्ने, त्वं प्रजापतेस्तपसा जातः । सद्यो वावृधानः अतिशयेन वर्द्धमानः । यज्ञं दधिषे [6]देवताभ्योऽर्थाय धारयसि । स्वाहाकृतेन हविषा [7]स्वाहाकारेण संपादितेन हविषा

---

१ पापादि—ख० । २ स्मजीत-ख० । ३ 'वनस्पतिः .... किं च' इति कपुस्तके नास्ति । ४ 'मृष्टीकृतानि' इति उवटः, 'मिष्टीकृतानि' इति महीधरः । ५ वहत्-ख० । ६ देवताभ्यर्थायसि—ख० । ७ 'स्वाहाकारेण संपादितेन हविषा' इति नास्ति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सह । स्वभावतः पुरोगाः अग्रयायिन्, [1]त्वं याहि । देवलोकं प्रतीति शेषः । तत्र साध्या नाम देवाः [2]त्वया यद्धुतं हविः । अदन्तु भक्षयन्तु ॥ ११ ॥

इत उत्तरमश्वस्य रक्षिणस्तद्युद्धोपकरणानि च स्तूयन्ते—

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः ॥ १२ ॥ (मा० २९।३७)

आग्नेयी गायत्री । ऋषिर्मधुच्छन्दाः । केतुं कृण्वन्नकेतवे । केतुरिति प्रज्ञानाम [निघ० ३।६] केतुः प्रज्ञा न विद्यते यस्य स अकेतुस्तस्मै अकेतवे प्रज्ञानशून्याय लोकाय । हे श्रीभगवन्नग्ने, त्वाम् अकेतवे केतुं प्रज्ञाम् । मर्याः मनुष्याः ब्राह्मणास्ते सर्गादौ सृष्टाः । कृण्वन् कुर्वन् । पेश इति सुवर्णनाम [निघ० १।२] । पेशो न विद्यते यस्य स अपेशस्तस्मै अपेशसे । अग्निं त्वां पेशः कृण्वन् । यद्वा पेश इति सुखनाम । अपेशसे सुखरहिताय । त्वामेव पेशः कृण्वन्तु । [3]अतस्त्वत्त एव सर्वेषां सुखं भवतीति प्रसिद्धम् । समुषद्भिरजायथाः । 'उष दाहे' [६९६ भ्वादिः] । उषद्भिः हवनं कुर्वद्भिः अग्निहोत्रादिहवनं कुर्वद्भिर्यजमानैः । अजायथाः जातोऽसि । यद्वा वसतेः कृतसंप्रसारणस्यैतद्रूपम् । उषद्भिरित्यग्निं [4]प्रति निवसद्भिर्यजमानैररण्यामजायथाः । यस्त्वं जातोऽसि तमग्निं त्वां केतुं कृण्वन्निति सम्बन्धः ॥ १२ ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे।
अनाविद्धया तन्वा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ १३ ॥
(मा० २९।३८)

लिङ्गोक्तदेवत्या त्रिष्टुप् । ऋषिर्भरद्वाजः । जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । 'मदि [5]स्तुतिमोदमदस्वप्नगतिषु' [१३ भ्वादिः] । समदः संग्रामाः । सशब्दः सहार्थः, सह योद्धारः सह परस्परं यत्र माद्यन्तीति समदः संग्रामाः । तेषां समदां

---

१ त्वा—ख० । २ त्वयोपवहस्वम्—ख० । ३ 'अतः' नास्ति—ख० । ४ प्रसवद्भिः—ख० । ५ 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' इति धातुपाठस्थः पाठः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संग्रामाणाम् । उपस्थे उत्सङ्गे[1] । यत् यदा । वर्मी कवची । वर्मणा संनद्धः । याति गच्छति । तदा जीमूतस्य [2]मेघस्य । प्रतीकं मुखमिव, मेघस्य मुखे यथा विद्युत्स्तनितादि भवति तद्वत् स्तूयते । तथा हस्त्यश्वरथपदातीनां परस्परं संनादः शस्त्रास्त्राणां परस्परं संघर्षः स्फुरणादीन्यपि भवन्तीति[3] एवमतो ब्रवीमि । अनाविद्धया तन्वा जय । अक्षतया तन्वा शरीरेण जय । त्वा वर्मणो महिमा पिपर्तु । वर्मणो महिमा माहात्म्यम् । त्वा योद्धारं त्वाम् । पिपर्तु पालयतु 'पॄ पालनपूरणयोः' । [१०८६ जुहोत्यादिः] त्वयि सर्वाणि बलानि पूरयतु त्वां संपूर्णशक्तिं करोतु ॥ १३ ॥

धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम॒ धन्व॑ना ती॒व्राः स॒मदो॑ जयेम ।
धनु॒ः शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वा॑ः प्र॒दिशो॑ जयेम ॥ १४ ॥

(मा० २९।३९)

धनुःस्तुतिः । त्रिष्टुप् । भरद्वाजः । धन्वना धनुषा । गाः [4]भुवः प्रदेशविशेषान् देशान् । जयेम । धन्वना धनुषा । आजिं [5]मार्गम् । जयेम । धन्वना तीव्राः [6]अतिपटवः उद्गूर्णायुधाः । समदः संग्रामाननेकान् । जयेम । धनुः अस्मदीयं धनुः । शत्रोः वैरिणः । अपकामम् अपगतार्थफलशून्यकामम् तं शत्रोः कामं विफलम् । [7]कृणोति [8]करोतीत्यर्थः । धन्वना सर्वाः [9]दिशः प्रदिशः विदिशश्च जयेम ॥ १४ ॥

ते आ॒चर॑न्ती॒ सम॑नेव॒ योषा॑ मा॒तेव॑ पु॒त्रं बि॑भृतामु॒पस्थे॑ ।
अप॒ शत्रू॑न् विध्यताᳪं संविदा॒ने आर्त्नी॑ इ॒मे वि॑ष्फु॒रन्ती॑ अ॒मित्रा॑न् ॥१५॥

(मा० २९।४१)

---

१ उत्सङ्गे चरणरङ्गे-क० । २ 'मेघस्य । प्रतीकं मुखमिव' इति नास्ति-क० । ३ 'भवन्तीति भावयते' इति-क-ख० । ४ 'भुवः' स्थाने 'मातुः'-ख० । ५ 'मार्गम्' नास्ति-ख० । ६ 'अतिपटवः उद्गूर्णायुधाः' इत्यस्य स्थाने 'अतिवा' इत्येव पाठः-ख० । ७ कृणुत-ख० । ८ करोत्वित्यर्थः-ख० । ९ 'दिशः प्रदिशः विदिशश्च जयेम' इत्यस्य स्थाने 'प्रदिशः प्रदिशश्च जयेम' इति पाठः-ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धनुषः कोटी स्तूयेते। त्रिष्टुप्। ये इमे आत्मधनुषः कोटी ते आचरन्ती समनेव योषा। समना समानवचना। सुयोषेव भार्येव। मातेव पुत्रम्। उपस्थे उत्संङ्गे। बिभृतां धारयताम्। अप शत्रून् विध्यताम्। 'व्यथ [व्यध] ताडने' [११८१ दिवादिः], शत्रून् अपविध्यताम्। संविदाने परस्परं संवादं कुर्वाणे। इमे आर्त्नी धनुषः। विस्फुरन्ती विस्फुरन्त्यौ विशेषेण स्फुरन्त्यौ स्फुरणवन्त्यौ। अमित्रान् शत्रून्। अपविध्यताम्। समना। समने इति व्यत्ययः। समनस्के। योषा। योषे इति व्यत्ययः। पतिमित्यध्याहारः। इव यथा समनस्के योषे भार्ये एकं पतिं बिभृताम्, माता च पुत्रमुत्सङ्गे बिभर्ति, तथा ये आर्त्नी इमे अस्मदीये धनुषः कोटी ते। ज्यामित्यध्याहारः। ज्यामाचरन्ती आचरन्त्यौ ज्याः बिभृताम्। किं च आर्त्नी धनु[षः] कोटी। विस्फुरन्ती विस्फुरन्त्यौ। अमित्रान् शत्रून्। अपविध्यताम् अमित्रान् तान् ताडयताम्[1] ॥ १५ ॥

वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना।
योषेव शिङ्क्ते वितताधि धन्वन् ज्या इयꣳ समने पारयन्ती ॥ १६ ॥
(मा. २९।४०)

ज्यास्तुतिस्त्रिष्टुप्। 'वच परिभाषणे' [१०६३ अदादिः]। वक्ष्यन्तीव अभिधास्यन्ती इव। इत् आगनीगन्ति आगच्छन्ती। कर्णं कर्णमूलम्। प्रियं सखायमिव। परिषस्वजाना 'षञ्ज ? [स्वञ्ज] परिष्वङ्गे' [९७६ भ्वादिः] परिष्वङ्गं कुर्वन्ती आलिङ्गनं कुर्वन्ती। योषा इव। शिङ्क्ते 'शिजि अव्यक्ते शब्दे [१०२७ अदादिः] वर्णाभिव्यक्तिशून्यं शब्दं करोति। यथा योषा कामुका रतिकाले अव्यक्तशब्दं वदतीव। वितताधि धन्वन् ज्या इयं समने पारयन्ती। धन्वन् धन्वनि उपरि। वितता व्याप्ता। इयं ज्या। समने संग्रामे। पारयन्ती [2]संग्रामात्तारयन्तीति ज्या स्तुता ॥ १६ ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांꣳसं परिपातु विश्वतः ॥ १७ ॥
(मा. २९।५१)

---

१ ताडयन्ती—क० ख०। २ 'पारयन्ती' इत्यस्याग्रे 'जयन्ती' इत्यधिकं खपुस्तके।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हस्तघ्नः स्तूयते। हस्ते स्थितो यो ज्यया हन्यत इति हस्तघ्नः, यश्चर्मादिभिर्निर्मितो हस्तरक्षकः स हस्तघ्न इति। हस्तघ्नदेवत्या त्रिष्टुप्। ऋषिर्भरद्वाजः। यः अहिरिव सर्प इव। भोगैः स्वशरीरावयवैः। पर्येति बाहुं हस्तं पर्येति परिवेष्टयति। ज्याया हेतिम्। छान्दसं पदम्। हेतिम् [1]आयुधम्। परिबाधमानः परिहरन्। हस्तघ्न इति विशेष्यपदम्। एवं गुणो हस्तरक्षकः। विश्वा विश्वानि सर्वाणि। [2]वयुनानि प्रज्ञानानि सर्वापायविषयाणि। विद्वान् जानन्। यं देवतात्वेन स्तौति। पुमान् पुंस्त्ववान्। शूरः अक्लीबः। पुमांसं स्वधारक्षकम्। विश्वतः सर्वतः। परिपातु रक्षतु॥ १७॥

> बह्वीनां पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य।
> इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥ १८॥
>
> [मा. २९।४२]

इषुधिः स्तूयते। इषुधिदेवत्या त्रिष्टुप्। बह्वीनाम् इषूणाम्। पिता पालकः। तेन हीषवः पाल्यन्ते। [3]बहूनामाधारत्वेनोपचारः। स्वयमपीषुधिर्बहुरित्युच्यते। अस्य इषुसमूहस्य [4]पुत्रस्ताभिः स्वोदरपूरणेन त्रायत इति पुत्रः। चिश्चाकृणोति समनावगत्य। स इषुधिः समनान् संग्रामान्। [5]अवगत्य ज्ञात्वा। चिश्चाकृणोति शब्दानुकरणम्। स हि इषौ निष्क्रम्यमाणे चिश्चेति शब्दं करोति। तत्र संग्रामेषु स इषुधिः धानुष्केण पृष्ठे निनद्धः 'णह बन्धने' [११६६ दिवादिः] नितरां धानुष्मतः अपरभागे बद्धः। प्रसूतः अनुज्ञातश्च सन्। संकाः संकाशं दधतेऽस्मिन् योधा इति संकीर्यन्ते वाऽस्मिन् योधा इति संकाः, शत्रुसंकटं

---

१ आघातम्—क०। आयुधवातम्—ख०।

२ 'वयुनानि प्रज्ञानानि सर्वापायविषयाणि' इत्यस्य स्थाने 'वयुनानि सर्वोपायविषयाणि' इति—ख०।

३ बहूनामित्यतः प्राक् 'बहुः' इत्यधिकं खपुस्तके।

४ 'पुत्रस्ताभिः स्वो····' इत्यस्य स्थाने 'पुत्रः नातिस्वो····' इति पाठः—ख०।

५ 'अवगत्य ज्ञात्वा' इत्यादिव्याख्यानं खपुस्तके नास्ति। तत्स्थाने—'अततिस्तू विक्षेपे संग्रामे तातारिता चितता संक्षीय इति संकाः। वर्णलोपश्छान्दसः। सर्वाः पृतनाः इषुधिः जयतीति' इति पाठः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वा । 'कॄ विक्षेपे' [१४१० तुदादिः] । संग्रामे जालवितितिवत् संकीर्यन्ते इति संका इति पृतनाविशेषणं वा । वर्णलोपश्छान्दसः । पृतनाः इषुधिर्जयतीति स्पर्द्धनीयतमाः संग्रामभक्तीः सर्वाः ॥ १८ ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ १९ ॥

[मा. २९।४८]

इषुं स्तौति । इषुदेवत्या त्रिष्टुप् । सुपर्णं वस्ते । या इषुः सुपर्णम् । सुपर्णः पक्षी तद्विकारः सौपर्णस्तम् । वृद्धिलोपश्छान्दसः । सुपर्णं पक्षम् । [1]वस्ते । पुंस्त्वनिबन्धनार्थमिति शेषः । मृगो अस्या दन्तः । या इषुस्तस्या अस्या इषोर्दन्तः दन्तवद्दन्तः शत्रूणां [2]प्राणभक्षणसाधनाद् दन्तः [3]नाराचाग्रः । मृगश्च[4]वेध्यं मृगयन्त इति मृगः । गोभिः [5]वायुभिः वीर्यवद्भिः । संनद्धा संबद्धा[6] । पतति प्रसूता शत्रुबलं प्रति प्रसूता धनुषः प्रणोदिता पतति । यत्रा नरः सं च वि च द्रवन्ति । तत्र तस्मिन् प्रदेशे नरः योद्धारः इषवश्च अभिद्रवन्ति गच्छन्ति तत्रास्मभ्यम् इषुः संग्रामे प्राप्ते च । शर्म सुखम् । शर्म शरणं वा । यंसन्[7] अयंसन् यच्छन्तु ॥ १९ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥ २० ॥

[मा. २९।५२]

रथदेवत्या त्रिष्टुप् । हे वनस्पते, वीड्वङ्गः । वीडुशब्दो दृढवचनः [निघ० ३।९, निरु० ६।१२] । दृढः[8] दृढाङ्गः । भूयाः भव । हि यस्माद् [9]वीड्वङ्गस्तस्मात् । अस्मत्सखा

१ 'वस्ते' नास्ति–ख० । २ प्राणरक्षण–क० । ३ नराचाग्रः–क० । ४ 'वेध्यम्' इत्यस्य स्थाने 'तेभ्यः'–ख० । ५ 'वायुभिः' इत्यस्य स्थाने 'बहुभिः'–ख० । ६ 'संबद्धा' नास्ति–ख० । ७ 'यंसन् संसत् अयंसत् यच्छतु' इति खपुस्तके । ८ 'दृढः दृढाङ्गः' इत्यस्य स्थाने 'दृढः हि' इति पाठः–ख० । ९ 'वीड्वङ्गस्तस्मात् । अस्मत्' इति नास्ति–ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतरणः । प्रतरन्ति संग्राममनेनेति प्रतरणः । सुवीरश्च विक्रान्तश्च । गोभिः संनद्धः । [१]गोविकारैश्चर्मभिः संनद्धोऽसि[२] । अतस्त्वां ब्रवीमि । वीळयस्व आत्मानं संस्तम्भय दृढीकुरु च । आस्थाता ते । तव आस्थानस्य कर्ता च । जयतु जेत्वानि । जेतव्यानि जयतु ॥ २० ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥२१॥
(मा. २९।४३)

[३]सारथिरस्याश्च देवता । जगती । पूर्वोक्त एव ऋषिः । रथे स्यन्दने तिष्ठन् सारथिम् नयति । वाजिनः [[४]अश्वान्] नयति । पुरः पूर्वम् । [५]सुषारथिः सुशोभनः सारथिर्यस्य स सुषारथिः । [६]रथी पूर्वं प्रथमं यत्र यत्र कामयते यं यं देशं यं यं योद्धारं वा गन्तुं ज्ञातुं च इच्छति तं देशं रथे तिष्ठन् सारथिर्नयतीति सम्बन्धः । अभीशूनां महिमानं पनायत । अभीशूनां प्रग्रहाणां रविकिराणाम् । महिमानं माहात्म्यम् । पनायत । 'पण व्यवहारे' [स्तुतौ च ४३९, पन च ४४० भ्वादिः] । पनायत व्यवहरतेति । स्वेच्छया रज्ज्वाकर्षणादिकं करोति । मनः पश्चादनुयच्छन्ति रश्मयः । पश्चाद् अश्वस्य मनः रश्मयोऽपि यच्छन्ति नियमयन्तीति ॥ २१ ॥

आजङ्घन्ति सान्वेषां जघनाँ २ उपजिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥२२॥ (मा. २९।५०)

कशां स्तौति । कशादेवत्यानुष्टुप् । आजङ्घन्ति सान्वेषाम् । अश्वानां सानु सानुनि पार्श्वप्रदेशे अश्वारोहाः कशया आजङ्घन्ति । जघनान् जघनप्रदेशान् । उपजिघ्नते उपजिघ्नन्ति ताडयन्ति । अश्वाजनि प्रचेतसः । [७]अश्वानाम् अजनि 'अज गतिक्षेपणयोः' [२३० भ्वादिः]

---

१ गोविकारोश्चवर्मभिः—ख० । २ 'असि' स्थाने 'हि'—ख० ।
३ 'सारथिरस्याश्च''''[अश्वान्] नयति' इति कपुस्तके नास्ति ।
४ 'अस्मात्' इति-क० ख० । ५ 'सुषारथिः' नास्ति—ख० ।
६ 'रथी पूर्वं प्रथमम्' इत्यस्य स्थाने 'रथिपूर्वंत्रय' इति खपुस्तकपाठः ।
७ 'अश्वानाम् अजनि' इत्यस्य स्थाने 'अश्वानां याजनि' इति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'णीञ् प्रापणे' [९०१ भ्वादिः] इति च। अजनमजः, अजो नीयते यया कशया सा भवति अजनिः। अश्वस्य अजनिः अश्वाजनिः। कशासंबोधनम्। हे अश्वाजनि, प्रचेतसः [1]प्रकृष्टज्ञानान् अश्वशिक्षाविधिज्ञानसंयत्रान्[2] अश्वान्। समत्सु संग्रामेषु। चोदय ॥२२॥

उप॑श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्।
स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑सेध॒ शत्रू॑न् ॥२३॥

(मा. २९।५५)

दुन्दुभिदेवत्या त्रिष्टुप्। उपश्वासय पृथिवीमुत द्याम्। हे दुन्दुभे, पृथिवीम् उपश्वासय 'श्वस प्राणने' [१०६९ अदादिः]। तव घोषेण पृथिवीम् आश्वासय अनातङ्कां कुरु। उत अपि। द्याम् उपश्वासय श्लथां कुरु। पुरुत्रा ते मनुतां विष्ठितं जगत्। पुरुत्रा बहुधा। ते त्वया। जगत् स्थावरजङ्गमात्मकं जगत्। त्वयैव स्थितं विशेषेण स्थितं सुस्थितं जातमिति। मनुतां जानातु। दुन्दुभे, सजूरिन्द्रेण देवैश्च सजूः समानप्रीतिः समानजोषणः। दूराद्दवीयः दूरादपि दूराद् अतिदूरादेव। शत्रून् अपसेध अपगमय। अस्माकं च जयमावह ॥२३॥

यदक्र॑न्दः प्रथ॒मं जाय॑मान उ॒द्यन्त्स॑मु॒द्रादु॒त वा॒ पुरी॑षात्।
श्ये॒नस्य॑ प॒क्षा ह॑रि॒णस्य॑ बा॒हू उ॑प॒स्तुत्यं॒ महि॑ जा॒तं ते॑ अर्वन् ॥२४॥

(मा. २९।१२)

[3]त्रयोदशाप्रीरश्वस्तुतिः। त्रिष्टुभः। भार्गवो जमदग्निर्ददर्श दीर्घतमाश्च। अर्वन्, यत् यदा अक्रन्दः हेषितशब्दमकार्षीः अक्रन्दः। तदेत्याह–प्रथमं जायमानः। जायमानः प्रथमं यदक्रन्दः। कस्माज्जायमान इति ? उद्यन्त्समुद्रादुत वा पुरीषात्। यश्च त्वं समुद्रात्। समुद्र इत्यन्तरिक्षनाम [निघ० १।३]। अन्तरिक्षात् समुद्रात् पार्थिवाद्वा समुद्रात्। यस्मात्कारणात् समुद्रवति कार्यं स समुद्रः। तस्मात् समुद्रात्। उद्यन् उद्गच्छन्। उत अपि वा[4]। पुरीषात्। पुरीषमित्युदकनाम [निघ० १।१२]। [5]उदकसंघात्। उद्यन् अक्रन्दः हेषितमकरोस्तदेव[6]।

---

१ प्रकृष्टप्रज्ञानान्–ख०। २ विधिज्ञान् सम्पन्नान्–ख०। ३ त्रयोदशाप्रीणः ताः अश्वस्तुतिः–ख०। ४ 'वा' स्थाने 'च'–ख०। ५ उदकसंघातात्–ख०। ६ तदैव हि–ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[1]हे अर्वन्, तव महिमा उपस्तुत्यं जातम्। वेगवत्त्वादिश्रवणीयगुणैरुपस्तुत्यम् उपस्तवनार्हं जातमभूत्। वेगत्वादौ दृष्टान्तमाह—श्येनस्य पक्षा हरिणस्य बाहू। श्येनस्य शशादनस्य पक्षा पक्षौ लुप्तोपमं पदम्। पक्षाविवायमश्वो वेगवान्। हरिणस्य बाहू इव। लुप्तोपमं पदं चैतत्। बाहू शब्देनात्र पूर्वपादौ विवक्षितौ। तद्वद्वेगवानश्व इति। तव महि स्तुत्यं जातमिति। यद्वा श्येनस्य [2]पक्षौ हरिणस्य बाहू[3] अतिवेगवत्त्वादश्वोऽजैषीदिति शेषः ॥२४॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ २५ ॥

[मा. २९।१३]

यमेन जगन्नियन्त्रा नियामकेन। दत्तं तमश्वम्। इतस्त्रिषु स्थानेषु भूरादिषु आत्मानं तनोतीति त्रितः त्रिस्थानो वायुः। आयुनक् आयुनक्तवान्। इन्द्र एणं प्रथमो अध्यतिष्ठत्। प्रथम इन्द्रः सर्वेषामादिभूतः परमैश्वर्ययुक्तः। एनमश्वमध्यतिष्ठत् अधिष्ठानं कृतवान्। गन्धर्वो अस्य रशनाम्। अश्वस्य रशनां रज्जुम्। गन्धर्वः विश्वावसुः। अगृभ्णात् गृहीतवान्। सूरात् सूर्योपलक्षितसूर्यमण्डलात्। अश्वं वसवो नाम देवा निरतष्ट। [4]तक्षति करोति। अत्र तक्षतिः [5]करोतिकर्मा। [6]अकृष्टवन्तः [7]समभूमिं प्रतीति शेषः ॥ २५ ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ २६ ॥

[मा. २९।१४]

अश्वः स्तूयते। हे अर्वन् अश्व। त्वं यमोऽसि नियन्तासि। आदित्योऽसि। [8]त्रितोऽसि वायुरसि। गुह्येन [9]गोप्येन। व्रतेन कर्मणा। त्रितो भवति। सोमेन चन्द्रेण। समया [10]शमेन।

---

१ 'हे अर्वन्, तव महिमा' नास्ति–ख०। २ पक्षा–ख०। ३ बाहू च–ख०।
४ 'तक्षति करोति। अत्र तक्षतिः करोतिकर्मा' इत्यस्य स्थाने 'तृहिरत्र कृतिकर्मा' इति खपुस्तके। ५ कृतकर्मा–क०। ६ निष्कृष्य कृतवन्त इति उवटः, निष्कृष्टवन्त इति महीधरः।
७ 'भूमिम्' इत्येव पाठः–ख०। ८ असि त्रितः–ख०। ९ गोपनव्रतेन–ख०। १० समेन–ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विप्रक्तः संयुक्त एकीभूतो देवतासायुज्यं प्राप्त इति भावः। किंच, आहुस्ते त्रीणि दिवि बन्धनानि । [1]दिवि द्युलोके आदित्यात्मनावस्थितस्य त्रीणि बन्धनानि ऋग्यजुःसामलक्षणानीत्याहुः ॥ २६ ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥२७॥

(मा. २९।१५)

हे [2]अर्वन् हे अश्व, ते तव। [3]दिवि द्युलोके स्थितस्य। त्रीणि [4]ऋग्यजुःसामलक्षणानि बन्धनान्याहुः। त्रीण्यप्सु अद्भिरुपलक्षितभूमौ स्थितस्य ते त्रीणि आकृष्टिवृष्टिबीजानि। त्रीण्यन्तःसमुद्रे। समुद्रे अन्तरिक्षे अन्तः मध्यस्थितस्य तव त्रीणि बन्धनानि मेघविद्युद्वायव इति त्रीणि। उत इव मे वरुणश्छन्त्सि। अपि वरुणोऽप्येवं छन्त्सि शंसति कथयति। हे अर्वन्, यत्र ते तव। परममुत्कृष्टतमम्। जनित्रं [5]जन्म। आहुः वेदा वदन्ति। तत्र शंसति ॥२७॥

इमा ते वाजिन्नवमार्जनानीमा शफानाꣳ सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥२८॥

(मा. २९।१६)

हे वाजिन्, इमा इमानि। ते तव। अवमार्जनानि वेतसकटप्रभृतीनि कृतानि अपद्रष्टास्मि। इमा इमानि। शफानां सनितुः 'षणु दाने' [१४६५ तनादिः] अभीष्टफलप्राप्तिरश्वस्य शफानां पादक्षुराणां निधाना इमा इमानि निधानानि पदविक्षेपणानि। अपश्यं दृष्टवानस्मि। अत्रा ते भद्राः। अत्र स्थितस्य मेध्यस्य अश्वस्य। ते तव। भद्राः भन्दनीयाः स्तुत्याः। रशनाः [6]रश्मयः। ताः अपश्यम्। ऋतस्य यज्ञस्य सम्बन्धिनमश्वम्। या

---

[1] 'दिवि''''लक्षणानीत्याहुः' इति खपुस्तके नास्ति। [2] 'हे अर्वन् हे अश्व, ते तव' इति नास्ति-ख०। [3] 'दिवि द्युलोके आत्मन्यात्मनावस्थितस्य' इति-ख०। [4] 'ऋग्यजुःसामलक्षणानि' इति नास्ति-ख०। [5] 'जन्म। आहुः' इत्यस्य स्थाने 'जन्यमाहुः' इति पाठः-ख०। [6] रज्जवः-ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अभिरक्षन्ति गोपाः। या रशनाः। गोपाः [1]गोप्यः। अभिरक्षन्ति। ता रशना अपश्यमिति सम्बन्धः॥ २८॥

अथ भविष्यत्कालकर्मभिरश्वं स्तौति—

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम्।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ २९॥
(मा. २९।१७)

पशुसंदर्शनोत्तरकालमात्मानं ते मनसा आराद् अजानाम्। छान्दसं पदम्। अजानाम् अजानम्। हे अश्व, तवात्मानं चारात् दूरादेव। मनसा अजानं ज्ञातवानस्मि। अवो दिवा पतयन्तं पतङ्गम्। दिवा द्युस्थानात्। पतयन्तं पतन्तम्। पतङ्गं सूर्यम्। हे अश्व, त्वम्। अवः 'अव रक्षणे' [६३६ भ्वादिः]। रक्षणमकरोः, रक्षणं कृतवानसि। शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि। हे [2]अश्व, ते शिरः पतत्रि उत्पतनशीलं शिरः। सुगेभिः सुगमैः। अरेणुभिः अनुपद्रवैः। पथिभिः मार्गैः। जेहमानं गच्छन्। पतत्रि पतनशीलं ते शिरः। अपश्यं दृष्टवानस्मि॥२९॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आपदे गोः।
यदा ते मर्तो अनु भोगमानळादिद् ग्रसिष्ठ ओषधीरजीगः॥ ३०॥
(मा. २९।१८)

अत्र द्युलोके। ते तव। जिगीषमाणं जेतुमिच्छमानम्। उत्तमं रूपमहमपश्यं जातं दृष्टवानस्मि। इष आपदे गोः। स्वर्गलोकस्य आपदे स्थाने। इषः अन्नानि। अदृष्टं संपादितानि अपश्यम्। अथ पुनः पृथिव्यां स्थितस्य। ते तव। यदा ते मर्तः। [3]आवर्तः मनुष्यपर्यन्तः यं भोगं तं ते [4]तव आनट् अनुव्याप्नोति। आनट् 'णह बन्धने' [११६६ दिवादिः] आनह्यते [5]आबध्यत इति आनट् वाहनादि। किं च, आत् समन्तात्। इत् एव। ग्रसिष्ठः '[6]ग्रस अदने' ग्रसिष्ठः अतिशयेन भक्षितवानसि। ओषधीश्च अर्जीगः गृह्णासि गिरसि वा॥ ३०॥

---

१ 'गोप्यः' इति नास्ति–ख०। २ 'हे अश्व, ते शिरः पतत्रि' नास्ति–ख०।
३ आरर्त्तः–क०। ४ 'ते तव' इत्यस्य स्थाने 'देवा' इति पाठः–ख०।
५ व्यावध्यत–ख०। ६ ग्रसु ग्लसु अदने। [६७०-७१ भ्वादिः]।

CC0. In Public Domain. Jangamwadi Math Collection; Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लघुग्रन्थरत्नप्रभावलिः ३

श्रीमहेश्वरभट्टविरचिता

पथिकजनपातकचिन्तनस्मृतिः

स्वोपज्ञटिप्पणयुता

श्रीव्रजवल्लभद्विवेदेन
प्रस्तावनाटिप्पणीपरिशिष्टादिभिः
समलंकृत्य सम्पादिता।

सारस्वती सुषमा
चैत्रः २००६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषय-सूची

प्रस्तावना	क–घ
पथिकजनपातकचिन्तनस्मृतिः	१–१६
परिशिष्टानि—	
नादिरशाहस्य दिल्लीविजयः (ग्रन्थकारस्य)	१७
ग्रन्थोद्धृतश्लोकांशमूलस्थानपरिचयः	१८
ग्रन्थोद्धृतानि व्यक्तिनामानि	१९
ग्रन्थोद्धृतानि देशस्थानादीनि	१९
श्लोकानुक्रमणी	२०–२२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रस्तावना

अथेयं समुपस्थाप्यतेऽप्रकाशितचराऽश्रुतपूर्वा च यात्रावर्णनपरा 'पथिकजनपातक-चिन्तनस्मृतिः सटिप्पणा। अस्यां हि सर्वसामान्यानुभूतानां यात्राकष्टसंघानां विशेषतः स्वतोऽनुभूतानां च विशदं वर्णनमस्ति। कर्ता चास्याः सटिप्पणायाः श्रीमहेश्वरभट्टः। ग्रन्थकर्त्रा संक्षेपेण स्वकीयः परिचयो ग्रन्थान्ते स्वयमेव वर्णितः, तेन ज्ञायते नादिरशाहकृतदिल्लीविजय-समये ग्रन्थकारस्तत्रैवासीत्, तत्रैव च तेनैष ग्रन्थो विरचित इति। एवं च विक्रमाष्टादशशताब्द्यां तीर्थयात्रिणां समक्षं समापद्यमानानां विषमाणां विभीषिकाणां वर्णनमत्र समुपलभ्यते। तदानीन्तनानां कतिपययुद्धानामप्यत्र दिग्दर्शनं भवति।

यद्यप्यत्र साहसिकयात्रावर्णनं विद्यते, ग्रन्थारम्भे च ग्रन्थकर्तुरुद्देश्यम्—.

अतो ग्रन्थं विचार्यैनं कृता यात्रा सुखप्रदा।
विदेशे सावधानत्वं भविष्यति न संशयः॥

इति दिशा यात्रां विधित्सूनां यात्रिणां सावहितीकरणमेव। तथापि ग्रन्थान्ते पञ्चदशभिः श्लोकैस्तेन यात्रातो विरक्त्युत्पादनमेवाचरितम्। विदेशयात्राया मुख्यमुद्देश्यं तदा धनार्जनमेवासीदिति ग्रन्थावलोकनतः स्फुटं प्रतीयते। मराठीसाहित्ये 'माझाप्रवास'-नामकमेकं यात्रा-पुस्तकं विद्यते, यत्र हि ग्रन्थकर्त्रा दाक्षिणात्येन विष्णुशास्त्रिगोडसेमहाशयेन १८५७ ई० विद्रोहसमये 'झांसी-गवालियर'—आदिस्थानेषु संजातानां वृत्तान्तानां सुविशदं वर्णनं कृतमस्ति। तत्रापि यात्राया उद्देश्यं धनार्जनमेव। तेन वक्तुं शक्यते तस्मिन्पराधीनताकाले भारते साहसिक-यात्राणां प्रायोऽभाव एवासीदिति। एवं सत्यपि संस्कृतसाहित्ये किमुत भारतीयसाहित्येऽपि यात्रावर्णनपराणां ग्रन्थानामभाव एव प्रायो दृश्यते। बौद्धभिक्षुकैर्भारतीयसंस्कृतेः प्रचाराय दक्षिणभारतीयनृपतिभिश्च जावासुमात्रादिद्वीपेषु स्वसाम्राज्यस्थापनाय कृतानां यात्राणां विवरणमपि भारतीयसाहित्ये प्रायो नैव समुपलभ्यते। अस्यामवस्थायां लघुतमस्याप्यस्य यात्रावर्णनपरस्य ग्रन्थस्य महत्त्वं स्वाभाविकम्।

अत्र सर्वप्रथममिष्टदेवतास्मरणानन्तरं निर्धनानां धनाढ्यानामपि च विदेशे कष्टमेव भवति, अतस्तेषां यात्रा सुखप्रदा कथं स्यादिति विषये सावहितीकरणमेव ग्रन्थारम्भस्य प्रयो-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जनम् । ततः क्रमेण ग्रीष्मवर्षाशीतकालिकानां पथिककष्टानाम्, द्वादशसु मासेषु सामान्यरूपेण समापतन्तीनां विषमावस्थानाम्, नद्युत्तारे समापतन्तीनां बाधानाम्, कूर्मांचलकेदारनाथ-बदरीनाथादिहिमाक्रान्तपर्वतमार्गेषु हिंस्रपशुव्याप्तेषु पथिकजनमनसि भयोद्वेगं प्रजनयन्तीनां घटनानाम्, कूर्मांचलमार्गे जयनगरपुष्करमार्गे हरिद्वारयात्रायामन्यत्र च स्वानुभूतानामपि च कष्टविशेषाणां स्वाभाविकं सुसंगतं वर्णनं कृतमस्ति । ततश्च कविः सादतखांन-मनसूर-अलीखांनसेनायां दैवशरूपेण प्रविश्य पकरीपाछापुरग्रामादिषु युद्धं विदधाति । सादतखांन-सेनया सहैव महाराष्ट्रैर्युद्धार्थे वृन्दावनदिल्लीप्रभृतिस्थानेषु गच्छति, धनसंमानौ च प्राप्नोति । दिल्लीनगर एव स्थितस्य तस्य नादिरशाहाभियानसमये सर्वं धनादिकं नश्यति । अन्ते च तद्दुःखदुःखितः कविर्विदेशगमनं भूरिशो निन्दति स्वदेशमेव चाभिनन्दति । ग्रन्थान्ते ग्रन्थ-लेखनकाल उट्टङ्कितः, टिप्पण्यां च तेन स्वकीयः संक्षिप्तः परिचयो दत्तः । मुखपृष्ठे च ग्रन्थकर्त्रा परिशिष्टरूपेण नादिरशाहकृतदिल्लीविजयस्य विवरणं दत्तमस्ति । इत्थमनुष्टुप्छन्दसा निबद्धं सपादशतश्लोकात्मकमेतल्लघुपुस्तकं मनोनुरञ्जिकां सामग्रीं प्रस्तौति । अत्र परिशिष्टस्य रचना च न श्लोकात्मिका, अपि तु गद्यमयी ।

अत्र "नादशाहे समायाते" इति वचनात्, परिशिष्टरूपेण नादिरशाहकृतदिल्लीविजय-विवरणाच्च स्पष्टं प्रतीयते यदयं महानुभावस्तदा दिल्लीनगरे स्वयं वर्तमान आसीत् । अनेन "संवत् १७९५ शके १६६० फागुणशुद्धैकादश्यां दिल्लीमध्यकोटे समागतः" इत्येवं नादिर-शाहस्य दिल्लीप्रवेशतिथिर्दत्ता । एषा च तिथिर्ज्यौतिषगणनया[1] १७३९ ईशवीये मार्चमासे दशमदिवसे विद्यते । नादिरशाहकृतसर्वसंहारस्य (कत्ले आम) अपि विवरणं[2] तेन दत्तम् ।

---

१ 'इण्डियन एफिमेरीज' नामकं तिथितालिकाप्रदर्शकं पुस्तकं द्रष्टव्यम् । 'विलियम इरवेन'-लिखिते 'सर यदुनाथसरकार' संपादिते 'लेटर मुगल्स'-नामके पुस्तके तु ९ मार्च तस्य दिल्लीप्रवेशतिथिर्दत्ता; द्रष्टव्यम्-भाग २, पृ० ३६३ । आशीर्वादीलालश्रीवास्तवरचिते 'फर्स्ट टू नवाब्स आफ अवध'-नामके ग्रन्थे च सा तिथिः १७ मार्च विद्यते । दृश्यताम्—पृ० ७२ ।

२ "ततो द्वितीयेऽहनि द्वादश्यां प्रातःकालमारभ्य यामत्रयं यावत् तद्भटैस्तदाज्ञया मनुष्यपश्वादयः सर्वेऽपि खड्गभुशुण्ड्यादिभिर्मारिताः" इति । 'लेटर मुगल्स'—ग्रन्थे स्वस्मिन्दिने त्रयोदशी तिथिरासीदित्युक्तम्—भाग २, पृ० ३६५; आंग्लतिथिश्च ११ मार्च १७३९ दत्ता । 'इण्डियन एफिमेरीज'-गणनया त्वेतस्यामांग्लतिथौ द्वादशी तिथिरेवायाति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मारितमनुष्याणां [1]संख्या, कति दिनानि नादिरशाहस्तत्र [2]स्थितः, कदा च स दिल्लीतो निर्गत[3] इत्यादिविवरणमपि ग्रन्थकारो दातुकाम आसीत्; किन्त्वज्ञातकारणवशात्तेषां स्थानानि तेन रिक्तान्येव स्थापितानि । तथैव ग्रन्थकारः सादतखांनसेनायां दैवज्ञरूपेण वर्तमान आसीदिति स्वयमेव तेन स्वीकृतम् । एवमेव ग्रन्थान्ते —

शके चन्द्रर्षिरसभूमिते ज्येष्ठे सिते दले ।
ग्रन्थः संपूर्णतां प्राप्तः पञ्चम्यां बुधपुष्ययोः ॥

इत्येवं ग्रन्थसमाप्तिकालो दत्तः । अर्थात् १६७१ तमे शके (१८०६ वि) ज्येष्ठशुक्लपञ्चम्यां बुधे पुष्यनक्षत्रे ग्रन्थः समाप्तिमगादिति । एवमेव—"एतस्याग्रेऽपि पृथिवीपतिसहवासस्तज्जयादिकं च तदन्यत्र काव्यं कृतमस्ति" इति टिप्पणीत उपर्युक्ततिथ्यनन्तरमपि तस्यावस्थितिरासीदेव । निर्भ्रान्तैरेभिः प्रमाणैर्विक्रमाष्टादशशताब्द्या उत्तरार्द्धे ऊनविंशशताब्द्याः पूर्वार्द्धे च ग्रन्थकर्तुरवस्थितिरासीदिति बाढं सिद्ध्यति ।

अस्य महानुभावस्य मुख्यं निवासस्थानं विश्वेश्वरपुरी काशी आसीत् । किञ्चित्कालं धनोपार्जनार्थं च इन्द्रप्रस्थे (दिल्ली) स्थितम् । तत्रैव च तेनास्य ग्रन्थस्य रचना कृतेति—

श्रीमहेश्वरभट्टेन काशीमुख्यनिवासिना ।
इन्द्रप्रस्थस्थितेनैव कृतं कौतुकमादरात् ॥

'लेटर मुगल्स'-ग्रन्थे नरसंहारसमयः प्रातः ९ वादनतो मध्याह्ने २ वादनं यावत् प्रदर्शितः—भाग २, पृ० ३१८ ।

१ अस्मिन्विषये 'लेटर मुगल्स'-संपादकेन बहूनामितिहासलेखकानां विभिन्नानि मतानि समुट्टङ्कितानि—भाग २, पृ० ३६८-६९ ।

२ ५७ दिनानि यावत्स दिल्लीमध्ये स्थित इति 'लेटर मुगल्स'-संपादकमतम्—भा० २, पृ० ३७५ ।

३ ५ मई १७३९ ईशवीये स दिल्लीतो निर्गतः । द्रष्टव्यम्—'लेटर मुगल्स' भाग २, पृ० ३७५; 'फाल आफ दी मुगल एम्पायर' भाग १, पृ० ३ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति ग्रन्थान्तश्लोकतो ज्ञायते। पृथिवीपतिजयवर्णनपरमन्यदपि किमपि काव्यं तेन कृतमिति पूर्वोद्धृतटिप्पण्या ज्ञायते। एष च पृथिवीपतिर्दिल्लीपतिर्मुहम्मदशाह एव भवितुमर्हति। तेन च नादिरशाहात् स्वकीयं राज्यं पुनर्लब्ध्वा ये विजयाः कृतास्तेषामेव विजयानां वर्णनं श्रीमहेश्वरभट्टेन स्वकीये काव्ये कृतं भवेत्। किन्तु किंनामकं तत्काव्यमासीदिति नाद्याप्यस्माभिर्ज्ञायते।

वंशपरिचयश्च ग्रन्थकारेण "श्रीमहेश्वरभट्टेन" इति श्लोकटिप्पण्यामित्थं दत्तः—"काश्यां नागरज्ञातीया मन्त्रशास्त्रिणो रामकृष्णभट्टाः प्रसिद्धास्तदात्मजो देवकृष्णभट्टस्तत्सुतो हरिकृष्णभट्टस्तत्सुतो महेश्वर इति" इति। अनेन महेश्वरो नागरज्ञातीयो हरिकृष्णभट्टस्य पुत्रो देवकृष्णभट्टस्य पौत्रो मन्त्रशास्त्रिणः श्रीरामकृष्णभट्टस्य प्रपौत्रश्चेति विज्ञायते। आगमकौमुदी–आगमचन्द्रिका–पीठचिन्तामणिनामकानां तान्त्रिकग्रन्थानां रचयितुः श्रीरामकृष्णभट्टस्योल्लेख आफ्रेख्टबृहत्सूच्यामुपलभ्यते। तत्रास्य ग्रन्थस्य रचनाकाल एकत्र १७२६ अन्यत्र च १७२२ दत्तस्तन्न साधु; श्रीराजेन्द्रलालमित्रसूचीपत्रे-यदाधारेण ह्यत्र तिथिर्दत्ता–मुनिवेदनृप (१६४७) मिते शके पुस्तकं लिखितमिति स्पष्टतया प्रतिपादितत्वात्। तथा च १७२६ वर्ष एव ग्रन्थसमाप्तेः शुद्धा तिथिः। १७२२ वर्षसमयस्तु प्रामादिक एव। एवं चैष रामकृष्णभट्टः प्रायो महेश्वरभट्टसमकालिक एव सिद्धयतीति एष एव तत्प्रपितामह इति वयं न सुदृढं कथयितुं पारयामः। देवकृष्णभट्टहरिकृष्णभट्टयोस्तु किंचिदपीतिवृत्तमाफ्रेख्टसूच्यां नोपलभ्यते। सरस्वतीभवनस्थे महीधरसंग्रहे ३५७ संख्याङ्कितपुस्तकपुष्पिका—"संवत् १७७७ शा० १६४२ प्र०माघकृष्ण १४ रवौ पंड्याहरिकृष्णेनात्मपठनार्थं परोपकारार्थं लिखितम्" इत्थं वर्तते। एष च पंड्या हरिकृष्णो महेश्वरस्य पितैव भवेदिति समयसाम्यतोऽनुपदमेवोट्टङ्कितप्रमाणान्तरतश्चानुमीयते।

अत्र ग्रन्थारम्भे—"नत्वा गणेशमीशानं भैरवं पार्वतीं गुरुम्" इति। ग्रन्थावसाने च—"श्रीनृसिंहो महादेवो गणेशः कालभैरवः" इत्येवं गणेशकालभैरवादीनां स्मरणात्, "काश्यां नागरज्ञातीया मन्त्रशास्त्रिणः" इति टिप्पणीवाक्यतश्च मन्त्रमहोदध्यादितान्त्रिकग्रन्थानां कर्त्रा शुक्लयजुर्वेदभाष्यकारेण महीधरेण साकमस्य ग्रन्थकारस्य कोऽपि सम्बन्धो भवेदिति कल्पना समुन्मिषति। महीधरः पिशुनहरनागरज्ञातीयो मन्त्रमहोदधिप्रभृतीनां तान्त्रिकग्रन्थानां रचयिता काश्यां प्रसिद्धस्तान्त्रिक आसीदिति 'सुप्रभायाः' पञ्चमोपाधिवितरणोत्सवाङ्के 'महीधरसंग्रह' नामके लेखेऽस्माभिः सप्रमाणमुपस्थापितम्। तत्र महीधरविरचितानां लिखितानां च ग्रन्थनाम्नां ग्रन्थारम्भसमाप्तिस्थानां श्लोकानामपि संग्रहः कृतो विद्यते। तैः श्लोकैस्तुलनयाऽत्रत्यानां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ग्रन्थारम्भसमाप्तिश्लोकानामतीव साम्यं दृश्यते। एवं चैषा कल्पना बद्धमूला भवति-अस्ति कोऽपि सम्बन्धो ग्रन्थकारस्य महीधरेणेति। अस्मिन्नेव संग्रहे पंड्याहरिकृष्णलिखितस्य पुस्तकस्यैकस्योपलब्धिरिमां कल्पनां पूर्वोक्तानुमानं च नूनं द्रढयति।

विक्रमोनविंशशताब्द्या आरम्भेऽस्य ग्रन्थस्य रचना जाता। तदाऽत्रत्ये समाजे बहूनां नूतनानां शब्दानां प्रचारोऽभूद् येषां पर्यायाः संस्कृतभाषायां नासन्। ईदृशा बहवः शब्दा अत्र मूलरूपेणैवोट्टङ्किताः। बबूलादिदेशीशब्दानामप्यत्र प्रयोगो दृश्यते। कुत्रचन शब्दानुकरणमप्याचरितम्। यथा—बबूल, बाहू डोलावनम्, घूघुरव...., डांडि, झंपाणम्, कण्डिकम्, क्रोष्टपालः, शेटकः, सूबाकस्य, दीनाः, विलाइत, टोपीवाला, ईरानी, मोगल, इति। एषां सर्वेषां व्याख्यानं मूलग्रन्थटिप्पण्यामेव द्रष्टव्यम्।

ग्रन्थकारो यद्यपि धनोपार्जनार्थमेव स्वकीयां यात्रां विहितवान्, तथापि स स्वाभिमानी निर्भीकः शूरश्चासीत्। "बह्वायासैः सुसंपन्ने शास्त्रे देशान्तरे पुनः। दुर्गापाठः परार्थम्" इत्येवं परनिमित्तं दुर्गापाठं सोऽनुशोचति। "इत्यादिभिः कष्टसंचैर्धनमुत्पादितं बहु। म्लेच्छाधमानां संगत्या" अत्र कवेः स्वाभिमानं पुनरपि समुज्जृम्भते। 'माझा प्रवास'—नामकस्य मराठीग्रन्थस्य लेखकः १८५७ ईशवीये वर्षे संजातस्य विप्लवस्य विस्तृतं विवरणं समर्पयति। किन्तु स स्वात्मानं भिक्षुकरूपेणैव प्रख्यापयति, यात्रासमये च धार्मिककारणवशादेव दानादिकं न गृह्णाति, परार्थे यज्ञयागादिकार्यसंपादनमेव च तस्य धनार्जनसाधनमस्ति। महेश्वरः 'आगत्य पतितं चौरैः....पातिते चौरवर्ये", "भिल्लैरुक्तं मध्यवने वस्त्रं देयं त्वया नर। वाक्यं श्रुत्वा कृतं युद्धम्' इत्येवंप्रकारेण स्वमार्गपतितैश्चौरादिभिर्युद्धं विदधाति। माझाप्रवासकारस्तु एकाधिकवारं स्वार्जितं धनमेभ्यः प्रदाय स्वकीयं जीवनं यथाकथंचिदपि रिरक्षिषति। झांसीराज्ञ्या लक्ष्मीबाईदेव्याः पराजयानन्तरमांग्लसाम्राज्यसैनिका यदा नगरं प्रविश्य तद्विध्वंसयन्ति तदा माझाप्रवासकारो गृहस्यैकस्यान्धतमसावृतायां गुहायां निलीनो भयोद्विग्नश्च षोडश्याः स्पर्शसुखमपि नान्वभवत्तत्रैवास्माकं कविः पावापुरदुर्गारोहणकाले कोटस्थैर्भटैः पातितेनाग्निना दग्धः परिखायां निपतति, पकरीग्रामयुद्धे चिबुकान्तःप्रदेशे शरेण विक्षतो भवति, नेवादाग्रामे शस्त्रक्षते संजातेऽपि जलच्छायाविहीने पथि क्रोशचतुष्टयपर्यन्तमश्वेन गच्छति, सादतखांनमनसूरअलीखांनसेनायां दैवज्ञरूपेण प्रविश्य स्वरोदयज्ञानेन तेषां जयादिदानार्थं मथुरानिकटस्थगोवर्द्धनपर्वतसमीपस्थाद् राधाकुण्डाद् दिल्लीमध्यस्थायां कालिकायां महाराष्ट्रैर्युद्धार्थं गच्छति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्करा लुण्टाकाश्च पथिकान् नानाव्याजवशेन यथा तदा मुष्णन्ति स्म तत्साम्प्रतमपि नादृष्टचरम्। दुष्टानां करग्राहकाणामपि तदा विभीषिका आसीत्। नद्युत्तारावसरे समापतन्तीनां विभीषिकाणां रोमाञ्चकं वर्णनं कृतमस्ति। पथिकजनसंरक्षणाय भृतो ग्रामकोष्ठपालः (चौकीदार) "अयं किं मारितः साधुः" इत्येवं चौरं साधुरित्युद्घोषयन् पथिकानां दुःखद एव संजायते स्म। इत्येवं लेखकस्तदानीन्तनीनां सर्वविधपरिस्थितीनां चित्रणं कुर्वन् ग्रन्थारम्भे कृतां स्वां प्रतिज्ञाम्—"विदेशे सावधानत्वं भविष्यति" इत्येवंरूपामक्षरशः पालयति।

विविधानां व्यक्तीनां स्थानानां च निर्देशो ग्रन्थकारेण तत्र तत्र कृतस्तेषां विवेचनं च तत्रैव टिप्पण्यां विशदीकरिष्यत इत्येतावदेवोक्त्वा विरम्यते।

अस्य पुस्तकस्य प्रकाशने सहायकं सरस्वतीभवनस्थितमेकमेवादर्शपुस्तकम्। तस्य संख्या च न० ७७७० विद्यते। पुस्तकं सम्पूर्णं शोभनाक्षरं शुद्धतरं च। तत्र सम्पूर्णे पुस्तके नव पत्राणि, प्रतिपृष्ठं सप्त अष्टौ नव वा पङ्क्तयः, एवं च सम्पूर्णे पुस्तके १२८ पङ्क्तयः सन्ति। प्रतिपङ्क्ति प्रायो द्वात्रिंशदक्षराणि। सम्पूर्णे ग्रन्थे १२६ श्लोकाः सन्ति। ग्रन्थस्याकारः ४.४"×६.२" परिमितो विद्यते। एष च ग्रन्थो ग्रन्थकारस्य केनचिच्छिष्येण लिखित इति "श्रीशुभमस्तु ग्रन्थकर्तुः श्रीगुरोः" इत्यनेनान्तिमेन पुष्पिकावाक्येन स्फुटं प्रतीयते। लिपिकालश्च ग्रन्थसमाप्तिकालसमान एव मन्तव्यः, पत्राणां रिक्तभागेषु स्वयं ग्रन्थकर्त्रा लघ्वक्षरैष्टिप्पणस्य कृतत्वात्। "दांनेतरायो मत्पितुः शिष्यः........मदाज्ञाकारी च" इति टिप्पणलेखात्स्पष्टमेव प्रतीयते यदस्य कर्ता स्वयं ग्रन्थकार एवेति। मुखपृष्ठे च यद् नादिरशाहकृतदिल्लीविजय-ध्वंसवर्णनं विद्यते तत्स्वयं ग्रन्थकारेणैव लिखितम्। तत्र अष्टादशपङ्क्तयः, २६२ संख्याकान्यक्षराणि च विद्यन्त इति शम्॥

चैत्रपूर्णिमा २००६ ब्रजवल्लभद्विवेदः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पथिकजनपातकचिन्तनस्मृतिः

सटिप्पणा

श्रीमहेश्वरभट्टविरचिता

*नत्वा गणेशमीशानं भैरवं पार्वतीं गुरुम् ।
सामान्यां स्वानुभूतां[1] च पातकस्मृतिमारभे ॥ १ ॥
धनाढ्यानां निर्धनानां विदेशे कष्टमेव हि ।
स्तोकं वा बहुलं वापि जायते स्वानुरूपतः ॥ २ ॥
अतो ग्रन्थं विचार्यैनं कृता यात्रा सुखप्रदा ।
विदेशे सावधानत्वं भविष्यति न संशयः ॥ ३ ॥
विदेशजं कष्टसंघं केन वक्तुं प्रशक्यते ।
तथापि किंचिल्लोकार्थं क्रमतो वर्ण्यते मया ॥ ४ ॥

तत्रादौ सर्वसामान्यं स्वानुभूतं च उष्णकालवर्णनमाह

धरणी तप्तलोहाभा मार्तण्डस्त्वतिचण्डरुक् ।
जलं नैवाप्यते क्वापि पातकं किमतः परम् ॥ ५ ॥
जलप्राप्तास्तु ये जीवास्ते हताश्चोष्णवायुना ।
परिश्रमहताश्चान्ये पातकं किमतः परम् ॥ ६ ॥
वातः संमुखगो रौद्रः सूर्यस्तपति दुःसहः ।
गगनं धूलिसंवीतं पातकं किमतः परम् ॥ ७ ॥
मध्यंदिने वायुवेगश्चण्डसूर्यश्च सर्वतः ।
नेत्रयोश्च रजोयोगः पातकं किमतः परम् ॥ ८ ॥

---

१ विदेशे इति शेषः ।

---

* आदर्शपुस्तकारम्भः—"श्रीगणेशाय नमः । श्रीगुरुचरणारविन्दाभ्यां नमः । श्रीसरस्वत्यै नमः ॥" इत्थं भवति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुन्देलखण्डादिषु

मध्यंदिने वायुनाशो घर्मदाहः सुदुःसहः ।
नगस्था दृषदस्तप्ताः पातकं किमतः परम् ॥ ९ ॥
नास्ति मध्ये जलं क्वापि ग्रामकूपे तु मृज्जलम् ।
छाया बबूलजा* क्वापि पातकं किमतः परम् ॥ १० ॥
†वक्की मृज्जा जलेनाक्ता निकटे यस्य संस्थिता ।
तेन किंचिज्जलं पीतं पातकं किमतः परम् ॥ ११ ॥
‡सार्द्धगव्यूतितुल्यं तु क्रोशमानं प्रकीर्त्तितम् ।
[1]क्षुत्तृषार्ता जनाः सर्वे पातकं किमतः परम् ॥ १२ ॥

---

१ तत्रेति शेषः ।

---

* 'बबूल' इति देशीशब्दः । तस्य बर्बुरः, किङ्किराल इत्यादयः संस्कृतपर्याया निघण्ट्वादिषु द्रष्टव्याः ।

† 'वक्की' नाम 'सुराही' इति भाषायां प्रसिद्धं पात्रं भवेत् । तद्धि मृदा जातं निर्मितमथ च जलेनाक्तं पूर्णं भवति । अद्यत्वेऽपि ग्रीष्मकालिकयात्रासु तस्योपयोगः प्राचुर्येण दृश्यते । तादृशमेव किमपि लघुपात्रं जलपूरितं ग्रीष्मकालिकयात्रासु यात्रिभिः पिपासानिवृत्त्यर्थं नीयमानं भवेत् । तथा च यस्य निकटे तत्पात्रं स्थितं तेन पुरुषेण जलबाहुल्याभावात् तत्समाप्तिभयेन किंचिदेव जलं पीतमिति श्लोकस्यार्थः । 'आप्टे'-रचिते संस्कृतांग्लशब्दकोशे वक्त्रशब्दस्य पात्रविशेषस्य मुखमप्यर्थो निर्दिष्टः । तेन विशेषप्रकारकमुखाणां लघुपात्राणां कृते वक्त्रीशब्दस्य प्रयोगः संभवी । अनेनैव शब्देन विकसितः 'वक्की' इति कश्चिद्देशीशब्दः स्यात् । एवमपि पूर्वोक्त एवार्थः स्फुटीभवति । वास्तविकशब्दार्थगवेषणायां भूरि परिश्रान्तम् ; किन्तु तत्र साफल्यं नासमिति सूरिभिस्तत्र यतनीयम् ।

‡ अर्द्धेन सहिता गव्यूतिः सार्द्धगव्यूतिः, अर्द्धगव्यूतिरिति यावत् । तया तुल्यं क्रोशमानम्, "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरवचनाद् गव्यूतेः क्रोशद्वयात्मकत्वात् ; "धन्वन्तरसहस्रं तु क्रोशः क्रोशद्वयं पुनः । गव्यूतं स्त्री तु गव्यूतिः" इति वाचस्पतिवचनाच्च ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ सामान्यं स्वानुभूतमपि वर्षाकालवर्णनमाह

पर्जन्यभीत्या त्वरया नीतो मार्गः सुदुःखदः।
भोजने चागता वृष्टिः पातकं किमतः परम् ॥ १३ ॥
वृष्टिवायुसमायोगात् स्नावितो वस्त्रसंचयः।
स्वापो निरशनो [1]जातः पातकं किमतः परम् ॥ १४ ॥
*बाहू डोलावनं देहीत्यादिग्रामीणवाक्यतः।
[2]त्यक्तमाच्छादनं पात्रं पातकं किमतः परम् ॥ १५ ॥
चातुर्मास्ये नदी पूर्णा सार्थे कोलाहलो महान्।
प्रबलैर्गृह्यते नौका पातकं किमतः परम् ॥ १६ ॥
निर्बलैः संस्थितं तीरे यष्टिताडनभीतितः।
सार्थः शीघ्रं चाग्रगतः पातकं किमतः परम् ॥ १७ ॥
पश्चात् स्थितेभ्यो द्रव्यं तु गृह्यते कर्णधारकैः।
यथेष्टं निर्भयाद् दुष्टैः पातकं किमतः परम् ॥ १८ ॥
महापर्जन्यवशतः सर्वमार्द्रं बभूव ह।
सूर्यस्य दर्शनं नास्ति पातकं किमतः परम् ॥ १९ ॥
भूमिस्तु पिच्छिला सर्वा निपतन्त्युष्ट्रकादयः।
केषांचित् त्रुटिताः पादाः पातकं किमतः परम् ॥ २० ॥
मार्गे वारिदसंत्रासान्न भुक्तं क्वापि चर्वणम्।
†स्थितौ पाकस्थलं नाऽप्तं पातकं किमतः परम् ॥ २१ ॥

---

१ वृत्त इत्यर्थः। २ गृहे इति शेषः।

---

* बाहू हस्तौ धुन्वानेन त्वया गन्तव्यम् (हाथ झुलाते चलो, छुट्टे छरीले चलो) इति ग्रामीणवाक्याद् गृहे वस्त्रपात्रादिकं त्यक्तम्। यदि हि हस्तयोर्वस्त्रपात्रादिकं स्यात्तर्हि हस्तधूननमसंभवि, रिक्तपाणीनामेव तथाविधक्रियादर्शनादिति भावः।

† सायं रात्रिव्यतिपाताय यत्रावासः परिगृहीतः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ सर्वसामान्यं स्वानुभूतं च शीतकालवर्णनमाह

माघे [१]मार्गभयात् [२]त्यक्तमाच्छादनपटादिकम् ।
मार्गे मेघसमायोगः पातकं किमतः परम् ॥ २२ ॥
काष्ठेनार्द्रतरेणैव धूमव्याप्ते तु लोचने ।
सायं शीतबलं जातं पातकं किमतः परम् ॥ २३ ॥
अङ्गुल्यो वक्रतां प्राप्ताः पादौ हिमगताविव ।
शिरः शीतसमाक्रान्तं पातकं किमतः परम् ॥ २४ ॥
*तूलिकाद्यं गृहे त्यक्तं [३]तृणमङ्गीकृतं निशि ।
वायुः शीतः समायाति पातकं किमतः परम् ॥ २५ ॥
पार्श्वपादौ प्रस्फुटितौ धूलिरन्तर्त्रिशत्यपि ।
भूमौ दत्ते व्यथाधिक्यं पातकं किमतः परम् ॥ २६ ॥
उषस्युत्थानकाले तु घ्राणं स्रवति शीततः ।
संमुखः शीतगो वायुः पातकं किमतः परम् ॥ २७ ॥

अथ सर्वसामान्यं स्वानुभूतं च द्वादशसु मासेष्वाह

उपानहौ धृते पूर्वं पादत्वङ् नावशिष्यते ।
अधृते कण्टकैर्वेधः पातकं किमतः परम् ॥ २८ ॥
मुक्त्वा स्नानादिकं सर्वमस्तान्तं भ्रमणं कृतम् ।
शून्यग्रामे स्थितिर्लब्धा पातकं किमतः परम् ॥ २९ ॥

---

१ मारेति पाठः । २ गृहे इति शेषः ।
३ आस्तरणार्थमिति शेषः ।

---

* तूलः कार्पासः । तूलिका कार्पासनिर्मितो हिमानिलनिवारणसाधनो नीशारः । "नीशारः स्यात्प्रावरणे हिमानिलनिवारणे" इत्यमरः । 'तुराई, रजाई' इति भाषायाम् । 'तुराई-'शब्दस्य प्रयोगो यथा गोस्वामितुलसीदासविरचिते रामचरितमानसे-"नींद बहुत प्रिय सेज तुराई" इति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुष्टैः *करग्राहकैस्तु गन्तुं नाज्ञैव दीयते ।
सार्थे गते सर्वहराः पातकं किमतः परम् ॥ ३० ॥
तस्करैर्लुण्ठिताः केचिच्छस्त्रैः संताडिताः परे ।
पलायनपराश्चान्ये पातकं किमतः परम् ॥ ३१ ॥
अन्नसंग्रहकाले तु चूर्णं कनकसंभवम् ।
तस्करैः पात्यते पिष्टे पातकं किमतः परम् ॥ ३२ ॥
वैष्णवं रूपमाकल्प्य तस्कराः पथिकान् बहून् ।
लुण्ठन्ति दत्त्वा नैवेद्यं पातकं किमतः परम् ॥ ३३ ॥
†उत्काः संस्कृतमासाद्य पथिकं मोहयन्ति च ।
लुण्ठन्ति सङ्गिनं प्राप्य पातकं किमतः परम् ॥ ३४ ॥
यत्र त्वया गम्यते च मया तत्रैव गम्यते ।
[1]मार्गे हरति सर्वस्वं पातकं किमतः परम् ॥ ३५ ॥
श्राद्धमस्ति पितुर्मेऽद्य दैवात्प्राप्तो भवादृशः ।
हिनस्ति दत्त्वैतल्लोभं पातकं किमतः परम् ॥ ३६ ॥
नानारूपधराश्चौरा नानाव्याजवशेन हि ।
मारयन्ति जनान्मार्गे पातकं किमतः परम् ॥ ३७ ॥
एकाकिनो निर्धनस्य स्कन्धे भारधरस्य च ।
नास्ति कष्टं विदेशाच्च पातकं किमतः परम् ॥ ३८ ॥
ऋते विदेशं नो लाभो गृहे निर्धनता सदा ।
शरीरं तु जराक्रान्तं पातकं किमतः परम् ॥ ३९ ॥

---

१ उत्क इति शेषः ।

---

* एते करग्राहका मुस्लिमशासकैर्हिन्दूयात्रिणां कृते स्थापितस्य 'जजिया'—नामकस्य करस्य ग्राहका राजकर्मचारिणः स्युः ।

† 'उत्क'-शब्दस्यात्र प्रयोगः 'उचक्का' इति भाषायां प्रसिद्धेऽर्थे कृतः । शब्दानुशासनेषु तस्योत्कण्ठितार्थबोधकत्वं दृश्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ नद्युत्तारे

शकटाद्यं पारगतं [१]स्वयं तत्रैव संस्थितम् ।
बद्धा नौका वायुवेगात् पातकं किमतः परम् ॥ ४० ॥
नावि स्थिते[२] भारवाहः[३] पार्श्वतो[४] लापितो जले ।
जलवेगाद् गतो[५] हस्तात् पातकं किमतः परम् ॥ ४१ ॥
शकटं स्थापितं नावि [६]पार्श्वतोऽम्बुनि [७]सद्वृषौ ।
प्रवाहगौ वृषौ[८] वेगात्[९] पातकं किमतः परम् ॥ ४२ ॥
नौकातिलोकैराक्रान्ता उष्ट्राघातस्तु पादजः[१०] ।
निमग्ना[११] मध्यनद्यां तु पातकं किमतः परम् ॥ ४३ ॥
वृषपुच्छसहायेन स्वबाहुबलतोऽपि च ।
केचिल्लग्नाः पारदेशं पातकं किमतः परम् ॥ ४४ ॥
केचिन्मध्ये निमग्नाश्च मनोरथसमाकुलाः ।
त्यक्तपुत्रादिकाश्चान्ये पातकं किमतः परम् ॥ ४५ ॥
वृद्धः पिता पारगतः पुत्रस्तु *सूर्यजातिथिः ।
द्रव्यादिकं जले मग्नं पातकं किमतः परम् ॥ ४६ ॥
पठिते च वरे शास्त्रे व्युत्पन्नेष्वात्मजादिषु ।
विदेशवासो वार्द्धक्ये पातकं किमतः परम् ॥ ४७ ॥
बह्वायासैः सुसंपन्ने शास्त्रे देशान्तरे पुनः ।
दुर्गापाठः परार्थं तु पातकं किमतः परम् ॥ ४८ ॥

---

१ अव्ययम् । २ मयीति शेषः । ३ टट्टू [अश्वजातिविशेषः] । ४ नौकायाः । ५ भारवाहः । ६ उभयत्र । ७ लापितौ इति शेषः । ८ उतावेव । ९ जलस्येति शेषः । १० जात इति शेषः । ११ तेनेति शेषः ।

---

* सूर्यजा यमुना "कालिन्दी सूर्यतनया यमुना" इत्यमरः । तस्या अतिथिर्नाम यमुनायां निमग्न इति भावः । अथवा सूर्यजस्य यमस्यातिथिः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धिक् पाण्डित्यं समर्थत्वं यत्पुनर्वार्धकेऽध्वनः ।
सेवनं सर्वदा चैव पातकं किमतः परम् ॥ ४९ ॥

*कूर्माचलादिकेदारनाथबदरीनाथादिहिमाक्रान्तपर्वतमार्गेषु

अत्युच्चाः पर्वता दृष्टा नद्यो घूघुरवान्विताः ।
तरवो व्याघ्रसंवीताः पातकं किमतः परम् ॥ ५० ॥
नगानामुपरि स्थित्वा दृष्टं चेत्सर्वतो वनम् ।
दृश्यतेऽतीव भयदं पातकं किमतः परम् ॥ ५१ ॥
कचिच्छ्रुतो व्याघ्रशब्दो गजागमनमप्युत ।
शूकरास्तवपरंपाराः पातकं किमतः परम् ॥ ५२ ॥
भिल्ला बाणं समाकृष्य मारणार्थमुपस्थिताः ।
द्रव्यानुमानतः पापाः पातकं किमतः परम् ॥ ५३ ॥
इतस्ततो दृषद्व्याघ्रतरवः सन्ति केवलम् ।
नराश्चौरविशेषाश्च पातकं किमतः परम् ॥ ५४ ॥
नगारोहणकाले तु श्वासः संजायते महान् ।
पादावपि व्यथाकीर्णौ पातकं किमतः परम् ॥ ५५ ॥
नगोत्तमाङ्गे नो वारि मध्ये च प्राप्यते कचित् ।
अधस्तात्तु नदी भीमा पातकं किमतः परम् ॥ ५६ ॥
दिनाष्टकं च षड् वापि नान्नं संप्राप्यते कचित् ।
सह्यनीते भारभीतिः पातकं किमतः परम् ॥ ५७ ॥
लभ्यते वाहनं †डांडि झंपाणं वापि कण्डिकम् ।
शरीरं ग्रन्थिवद्यत्र पातकं किमतः परम् ॥ ५८ ॥
तुषारबलतः सूर्यो न तपत्यपि तादृशः ।
जलस्पर्शाच्छून्यदेहः पातकं किमतः परम् ॥ ५९ ॥

---

* कूर्माचल आधुनिकः 'कुमायूं'–प्रदेशः । † 'डांडी, झंपाण, कण्डी' इति त्रयो देशीशब्दाः पर्वतमार्गेषु मनुष्यैर्वोढव्येषु शिबिकासदृशेषु वाहनेषु प्रयुज्यन्ते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महापातकहन्त्री तु गङ्गा न स्पृश्यते क्वचित्।
शीतबाहुल्यभीत्या च पातकं किमतः परम् ॥ ६० ॥
मार्गोऽप्येकजनस्यैव संकीर्णस्तु नगोपरि ।
अधःपाते महामृत्युः पातकं किमतः परम् ॥ ६१ ॥
तुषारबलतश्चापि नदी नैव प्रदृश्यते ।
[1]भ्रान्त्याध्वनो [2]मध्यपातः पातकं किमतः परम् ॥ ६२ ॥
हिमाधिक्यान्मार्गदण्डी दृश्यते नैव कुत्रचित्।
सुक्षश्चेत् प्राप्यते मार्गः पातकं किमतः परम् ॥ ६३ ॥

अथ केवलं मार्गे स्वानुभूतमाह

सार्थः समागतः शीघ्रं चूतारामे मनोरमे ।
चण्डाशुगात्* पाकहानिः पातकं किमतः परम् ॥ ६४ ॥
वायुः स्थास्यति संध्यायां[3] दिने निश्चित्य संस्थितम्।
तथा[4] निश्युपवासोऽभूत्पातकं किमतः परम् ॥ ६५ ॥
न शीघ्रं पच्यते पात्रे मृज्जे क्षुत्प्रबला पुनः।
आगत्य पतितं चौरैः पातकं किमतः परम् ॥ ६६ ॥
पातिते[5] चौरवर्ये तु †कोष्ठपालोऽपि दुःखदः[6] ।
अयं किं[7] मारितः साधुः पातकं किमतः परम् ॥ ६७ ॥
एकाकिना ज्वरार्तेन मार्गे तस्करसंकुले।
स्थितं द्रव्यान्तिकस्थेन पातकं किमतः परम् ॥ ६८ ॥

---

१ तत्रेति शेषः। २ नद्यामिति भावः। ३ इति इति शेषः। ४ वायुरेव। ५ मयेति शेषः। ६ जात इति शेषः। ७ किमर्थमित्यर्थः।

---

* आशुगः पवनः। † कोटपालः, कोष्ठपाल इति संस्कृतरूपम्, ग्रामरक्षक इत्यर्थः। 'चौकीदार' इति भाषायाम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कूर्माचलमार्गे

सार्थः समागतोऽरण्ये दृष्ट्वा व्याघ्रं पलायिताः ।
नीतो धीरः[1] पुस्तकाढ्यः पातकं किमतः परम् ॥ ६९ ॥
गङ्गाधरसहायेन गच्छतो[2] व्याघ्रदर्शनम्[3] ।
मालया[4] *व्याघ्रमुक्तस्य[5] पातकं किमतः परम् ॥ ७० ॥
शीतो ज्वरः समुत्पन्नो मार्गे स्थातुं न शक्यते ।
वस्त्रादिकं स्वल्पतरं पातकं किमतः परम् ॥ ७१ ॥
वृक्षास्तूच्चतरा भीमाः पर्वता व्याघ्रसंयुताः ।
नद्यो भूतसमाक्रान्ताः पातकं किमतः परम् ॥ ७२ ॥
सायंकालः समायातो वने व्याघ्रादिसंकुले ।
दिग्भ्रमाद् भ्रान्तमार्गस्य पातकं किमतः परम् ॥ ७३ ॥
भिल्लैरुक्तं मध्यवने वस्त्रं देयं त्वया नर ।
वाक्यं श्रुत्वा कृतं युद्धं[6] पातकं किमतः परम् ॥ ७४ ॥

†जयनगरपुष्करमार्गे

परितः सिकताभूमिर्जलच्छायाविवर्जिता ।
शकटस्थौ वृषौ श्रान्तौ[7] पातकं किमतः परम् ॥ ७५ ॥
सधनो मारितो [8]भृत्यस्तस्करैर्गूढजे[9] वने ।
आर्त्तोऽन्यो[10] रथमध्यस्थः पातकं किमतः परम् ॥ ७६ ॥

---

१ भृत्यनाम । २ ममेत्यर्थः । ३ जातमिति शेषः । ४ गङ्गाधरप्रक्षिप्तया । ५ व्याघ्रसांनिध्यात् । ६ मयेति शेषः । ७ तत्रेति शेषः । ८ चयनाख्यः । ९ ग्रामनामेदम् । १० इच्छाख्यः ।

---

* गङ्गाधरप्रक्षिप्तया मालया व्याघ्रसांनिध्यान्मुक्तिर्जाता । मालाप्रक्षेपमात्रेण व्याघ्रान्मुक्तिर्जातेत्याश्चर्यम् । † जयनगरं गवालियरराज्ये गुनासमीपे 'बजरंगगढ' इति नाम्ना प्रसिद्धम् । अत्र हि पुरा महाराजजयसिंहसमये तेषां टङ्कशाला (टकसाल) आसीत् । द्रष्टव्यम्— 'कैटलाग आफ दी कॉइन्स इन दी इंडियन म्यूजियम कलकत्ता' भाग ४ पृ० ३१२–१५ ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पाककर्ता ज्वरार्त्तः सन् रथमाच्छाद्य संस्थितः ।
पद्भ्यां नीता मया भूमिः पातकं किमतः परम् ॥ ७७ ॥
वाहनं नाप्यते क्वापि दत्ते भाटकसंचये ।
पादौ स्फोटसमाकीर्णौ पातकं किमतः परम् ॥ ७८ ॥
श्रान्तेनापि[1] कृतः पाको भोजिताः सेवकाः पुनः ।
स्वहस्तान्मार्जितं भाण्डं पातकं किमतः परम् ॥ ७९ ॥
गोवर्द्धने ज्वरो जातो मार्गश्रान्त्या ममापि च ।
पक्त्वा संभोजिता भृत्याः पातकं किमतः परम् ॥ ८० ॥
रुधिरं तु समुत्पन्नं हस्तयोर्भाण्डमार्जनात् ।
मृत्पात्रं लभ्यते नापि पातकं किमतः परम् ॥ ८१ ॥

हरिद्वारयात्रायाम्

मुरलीधरैर्धर्मबुद्ध्या प्रदत्तं शकटं मम ।
दैवादुत्पतनाघातौ पातकं किमतः परम् ॥ ८२
पतनावसरे पुत्रो रामेश्वरमहात्मनः ।
हृल्लग्नोऽपि रुरोदोच्चैः पातकं किमतः परम् ॥ ८३ ॥
ढोलासारथिना पातः कृतश्चोत्पथगामिना ।
भग्ना प्रच्छादनी घर्मे पातकं किमतः परम् ॥ ८४ ॥
महापातकनाशाय हरिद्वारमुपागतम् ।
प्रबलात्पातकाच्छूलं[2] पातकं किमतः परम् ॥ ८५ ॥
शूलेन वैरिणा त्यक्ताः[3] स्नानसंध्यादिकाः क्रियाः ।
*दक्षेश्वरादियात्रा च पातकं किमतः परम् ॥ ८६ ॥
तीर्थयात्रा कृता लोकैः पर्णकुट्यां मया स्थितम् ।
तीर्थासक्तेन मनसा पातकं किमतः परम् ॥ ८७ ॥

---

१ मया । २ जातमिति शेषः । ३ मयेति शेषः ।

---

* कनखलसमीपे दक्षेश्वरमन्दिरं विद्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

*सुधाकुण्डमिति ज्ञात्वा नगमारुह्य गच्छतः ।
श्रान्त्या मध्येऽगवाशोऽभूत्पातकं किमतः परम् ॥ ८८ ॥

भृत्यस्य भूतः संलग्नः प्रातःकाले नदीतटे ।
सार्थः सर्वोऽप्यग्रगतः पातकं किमतः परम् ॥ ८९ ॥

सहायकर्त्तुर्विप्रस्य[1] संभूता चोदरे व्यथा ।
अन्यस्य[2] पादौ शोफाक्तौ पातकं किमतः परम् ॥ ९० ॥

तस्कराणां महाभीतिः पात्राद्यं[3] भूमिसंस्थितम् ।
नास्ति निर्वाहकः कोऽपि पातकं किमतः परम् ॥ ९१ ॥

पद्भ्यामाक्रम्यते पन्थाः शयनं सुन्दरीं विना ।
भोजनं क्रियते खिन्नं पातकं किमतः परम् ॥ ९२ ॥

अथ † सादतखांनमनसूरअलिखांनसेनायाम्

बृहदश्वं समारुह्य शस्त्राण्याबध्य गात्रतः[4] ।
युद्धं कृतं महाशूरैः पातकं किमतः परम् ॥ ९३ ॥

---

१ नन्दलालशुक्लस्य । २ मनसारामस्य । ३ ग्रन्थीत्यर्थः ‡ । ४ सप्तम्यर्थे तसिः, गात्रे इत्यर्थः ।

---

* हरिद्वारसमीपे दक्षेश्वरबिल्केश्वरयोर्मध्ये 'सूरजकुण्ड' इति तीर्थं प्रसिद्धम् । तदेव सुधाकुण्डमिति नाम्ना पूर्वं परिचितं स्यात् ।

† 'सआदतखां' दिल्लीपतिमुहम्मदशाहसाम्राज्ये अवधप्रान्तस्य शासकः (सूबेदार) आसीत् । एष एव स्वतन्त्रस्यावधराज्यस्य संस्थापकः, यस्य राजधानी 'लखनऊ'-नगरे आसीत् । 'मनसूरअलीखां' च 'अब्दुलमनसूरखां' इति नाम्ना प्रसिद्धः सआदतखांनस्य भागिनेयो जामाता च आसीत् । स हि सआदतखांनस्य मरणानन्तरमवधप्रान्तस्य द्वितीयः शासकः (नवाब), पूर्वं च प्रान्तस्योपाध्यक्ष आसीत् । एतयोर्विस्तृतः परिचयः 'फर्स्ट टू नवाब्स ऑफ अवध'–नामके आशीर्वादीलालश्रीवास्तवरचिते ग्रन्थे द्रष्टव्यः ।

‡ ग्रन्थिरित्यर्थ इति भाव्यम् । अथवा 'ग्रन्थि' इति निर्विभक्तिकं पदम् । तस्य प्रयोगश्चात्र 'गठरी' इत्यर्थे कृतो भवेत् । तस्मिन् हि यात्रिणां वस्त्रपात्रधनादिकं सर्वं वस्तुजातं निबद्धं भवति । संचिते धनराशावपि 'गठरी' शब्दस्य लाक्षणिकः प्रयोगो दृश्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दुर्गारोहणकाले[१] तूपरिस्थैः[२] पातितः शुचिः[३] ।
तद्दाहात्पतितं चाधः[४] पातकं किमतः परम् ॥ ९४ ॥
पकरीग्रामपाते तु सम्यग् युद्धं कृतं नरैः[५] ।
चिबुकान्तः[६] शरो लग्नः पातकं किमतः परम् ॥ ९५ ॥
कियन्मया प्रवक्तव्यं युद्धात् संपादिता हयाः ।
शिबिकाप्ता *गाजिपूरे[७] पातकं किमतः परम् ॥ ९६ ॥
[८]शस्त्रक्षते तु संजाते गतं क्रोशचतुष्टयम्[९] ।
मार्गे[१०] न स्तो जलच्छाये पातकं किमतः परम् ॥ ९७ ॥
[११]राधाकुण्डात् समुत्थाय †कालिकायां[१२] समागतम् ।
दशयामैश्च ‡युद्धार्थं पातकं किमतः परम् ॥ ९८ ॥

---

१ पाछापुरग्रामे । २ तु उपरिस्थैः=कोटस्थैर्भटैः । ३ अग्निरित्यर्थः । ४ परिखायाम् । ५ मयेति शेषः । ६ तदा ममेति शेषः । ७ युद्धे यवनदत्तत्वात् । ८ नेवादाग्रामे इति शेषः । ९ साश्वेनेत्यर्थः । १० तत्रेति शेषः । ११ मथुरानिकटस्थगोवर्धनपर्वतसमीपस्थात् । १२ दिल्लीमध्यस्थायाम् ।

---

* 'गाजीपुर' पूर्वीयोत्तरप्रदेशस्य प्रसिद्धं मण्डलम् (जिला) अस्ति । अत्र 'पाछापुर, पगरीग्राम, नेवादा'–इत्यादिषु संजातस्य कस्यचन संग्रामस्य वर्णनं दृश्यते । विजयमहोत्सवश्च गाजीपुरे समागत्यायोजितमिति प्रसङ्गादायाति । अस्य युद्धस्य वर्णनम्–'फर्स्ट टू नवाब्स आफ अवध'–नामके ग्रन्थे नोपलभ्यते । पूर्वीयोत्तरप्रदेशविजयवर्णनं तत्र (पृ० ४४–५१) दृश्यते; किन्तु तत्रैषां स्थानानां नामानि नोपलभ्यन्ते । 'नवादा–पकरीवरांव'–नामके स्थाने साम्प्रतं विहारराज्ये गयामण्डले वर्तेते । तत्र सआदतखांनस्य केन सह कदा युद्धं संजातमिति, गयामण्डले एवैतद्युद्धं जातमन्यत्र वा कुत्रचिदित्यैतिहासिकैर्विचारणीयम् । 'गाजीपुर'–नामकं पत्तनमेकं फतेहपुरमण्डलेऽपि वर्तते ।

† एतत्कालिकामन्दिरमधुनापि पुरानीदिल्लीतो दक्षिणदिशि गव्यूतिद्वयपरिमिते दूरे वर्तते । ‡ एतद्युद्धं महाराष्ट्रीयैपेशवाबाजीरावप्रभृतिभिः सह १७३७ ईशवीये संजातम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

[1]महाराष्ट्रैर्द्विपञ्चाशत्क्रोशक्ष्मायां[2] गजेन[3] च ।
सादतखांनशूरस्य[4] पातकं किमतः परम् ॥ ९९ ॥
त्रिंशत्क्रोशं समागत्य मृतोऽश्वः कृष्णवर्णकः ।
गतमन्येन चाश्वेन[5] पातकं किमतः परम् ॥ १०० ॥
दिनत्रयं तु शस्त्राणि [6]देहाद्दूरीकृतानि न ।
न स्नातं च न पीतं च पातकं किमतः परम् ॥ १०१ ॥
तुर्येऽहनि जलं प्राप्तं [7]मुद्गाः *शेटकपञ्चकम् ।
[8]त्रिशद्भिराद्रां भुक्ताश्च पातकं किमतः परम् ॥ १०२ ॥
इत्यादिभिः कष्टसंघैर्धनमुत्पादितं बहु ।
म्लेच्छाधमानां[9] संगत्या[10] पातकं किमतः परम् ॥ १०३ ॥
नादर्शाद्दे समायाते दांनतरायेण[11] वै सह ।
नाशितं सकलं[12] तच्च पातकं किमतः परम् ॥ १०४ ॥

---

१ पूर्वान्वयः । २ कालिकायामस्य विशेषणम् । ३ उत्तरान्वयः । ४ अयोध्या-लखनोग्रामयोः †सूबाकस्य । ५ द्वितीयेनेत्यर्थः । ६ कटिपृष्ठादितः । ७ प्राप्ता इति शेषः । ८ नरैरित्यर्थः । ९ ‡मह्मदलीखांनफैजुल्लाखांनादीनाम् । १० संगतिस्तु बृहद्युद्धे स्वरोदय-ज्ञानेन तेषां जयादिदानार्थमित्यर्थः । ११ दांनतरायो§ मत्पितुः शिष्यः, ‖कोरडाजहांनाबादे सादतखांनस्य षट्सहस्राश्ववाहानां सेनापतिर्मदाज्ञाकारी चेति । १२ अश्वादिसर्वधनम् ।

---

* संस्कृतशब्दकोशेषु शेटकशब्दो न दृश्यते । बंगलाविश्वकोषे सेटशब्दः परिमाणविशेष-वाचको निर्दिष्टः । अत्र शेटकशब्दस्य प्रयोगः 'सेर' इति लीलावत्यादिषु लोके च प्रसिद्धे परिमाणविशेषे कृतः ।

† 'सूबेदार' इत्यस्मिन्नर्थे 'सूबा'-शब्दस्य प्रयोगो भूषणकविनापि भूरिशः कृतः ।

‡ मुहम्मदअलीखांनः अब्दुलमनसूरखांनस्य सेनायाः पदाधिकारी (फर्स्ट टू नवाब्स··· पृ० १४८, १५६, १६०) । फैजुल्लाखांनोऽपि तादृश एव कश्चन सैनिकः स्यात् ।

§ दांनतरायविषयिणी कापि सूचना पूर्वोक्ते ग्रन्थे नोपलभ्यते ।

‖ उत्तरप्रदेशीयफतेहपुरमण्डले 'कोरा-जहानाबाद' नामके द्वे स्थाने वर्तेते । विस्तरस्तु 'इम्पीरियल गजेटियर'-नामके ग्रन्थे द्रष्टव्यः । 'फर्स्ट टू····' पृ० ४७-५१ अपि द्रष्टव्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादिकष्टमासाद्य पुनः संपादितं वसु।
यथेष्टं विद्यया चैव गुरोश्चरणभक्तितः॥ १०५॥
मयाटितं चतुर्दिक्षु दृष्टाश्च विविधा नृपाः।
देशाश्च गिरयो देवास्तीर्थानि शुभदानि च॥ १०६॥
एवं कष्टं विदेशस्य ज्ञात्वा सम्यग्विचक्षणः।
स्वदेशे च स्थितिं कुर्यात् भुक्त्वार्धं[1] देवतां स्मरन्॥ १०७॥
यत्र सन्ति निजाः सर्वे क्रीडन्तश्चापि बालकाः।
पितरौ बान्धवाः पत्नी तं देशं नैव संत्यजेत्॥ १०८॥
स्वजनाः सन्ति चान्यत्र विदेशेऽपि स्वयं पुनः।
तत्र चेत्सुखमत्यन्तं न तच्च सुखमुच्यते॥ १०९॥
सर्वोपायः कुटुम्बस्य पालनार्थं प्रकीर्त्तितः।
तावल्लब्धे धने गेहमनृणी नैव संत्यजेत्॥ ११०॥
स्वल्पे लाभे व्ययाधिक्यं न कार्यं श्रेय इच्छता।
यथालब्धेन निर्वाहः कृतश्चेत् सुखभाग्भवेत्॥ १११॥
व्ययस्त्वायतुरीयांशादधिको नैव इष्यते।
असम्यग्व्ययशीलैस्तैरिति दुर्गास्तवे[2] स्फुटम्॥ ११२॥
* पञ्चमेऽहनि षष्ठे वा शाकं पचति गेहिनी।
अनृणी चाप्रवासी च स वारिचर मोदते॥ ११३॥

---

१ स्वेन भुक्तमिति शेषः।

२ 'आयतुरीयांशाधिकोऽसम्यग्व्ययः' इति तट्टीकायां † नागोजीभट्टाः।

---

* महाभारतीयवनपर्वणः ३१३ अध्यायादुद्धृतः १५ श्लोकः। 'शाकं पचति स्वे गृहे' इति तत्रत्यः पाठः।

† "असम्यगिति। तुरीयांशाधिको व्ययः असम्यग्व्ययः" इति टीकापाठः। [सप्तशती-टीका १।१४]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

युधिष्ठिरेणापि चोक्तमेतद्वाक्यान्तरं पुनः।
तस्माद्दणं न कर्तव्यं व्ययाधिक्ये ऋणं भवेत् ॥ ११४ ॥

मानहानिः पारवश्यं स्वजनेऽसमता पुनः।
सर्वत्र लघुता चैव ऋणिनस्तु भवेदिदम् ॥ ११५ ॥

तस्माद्दणं न जायेत धनमुत्पादयेत्तथा।
संपादिते यथेष्टे च धने सम्यग्व्ययी भवेत् ॥ ११६ ॥

तस्मात्सर्वैरुपायैस्तु स्वदेशे धनभाग्भवेत्।
ज्ञातिभिर्बन्धुभिश्चापि यथोक्तं व्ययमाचरेत् ॥ ११७ ॥

गुरवो देवताः शिष्टा दीनाश्च[1] बान्धवांश्च[2] ये।
ते सर्वे धनिकैः पूज्यास्तेनोच्चपदभाग्भवेत् ॥ ११८ ॥

धनहीना ऋणैर्युक्ता लुब्धाश्चातीव ये जनाः।
विदेशः सेव्यते तैस्तु तस्मादेतत्प्रकाशितम् ॥ ११९ ॥

एवं बहुविधं कष्टं विदेशे जायते नृणाम्।
तस्मात्सम्यग्विचार्यादौ कर्त्तव्यमुचितं नरैः ॥ १२० ॥

प्रतिदिग्वर्णनं ज्ञेयमेवमेवानुमानतः।
स्वल्पं कृतं मया ह्येतद् ग्रन्थगौरवभीतितः ॥ १२१ ॥

श्रीनृसिंहो महादेवो गणेशः कालभैरवः।
पठतां द्विजमुख्यानां दद्यान्मङ्गलसम्पदम् ॥ १२२ ॥

प्रकाश्य कष्टं सामान्यं स्वानुभूतं विशेषतः।
श्रीष्टदेवप्रसादेन सुखं प्राप महेश्वरः ॥ १२३ ॥

शके चन्द्रर्षिरसभूमिते ज्येष्ठे सिते दले।
ग्रन्थः संपूर्णतां प्राप्तः पञ्चम्यां बुधपुष्ययोः ॥ १२४ ॥

---

१ दीना इति प्राणिमात्रे ज्ञेयम्।

२ बान्धवास्तु दीना अदीना अपि पूज्या एवेति भावः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीमहेश्वरभट्टेन[1] काशीमुख्यनिवासिना ।
इन्द्रप्रस्थस्थितेनैव[2] कृतं कौतुकमादरात् ॥ १२५ ॥

इति श्रीमद्धरिकृष्णभट्टात्मजभट्टमहेश्वरकृता पथिकजनपातकचिन्तनस्मृतिः समाप्ता ।
श्री शुभमस्तु ग्रन्थकर्त्तुः श्रीगुरोः ॥

एषा कृतिः कृतिमतां कुशलाय भूयात्
कारुण्यतः कविवरैरपि काम्यमाना ।
कृष्णार्पितैकमतिना[3] विनिवेदितेयं
भूयो यथा हि भवकाननगो न तु स्याम् ॥ १ ॥

॥ श्रीकृष्णार्पणमस्तु श्रीः ॥

---

१ काश्यां नागरज्ञातीया मन्त्रशास्त्रिणो रामकृष्णभट्टाः प्रसिद्धास्तदात्मजो देवकृष्णभट्टस्तत्पुत्रो हरिकृष्णभट्टस्तत्सुतो महेश्वर इति । २ किञ्चित्कालं धनोपार्जनार्थमिन्द्रप्रस्थे स्थितम्, सर्वदा वासस्तु काश्यामिति भावः । ३ कृष्णाय कल्पतरवे कलिनाशनायेत्यपि पाठः ।

एतस्याग्रेऽपि पृथिवीपतिसहवासस्तज्जयादिकं च तदन्यत्र काव्यं कृतमस्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिशिष्टानि

नादिरशाहस्य दिल्लीविजयः

(ग्रन्थकारेण लिखितः)

नादर्शाहोत्पत्तिमाह । पश्चिमस्यां यवनदेशे विलाइताख्ये टोपीवाला ईरानी मोगल इति प्रसिद्धास्तज्जातीयस्तत्रत्यपादशाहोऽतिनिर्दयः शूरः ।

तेन सर्वेषां राज्यं गृहीत्वा पाणीपथे आगत्य दिल्लीपतिं महम्मदशाहं युद्धे जित्वा तं निगडे पातयित्वा संवत् १७९५ शके १६६० फाल्गुनशुद्धैकादश्यां दिल्ली-मध्यकोटे समागतः (?) । तत्र सर्वं स्वाधीनं कृतम् । ततो द्वितीयेऽहनि द्वादश्यां प्रातः-कालमारभ्य यामत्रयं यावत् तद्भटैस्तदाज्ञया मनुष्यपश्वादयः सर्वेऽपि खड्गभुशुण्ड्या-दिभिर्मारिताः । तत्र संख्या तु मारितमनुष्याणामियं जाता × × × × । नगरं समग्रं लुण्ठितम् । स्त्रियोऽप्यसंख्याता गृहीताः । धनमसंख्यं गृहीतम् । कतिचन निगडे पातिताः । एवं सर्वेषां बहुदुःखं दत्त्वा मास × × × दिन × × × दिल्लीमध्ये स्थितः । ततः × × × मासि × × × तिथौ पुनर्महम्मदशाहाय दिल्लीराज्यं दत्त्वा स्वयं विलाइतगमनार्थं दिल्लीतो निर्गतः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ग्रन्थोद्धृतश्लोकांशमूलस्थानपरिचयः

पृ०	पं०	
१४	१७	असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् । संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥ [दुर्गासप्तशती १।१४]
१४	१८	पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे । अनृणी चाप्रवासी च स वारिचर मोदते ॥ [महाभारते वनपर्वणि ३१३।१५]
१४	२१	"असम्यगिति । तुरीयांशाधिको व्ययः असम्यग्व्ययः ।" [नागोजीभट्टकृता सप्तशतीटीका १।१४]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ग्रन्थोद्धृतानि व्यक्तिनामानि

	पृ०		पृ०
इच्छा	६	मनसाराम	११
गङ्गाधर	६	मनसूरअलीखांन	११
चयन	६	महेश्वर	१५,१६
ढोला	१०	महादलीखांन	१३
दांनतराय	१३	मुरलीधर	१०
देवकृष्णभट्ट	१६	युधिष्ठिर	१५
धीर	६	रामकृष्णभट्ट	१६
नन्दलालशुक्ल	११	रामेश्वर	१०
नागोजीभट्ट	१४	सादतखांन	११,१३
नादर्शाह	१३	हरिकृष्णभट्ट	१६
फैजुल्लाखांन	१३		

ग्रन्थोद्धृतानि देशस्थानादीनि

	पृ०		पृ०
अयोध्या	१३	गोवर्द्धन	१०,१२
इन्द्रप्रस्थ	१६	जयनगर	६
कालिका	१२, १३	जहांनाबाद	१३
काशी	१६	दक्षेश्वर	१०
कूर्मांचल	७,६	दिल्ली	१२
केदारनाथ	७	नेवादा	१२
कोरडा	१३	पकरी	१२
गङ्गा	८	पाछापुर	१२
गाजिपूर	१२	पुष्कर	६
गूढज	६	बदरीनाथ	७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

	पृ०		पृ०
बुन्देलखण्ड	२	सुधाकुण्ड	११
मथुरा	१२	सूर्यंजा	६
राधाकुण्ड	१२	हरिद्वार	१०
लखनो	१३		

श्लोकानुक्रमणिका

श्लोकाः	पृ०	श्लोकाः	पृ०
अङ्गुल्यो वक्रतां प्राप्ताः	४	केचिन्मध्ये निमग्नाश्च	६
अतो ग्रन्थं विचार्यैनम्	१	कश्चिच्छ्रुतो व्याघ्रशब्दः	७
अत्युच्चाः पर्वता दृष्टाः	७	गङ्गाधरसहायेन	६
अन्नसंग्रहकाले तु	५	गुरवो देवताः शिष्टाः	१५
इतस्ततो दृषद्व्याघ्रतरवः	७	गोवर्द्धने ज्वरो जातः	१०
इत्यादिकष्टमासाद्य	१४	चातुर्मास्ये नदी पूर्णा	३
इत्यादिभिः कष्टसंघैः	१३	जलप्राप्तास्तु ये जीवाः	१
उत्काः संस्कृतमासाद्य	५	ढोलसारथिना पातः	१०
उपानहौ धृते पूर्वम्	४	तस्कराणां महाभीतिः	११
उषस्युत्थानकाले तु	४	तस्करैर्लुण्ठिता केचित्	५
ऋते विदेशं नो लाभः	५	तस्मात्सर्वैरुपायैस्तु	१५
एकाकिना ज्वरार्तेन	८	तस्माद्दणं न कर्तव्यम्	१५
एकाकिनो निर्धनस्य	५	तीर्थयात्रा कृता लोकैः	१०
एवं कष्टं विदेशस्य	१४	तुर्येऽहनि जलं प्राप्तम्	१३
एवं बहुविधं कष्टम्	१५	तुषारबलतः सूर्यः	७
एषा कृतिः कृतिमताम्	१६	तुषारबलतश्चापि	८
काष्ठेनार्द्रतरेणैव	४	तूलिकाद्यं गृहे त्यक्तम्	४
कियन्मया प्रवक्तव्यम्	१२	त्रिंशत्क्रोशं समागत्य	१३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

श्लोकाः	पृ०
दिनत्रयं तु शस्त्राणि	१३
दिनाष्टकं च षड्वापि	७
दुर्गारोहणकाले तु	१२
दुष्टैः करग्राहकैस्तु	५
धनहीना ऋणैर्युक्ताः	१५
धनाढ्यानां निर्धनानाम्	१
धरणी तप्तलोहाभा	१
धिक् पाण्डित्यं समर्थत्वम्	७
नगानामुपरि स्थित्वा	७
नगारोहणकाले तु	७
नगोत्तमाङ्गे नो वारि	७
नत्वा गणेशमीशानम्	१
न शीघ्रं पच्यते पात्रे	८
नादर्शाहे समायाते	१३
नानारूपधराश्चौराः	५
नावि स्थिते भारवाहः	६
नास्ति मध्ये जलं क्वापि	२
निर्बलैः संस्थितं तीरे	३
नौकातिलोकैराक्रान्ता	६
पकरीग्रामपाते तु	१२
पञ्चमेऽहनि षष्ठे वा	१४
पठिते च वरे शास्त्रे	६
पतनावसरे पुत्रः	१०
पद्भ्यामाक्रम्यते पन्थाः	११
परितः सिकताभूमिः	६
पर्जन्यभीत्या त्वरया	३

श्लोकाः	पृ०
पश्चात्स्थितेभ्यो द्रव्यं तु	३
पाककर्ता ज्वरार्तः सन्	१०
पातिते चौरवर्ये तु	८
पार्श्वपादौ प्रस्फुटितौ	४
प्रकाश्य कष्टं सामान्यम्	१५
प्रतिदिग्वर्णनं ज्ञेयम्	१५
बक्की मृज्जा जलेनाक्ता	२
ब्रह्मायासैः सुसंपन्ने	६
बाहू डोलावनं देहि	३
बृहदश्वं समारुह्य	११
भिल्ला बाणं समाकृष्य	७
भिल्लैरुक्तं मध्यवने	६
भूमिस्तु पिच्छिला सर्वा	३
भृत्यस्य भूतः संलग्नः	११
मध्यंदिने वायुनाशः	२
मध्यंदिने वायुवेगः	१
मयाटितं चतुर्दिक्षु	१४
महापर्जन्यवशतः	३
महापातकनाशाय	१०
महापातकहन्त्री तु	८
महाराष्ट्रैर्द्विप...	१३
माघे मार्गभीत	[illegible]
मानहानिः पारवश्यम्	१५
मार्गे वारिदसं...	२
मार्गोऽप्येकजनस्यैव......	[illegible]
मुक्त्वा स्नानादिकं सर्वम्	४

LIBRARY

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्लोकाः	पृ०	श्लोकाः	पृ०
मुरलीधरैर्धर्मबुद्धया	१०	शके चन्द्रर्षिरसभूमिते	१५
यत्र त्वया गम्यते च	५	शस्त्रक्षते तु संजाते	१२
यत्र सन्ति निजाः सर्वे	१४	शीतो ज्वरः समुत्पन्नः	६
युधिष्ठिरेणापि चोक्तम्	१५	शूलेन वैरिणा त्यक्ताः	१०
राधाकुण्डात्समुत्थाय	१२	श्राद्धमस्ति पितुर्मेऽद्य	५
रुधिरं तु समुत्पन्नम्	१०	श्रान्तेनापि कृतः पाकः	१०
लभ्यते वाहनं डांडि	७	श्रीनृसिंहो महादेवः	१५
वातः संमुखगो रौद्रः	१	श्रीमहेश्वरभट्टेन	१६
वायुः स्थास्यति संध्यायाम्	८	सधनो मारितो भृत्यः	६
वाहनं नाप्यते क्वापि	१०	सर्वोपायः कुटुम्बस्य	१४
विदेशजं कष्टसंघम्	१	सहायकर्तुर्विप्रस्य	११
वृक्षास्तूच्चतरा भीमाः	६	सायंकालः समायातः	६
वृद्धः पिता पारगतः	६	सार्थः समागतः शीघ्रम्	८
वृषपुच्छसहायेन	६	सार्थः समागतोऽरण्ये	६
वृष्टिवायुसमायोगात्	३	सार्द्धगव्यूतितुल्यं तु	२
वैष्णवं रूपमाकल्प्य	५	सुधाकुण्डमिति ज्ञात्वा	११
व्ययस्त्वायतुरीयांशात्	१४	स्वजनाः सन्ति चान्यत्र	१४
शकटं स्थापितं नावि	६	स्वल्पे लाभे व्ययाधिक्यम्	१४
शकटाद्यं पारगतम्	६	हिमाधिक्यान्मार्गदण्डी	८

LIBRARY
Jangamwadi Math, Varanasi
ACC No.........

Published by the Superintendent, Printing and Stationery, U. P. Allahabad.
मुद्रक—पं० बैकुण्ठनाथ भार्गव, आनन्दसागर प्रेस, गायघाट, बनारस १.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi